DUE DATE SLIP

GOVT. COLLEGE, LIBRARY

KOTA (Raj)

Students can retain library books only for two weeks at the most.

BORROWER'S No.	DUE DTATE	SIGNATURE

मालतीमाधवम्

प्रकरणम् ।

महाकवि भवभूति-प्रणीतम् ।

आर्यप्रभाषटपदेन काव्यतीर्थतर्कतीर्थोपनामकेन

श्रीकुञ्जविहारि-तर्कसिद्धान्तभट्टाचार्येण

स्वप्रणीतया तत्त्वबोधिनीसमाख्यटीकया बङ्गानुवादेन च

समलङ्कृत्य प्रकाशितम् ।

बङ्गाब्दाः १३२६ ।

मूल्यं ॥॥ सार्द्धरूप्यकद्वयम् ।

बङ्गानुवादसहितस्य मूल्यं ३) रूप्यकत्रयम् ।

प्रकाशक—
श्रीकुञ्जविहारितर्कसिद्धान्तः
पो:—बैद्योवेलनीरा, मालमूब ।

कलिकातानगर्य्यां
५नं छिदाममुदीलेनस्थितमास्वदचारयन्त्रे—
श्रीकुलचन्द्र दे द्वारा मुद्रितम् ।

भूमिका ।

परम कारुणिकपरमेश्वरस्यापारकरुणया सटीकानुवादमालती-माधवस्य मुद्रणं सम्प्रति समाप्तिमगमत् । मालतीमाधवस्य टीका-विरचनं समाप्य १८३५ पञ्चत्रिंशदधिकाष्टादशशततमशकाब्दीयवैशाख-मासात् पञ्चमवर्षीयार्य्यप्रभायां पुस्तकमिदं प्रकाशयितुमारब्धमपि नानाविधान्तरायाद्दर्पदयेनार्य्यप्रभायां पञ्चमाङ्कं यावत् प्रकाश्यैव पृथग्-भावेन तन्मुद्रापणं सङ्कल्प्य सप्तमवर्षीयार्य्यप्रभायां सटीकानुवादं सांख्यसूत्रं प्रकाशयितुं प्रारब्धम् । किन्तु हन्त !! सुबृहदाकारं तत्-सांख्यसूत्रं परिसमाप्तमपि न जानामि केन दैवप्रातिकूल्येन तन्मालती-माधवावशिष्टांशस्य पृथग्भावेन मुद्रापणमारब्धुमपि नालमभुवम् । अतएवागत्या सांख्यसूत्रसमाप्त्यनन्तरं नवमवर्षीयार्य्यप्रभायामेव क्रमशस्तन्मुद्रणं समाप्य सम्प्रति पृथक् पुस्तकाकारेण सम्पूर्णं मालतीमाधवं प्रकाश्यत इति सर्व्वे विदाङ्कुर्व्वन्तु ।

एतत्टीकाप्रणयनकाले च विभिन्नदेशीयानि चत्वारि पुस्तकानि संगृह्य तेभ्यः समीचीनतया विवेचितः पाठः एव मूले सन्निवेशितो व्याख्यातश्च । पाठान्तराणि च दुरूहाणि टीकायामेव समुल्लिख्य व्याख्यातानि । टीकायां तथा विषयसन्निवेशः कृतः, यथा परीक्षार्थिनां किञ्चिदपि ज्ञातव्यं नावशिष्येत । टीकायामसन्निविष्टा अपि रस-गुणनायकादिविचाराः समालोचनावसर एव प्रतिपादिताः । बङ्गानु-वादेन च दुरूहमपि पुस्तकांशं विशदयितुं प्रयत्नः कृतः । तथाच यद्यनया टीकया बङ्गानुवादेन च मालतीमाधवपाठार्थिनां कथञ्चि दप्युपकारः स्यात्तदैव प्रचुरतरार्थव्ययः परिश्रमश्च मम सफलो भवेत् ।

स्थाने स्थाने स्थितान्यप्यशुद्धानि वाचकमहोदयैरेव संशोध्य पठितुं शक्यानीति शुद्धिपत्रं न प्रकाशितम्।

परिशेषे च वक्तव्यं, कलिकातावासिना परमस्नेहास्पदेन श्रीमता नगेन्द्रनाथसिद्धान्तरत्नेनास्य मुद्रापणादिविधौ परमं साहाय्यं कृतमिति स सर्व्वान्तःकरणेनाशीर्व्वादार्हः इति शम्॥ -

श्रीकुञ्जविहारिदेवशर्म्मणः।

नाद्योल्लिखितपात्राणाम् ।

पुरुषगणः ।

सूत्रधारः ... प्रस्तावसूचयिता मुख्यतमो नटः ।
नटः ... पारिपार्श्विकापरपर्यायः कश्चिद्गुणज्ञानभिनेता ।
माधवः ... विदर्भराजमन्त्रिश्येनातस्य नन्दनः (नायकः)
मकरन्दः ... माधवस्य प्रियवयस्यः ।
कलहंसः ... माधव । कार्यदत्तो भृत्यः ।
अघोरघण्टः... तान्त्रिकानुष्ठानलब्धमाहात्म्यः कश्चिद्धीराचारो ।
पुरुषः ... नन्दनस्य कश्चिदनुचरः ।

स्त्रीगणः ।

मालती ... पद्मावतीश्वरमन्त्रिभूरिवसोः कन्यका (नायिका) ।
मदयन्तिका ... पद्मावतीश्वरनर्मसुहृज्जनन्दस्य भगिनी ।
कामन्दकी ... काचिद्बौद्धपरिव्राजिका ।
सौदामिनी ... मन्त्रसिद्धिलब्धमाहात्म्या कामन्दक्याः प्रथमशिष्या ।
अवलोकिता ... कामन्दक्याः अपरा शिष्या ।
बुद्धरक्षिता ... कामन्दक्याः शिष्या सखी च ।
कपालकुण्डला... तान्त्रिकानुष्ठानलब्धमाहात्म्या अघोरघण्टशिष्या ।
लवङ्गिका ... मालत्याः प्रियसखी ।
मन्दारिका ... अद्वैधभावेन कलहंसानुरक्ता काचिद्बौद्धमठ-
परिचारिका ।
चेटीद्वयम् ... भूरिवसोः परिचारिकाद्वयम् ।
प्रतीहारी ... भूरिवसोरन्तःपुरद्वारपालिका ।

मालतीमाधवस्य संक्षिप्तसमालोचनम् ।

इदञ्च मालतीमाधवं नाम दृश्यकाव्यं कविकल्पितेतिवृत्तत्वादिभिः "प्रकरणम्"। तत्तुटीकायामेव प्रतिपादितं, प्रकरणादिलक्षणमपि तत्रैव प्रदर्शितमनुसन्धेयम् ।

अस्य "नायको" माधवः । स च "ब्राह्मणकुमारः" 'अमात्यः" मालतीमात्रनिरतत्वा"दनुकूलः," त्यागादिसामान्यगुणपूर्णत्वात् "धीरप्रशान्तश्च"। नायकादिलक्षणानि यथा दर्पणे—

"त्यागी कृती कुलीनः सुश्लीको रूपयौवनोत्साही ।
दक्षोऽनुरक्तलोकस्तेजोविदग्धगोप्तावज्ञेता ॥"
"धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च ।
धीरप्रशान्त इत्ययमुक्तः प्रथमश्चतुर्भेदः ॥"
"अनुकूल एकनिरतः",
"सामान्यगुणैर्भूयान् द्विजादिको धीरप्रशान्तः स्यात् ।"

अस्य ब्राह्मणत्वन्तु—पञ्चमाङ्के "रे रे ब्राह्मणडिम्भ !" इत्यघोरघण्टकृतमाधवसम्बोधनात्, अमात्यत्वं पुनरमात्यपुत्रत्वेन "भाविनि-भूतवदुपचारा"दवगन्तव्यम् । अत एव "अमात्यनायकं मालती-माधव" मिति दर्पणोक्तिरपि सङ्गच्छते । एवञ्च भूरिवसोरपि ब्राह्मणत्व-मनुमातुं शक्यते, अन्यथा ब्राह्मणमाधवपितृत्वेन ब्राह्मणस्य देव रातस्य भूरिवसोरपत्येन सह निजापत्यस्य सम्बन्धकरणप्रतिज्ञाया विरोधापत्तेः । न चासवर्णविवाहस्य प्रचलितत्वे नायं विरोध इति शङ्कनीयं, तथात्वेऽपि प्रतिलोमविवाहस्य सर्वदेव निषिद्धत्वेन "कस्य किमपत्यं भवे"दित्यनिश्चितावस्थायां तत्प्रतिज्ञाया असम्भवस्य दुष्परिहरत्वात् । अनया च युक्त्या ब्राह्मणकन्यया 'मालत्या सह

विवाहे समुद्यतस्य नन्दनस्य, तद्गिन्या मदयन्तिकायाः पाणिं गृहीत वतो मकरन्दस्य च ब्राह्मणत्वं निर्बाधमवधारयितुं शक्यत इति विभावनीयम्।

अस्य "नायिका" मालती। सापि "ब्राह्मणवंशजा" "परकीया" "कन्यका" चेति। नायिकादिलक्षणानि यथा दर्पणे—

"अथ नायिका स्वाऽन्या साधारणस्त्रीति।
नायकसामान्यगुणैर्भवति यथानन्तधैर्योक्ता॥"
"परकीया द्विधाप्रोक्ता परोढ़ा कन्यका तथा।
"कन्यात्वजातोपयमा मलज्जा नवयौवना।"

मदनोद्याने साक्षादेव परस्परसन्दर्शनेन मालतीमाधवयोः परस्परानुरागोत्पत्तेः तदप्राप्तेश्च दशाविशेषोत्पादादत्र पूर्वरागलक्षणो विप्रलम्भशृङ्गार एव प्रधानतमो रसः। तल्लक्षणं यथा दर्पणे—

"श्रवणाद्दर्शनाद्वापि मिथः संरूढ़रागयोः।
दशाविशेषो योऽप्राप्तौ पूर्वरागः स उच्यते॥"

एवमन्यानोऽपि वीरादयः सर्व्व एव रसा हास्यरसविवर्जितास्तदङ्ग रूपेण सन्तीति यथास्थानमूह्यनीयम्।

प्रधानतोऽत्र माधुर्य्याख्यो गुणः। तल्लक्षणं यथा तत्रैव—

"चित्तद्रवी भावमयो ह्लादो माधुर्य्यमुच्यते।"

एवमाजःप्रमादगुणावप्यत्र स्थाने स्थाने स्त इत्यवगन्तव्यम्। प्राधान्येनात्र वैदर्भी नाम रीतिः। तल्लक्षणमपि तत्रैव

"माधुर्य्यव्यञ्जकैर्व्वर्णैः रचना ललितात्मिका।
अवृत्तिरल्पवृत्तिर्व्वा वैदर्भी रीतिरिष्यते॥

अन्या अपि रीतयोऽत्र रसतात्पर्य्यमनुसन्धेयम्।

अस्य प्रकरणस्य रचयिता महाकविर्भवभूतिः कं देशं कं वा वंशं जन्मनालमकार्षीदिति पर्य्यनुयोगं कविः स्वयमेव "अस्ति दक्षिणापथे पद्मपुरं नाम नगरं। तत्र केचित्तैत्तिरीयिणः पंक्तिपावनाः पञ्चाग्नयो

धृतव्रताः सोमपीथिनो ब्रह्मवादिनः प्रतिवसन्ति। तदामुष्यायनस्य तत्रभवतो वाजपेययाजिनो महाकवेः पञ्चमः, सुग्रहीतनाम्नो भट्टगोपालस्य पौत्रः पवित्रकीर्त्तेर्नीलकण्ठस्यात्मसम्भवः, श्रीकण्ठपदलाञ्छनः, भवभूतिर्नाम जातुकर्णीपुत्रः"। इति वीरचरितसन्दर्भेण निवारयामास! उत्तररामचरितेऽपि प्रस्तावनायामेतदनुकूलसन्दर्भो वर्त्तते। तथाच दाक्षिणात्यदेशे "पद्मपुरं" नाम नगरं भवभूतेर्जन्मस्थानम्, तत्रत्यः श्रौतकर्मादिनिरतः सुग्रहीतनामा "भट्टगोपाल"स्तस्य पितामहः,। पवित्रकीर्त्तिः "नीलकण्ठः" पिता, जातुकर्णी च मातेति सुस्पष्टमवगम्यते।

"श्रीकण्ठपदलाञ्छनो भवभूतिर्नामे"त्यनेन च दर्शनादिनानाशास्त्रपारावारपारदर्शिनस्तस्य "श्रीकण्ठ" इति सान्वर्थो गुरुदत्तोपाधिः "भवभूति" रिति च पितृकृतं नामेत्यवधारणीयम्। यत्तु—अनन्तपण्डितेनार्य्यासप्तशतीटीकायां वीरराघवेण च महावीरचरितटीकायामभिहितं "श्रीकण्ठ" इति भवभूतेः पितृकृतं नाम, परन्तु—

"तपसो कां गतोऽवस्थामिति स्मेराननामिव।
गिरिजायाः स्तनौ वन्दे भवभूतिसितानने॥"
"साऽम्बा पुनातु भवभूतिपवित्रमूर्त्तिः।"

इत्यादि श्लोकविरचनाद्"भवभूति"रिति नाम ससुत्पन्नमिति, तत्र समीचिनं विवेचयामः "श्रीकण्ठपदलाञ्छनो भवभूतिर्नामे"ति वाक्यात् "श्रीकण्ठ" इत्यस्योपाधित्वेन "भवभूति" रित्यस्याभिधानत्वेन च प्रतीतेरेव सर्व्वजनसिद्धत्वात्।

"गुणैः सतां न मम को गुणः प्रख्यापितो भवेत्।
यथार्थनामा भगवान् यस्य ज्ञाननिधिर्गुरुः॥"

इत्येतत्प्रकरणश्लोकेन—

"श्रेष्ठः परमहंसानां महर्षीणामिवाङ्गिराः।
यथार्थनामा भगवान् यस्य ज्ञाननिधिर्गुरुः॥"

इति महावीरचरितश्लोकेन च परमज्ञानशाली ज्ञाननिधिनामा सर्वश्रेष्ठः परमहंसो भवभूतिर्गुरुरिति सुस्पष्टमवगम्यते। एवमयं महाकविर्वेदवेदान्तादीनि बह्न्येव शास्त्राण्यधीतवानिति "यद्वेदाध्ययनं तथोपनिषदां साङ्ख्यस्य योगस्य चे"त्यादि श्लोकेन स्वयमेव स्पष्टमाचष्टे। परन्तु तद्विरचितप्रकरणादावपि प्रसङ्गतोऽन्तरान्तरा वेदवेदान्तशास्त्रज्ञानविज्ञानदर्शनात्तदनुमानमपि कर्तुं शक्यते।

असामान्यपाण्डित्यादिगुणसम्पन्नोऽयं महाकविः कान्यकुब्जेश्वरस्य यशोवर्मणः सभापण्डित आसीत्। तत्र च—

"कविवाक्पतिराजश्रीर्भवभूत्यादिसेवितः।
जितौ यशौ यशोवर्म्मा तद्गुणस्तुतिवन्दिताम्॥"

इति राजतरङ्गिणीश्लोकः प्रमाणम्।

यशोवर्मणो राजत्वकालश्च सप्तशतवृष्टाब्दस्य शेषभागादष्टशतवृष्टाब्दस्य प्रथमभाग इति प्रत्नतत्त्वविदः। तथाच तत्सभापण्डितस्यास्य महाकवेरपि समयः प्रायस्तथैवेति निर्द्धारणं नायुक्तमिति सन्तो विवेचयन्तु।

महावीरचरितोत्तररामचरितमालतीमाधवाख्यानि त्रीणि दृश्यकाव्यानि कृते महाकवेरस्य नान्यः कोऽपि ग्रन्थोऽस्तीति श्रूयते। तत्रेदं मालतीमाधवं नाम प्रकरणमेव कवेः शेषकाव्यमिति प्रसिद्धिः। परन्त्वस्य प्रस्तावनायां "ये नाम केचिदिह नः प्रथयन्त्यवज्ञां जानन्ति ते किमपि तान् प्रति नैषयत्नः" इत्यादि श्लोकप्रदर्शनेनैतत्पूर्वप्रणीतैतत्काव्यं प्रति जनानामनादरप्रतीतेरपि प्रकरणस्यास्य तत्प्रणीतकाव्यान्तरापेक्षया परावीनत्वमनुमातुं शक्यत इत्यवधेयम्।

इदञ्च मालतीमाधवं नामप्रकरणं वृत्तान्तकल्पनाकौशलेन पदलालित्येन, छन्दःसन्निवेशनैपुण्येन, अलङ्कारवैभवेन, कवित्वमहिम्ना च सहृदयहृदयानामतिमहतीं चमत्कृतिमातनोति। किं बहुना यदि चान्तरान्तरा दुरूहपदसंयोजनदीर्घसमास-सन्धि-

वेशादिदोषोऽत्र नास्यास्यत्तदा प्रकरणेषु सर्व्वोत्कृष्टस्थानमिदमधिकर्त्तुमलमभविष्यत्।

अस्य महाकवेरसामान्यकवित्वं प्रति नास्ति कस्यापि वैमत्यम्। तच्चोल्लिखितदृश्यकाव्यत्रयमेव समर्थयितुं पर्य्याप्तम्। विशेषतस्तु—

"निरवद्यानि पद्यानि यदि नाट्यस्य का क्षतिः।
भिक्षुकक्षाविनिक्षिप्तः किमिक्षुर्नीरसो भवेत्॥"
"श्लिष्टैरनुयातां सद्धृदयहृदयङ्गमं विलुम्पन्तीं।"
मृगमदपरिमललहरीं समीर किं पामरेषु रे क्षिपसि?॥"
"किं चन्द्रमाः प्रत्युपकारलिप्सया करोति गोभिः कुमुदावबोधनम्।
स्वभाव एवोन्नतचेतसां सतां परोपकारव्यसनं हि जीवितम्॥"

इत्यादीनि सुभाषितान्यपि एतन्महाकविविरचितत्वेन प्रसिद्धानि समतीव महतीं कवित्वशक्तिमस्य प्रथयन्तीत्यलमनल्पजल्पितेन॥

मालतीमाधवं

नाम

प्रकरणम् । *

सानन्दं नन्दिहस्ताहतमुरजरवाकृतकौमारवर्हि-
भाषाक्रासाग्रबन्धुं विश्रति फणिपतौ भोगसङ्कोचभाजि ।
गण्डोड्डीनाखिमालासुखरितककुभस्तारुये शूलपाणे-
र्वैनायक्यश्चिरं वो वदनविसृतयः पान्तु चौल्कारवल्यः ॥ (१)

माधवं माधवे मासि प्रबन्धाभीष्टसाधकं ।
मालतीमाधवव्याख्या क्रियते तत्त्वबोधिनी ॥

व्याख्या चास्य च पूर्वसूरिरचिताः प्राचीनरीतिश्रिताः
सन्ति स्तोकतरा न वा नवीनविदुषां चित्तापरीक्षाविधौ ।
श्रेयस्कामकृतर्कमालजटिलाध्याच्च विद्यार्थिना
व्याख्यायन्तु यथोचितं वितरितुं भक्त्या श्रमोऽयं मम: ॥
भवभूतेर्निगूढार्थवचसोऽर्थविदानने ।
किञ्चित् व्याख्यानवा यदि स्यात् सफलः श्रमः ॥

---

* । इदमयत्नसंदृब्धं काव्यं सिद्धिदं, तदाश्रितेतरत्वं दुष्टं, "रूपक" मिति दृश्यकाव्या-
नुदेशे वक्ष्यते ।

तदुक्तं दर्पणे—"दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम् ।

दृश्यं तत्राभिनेयं स्यात् रूपारोपात्तु रूपकम् ॥"

तद्भेदा अपि तत्रैव—

"नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः ।

ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश ॥"

तदत्र दृश्यकाव्यं लौकिकवृत्तत्वात् कविकल्पितत्वात् अनायकनायकत्वाच्च प्रकरणं। प्रकरणलक्षणमुक्तं दर्पणे—

प्रकरणं प्रकरणे वृत्तं लौकिकं कविकल्पितं

अङ्गाङ्गी नायकस्तु विप्रोऽमात्योऽथवा वणिक् ।

धीरशान्तप्रकृतिना नायकेनात्र भाव्यते ।

धीरप्रशान्तनायकः ॥

अलङ्कारशास्त्रज्ञेऽपि—तत्र कविरात्मबुद्ध्या वस्तुवदीरस्य नायकस्येव ।

धीरप्रशान्तमुक्तं तज्ज्ञैर्यं प्रकरणं नाम ॥

दशरूपकेऽपि—अथ प्रकरणे वृत्तमुत्पाद्यं लौकिकाश्रयम् ।

अनायकविप्रकृतिकं कुर्यात्तु नायकम् ॥

धीरप्रशान्तं तत्रापि नायकं तत्परं ।

शेषे नाटकवत् सन्धिसन्ध्यङ्गरसवृत्तिकम् ॥

कुलजादिनायिकाभेदात् प्रकरणस्य वैविध्यमुक्तं दर्पणे—

नायिका कुलजा क्वापि वेश्या क्वापि तथा क्वचित् ।

तेन भेदास्त्रयस्तस्य तत्र मेदमुनीश्वरः ।

किलबद्धुतकारादिर्विटचेटकसङ्कुलः ॥ (१)

(१) अथ वज्रभवानलौल्यवाग्विभूतिर्भवभूतिर्नाम महाकविः, स्वकाव्यनिर्माणस्य यथाद्यनेकश्रेयःसाधनफलकलमाकलयन् मालतीमाधवं नाम रूपकं प्रथितवान्; "तत्र पूर्वं

पूर्वरङ्गः सभापूजा ततः परं। कथनं कविसङ्घादेर्नाटकस्याथवामुखं"मिति साध्यक्रमानुसारेण "यस्मान्नान्दीमुखः पूर्वं रङ्गविघ्नोपशान्तये। कुशीलवा. प्रकुर्वन्ति पूर्वरङ्गः स उच्यते" इत्युक्तलक्षणपूर्वरङ्गस्य प्रथमकर्त्तव्यतया, तत्र च "प्रत्याहारादिकान्यङ्गान्यस्य सूचितानि यद्यपि। तथाप्यवश्यं कर्त्तव्या नान्दी विघ्नोपशान्तये॥" इत्यनेनावश्यकर्त्तव्यतयोपदिष्टा पूर्वरङ्गाङ्गभूता नान्दीं प्रथमं निर्दिशति—सानन्दमित्यादि। यत्पार्श्वे: महादेवस्य साध्वसे मृत्यौ नन्दिनः प्रकृष्टकिङ्करस्य इत्यनेन आहतस्य वाद्यमानस्य मुरजस्य (मुरादेत्यजातौ मुरजः, मुर + अज + क) मदङ्गस्य इवेव ध्वनिना आहतान् कौमारहरिणः कार्त्तिकेयवाहनमयूरात् यत्त्रासो भयं तस्मादिति प्रवेशहेतूक्तिः। भोगस्य फणायाः कायस्य वा ("भोगः सुखे स्त्रादिधनावहेऽपि फणकाययो"रिति विश्वः) सङ्कोचं अपसारणं भजत इति भोगसङ्कोचभाक् तस्मिन्। (विशब्दवैयर्थ्यभीत्या फणादिसङ्कोच. सर्पाणां नैसर्गिको नियम., अन्यथा महाकायस्य सुरन्ध्रं प्रवेशासम्भवात्) फणिपतौ सर्पराजे नागाधिपे, नासाध्वरन्ध्रं, नासिकादविवरं (अर्थाद्विनायकस्य) सानन्दं यथा तथा विशति सति (अत्र रन्ध्र,प्रवेशे भयप्रवेशस्यार्थसिद्धत्वादपदं उक्तिदोषालङ्कारसूचनाय, यथोक्तं दण्डिना—"उक्तिदोषः क्वचिदाक्षेपलभ्यस्य साक्षात् शब्देन कीर्त्तना"दिति।) (झटिति प्रवेशस्य भयनिवारकतया सानन्दमिति विशेषणं तत्र युक्तं। सानन्दमित्यस्य पात्रक्रियाविशेषणत्वेनापि केचिदाचक्षते।) यस्याः कपोलयोः उडुडीनाभिः (उत् + डी + क्त) ऊर्द्धं गताभिः अलिमालाभिः मधुकरपङ्क्तिभिः मुखरिताः मदमत्तीकृताः ककुभो दिशो याभिस्तासां योक्त्राः। चीत्कारः अनुत्कटः मन्दः सहस्यमतृप्तिसहितः विघ्ननाशे चीत्कारविरहात् साहित्यमावहन् मतुपर्थो वाच्यः, तदाह अयेन वदने मुखपद्मेव विघ्ननाशचीत्कारी

१। अनुवाद। महादेवের মৃত্যুকালে নন্দীকর্ত্তৃক বাদ্যমান মৃদঙ্গশব্দে সমাকৃষ্ট কার্ত্তিকেয়বাহন ময়ূরের ভয়ে সর্পরাজ বাসুকি ফণা সঙ্কোচ করিয়া (গণেশের) নাসাবন্ধ্রে সানন্দে প্রবিষ্ট হইলে গণেশ চীৎকার করিয়া যে বদন কম্প করিয়াছিলেন, যে কম্পনফলে অলিকুল গণেশের কপোলদেশ হইতে উড়িয়া দশদিক্ মুখরিত করিয়াছিল, গণেশের সেই বদনকম্প চিরকাল তোমাদিগকে রক্ষা করুক।

कपि व—चूड़ायोड्डकपालमद्भुतगलत्कन्दाकिनीवारयो
विद्युल्लायलसाटलोचनपुटज्योतिर्विभिन्नत्विषः ।
पान्तु स्थाणुकठोरकेतकशिखासन्दिग्धसुग्धेन्दवो
भूतेशस्य भुजङ्गपाशिवलयस्खद्गलजूटा जटाः ॥ (२)

सङ्गृह्णातीति सार्थः) यदा सम्बन्धः, शाकाशाधिकरणकसम्बन्धेन सहितिष्टा यत्पदैः । विनायक-क्षेमा वैनायकः (तद्वेदविदम्) यदनस्य विद्युल्लयसलाटेति गजाननसम्बन्धलाभीति यावत्, शिरं मङ्गलार्थं वो युष्मान् पान्तु रक्षन्तु । विद्युल्लतालोचनतेऽपि हेवसम्बन्धितात् रक्षकत्वं सुपपादितम् । विनायकस्य विघ्नराजत्वात्तस्य रक्षकत्वमपि विघ्नविनायकाधीनत्वायः । अत्र काव्यलिङ्गमलङ्कारः । "हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते" इति दर्पणकरात् । अनुप्रासः सप्तमे, सङ्कीर्णं चन्दोऽनुप्रासः—"सर्वेषां वा सदेच विसुलियंजिपुता सवृत्ता वा सोमिलेयं ।" अत्र च सङ्गतानेन सार्धं भगवत्कुलेहिंसा तुच्छरीकरणेन सौम्यं यदनविद्युतेन सत्यच्च सूचयता मैत्री-चित्रं दर्शितम् ॥ १ ॥

(२) प्रचुरतरमङ्गलमेव प्रचुरतरविघ्नपरिहारकतया विघ्नादिकं प्रकटयन्, पुनर्मङ्गलमाचष्टे—चूड़ायोड्डे त्यादि । चूड़ाया शिरसि (यद्यपि "शिखा चूडा केशपाशः" इत्यमरानुसारेण केशपाश एव चूड़ाशब्दार्थस्तथापि तदाश्रयीभूतं शिर एव लक्ष्यते, चापीडस्य शिरोभूषणत्वात्) य चापीड: शिरोभूषणविशेषः सोऽपि (यद्यपि भवतेत्यादिपदस्य कर्तृभूतायामेकत्वेऽपि अर्थावगतौ सङ्ख्याविशेषस्यानुपादकतया कर्त्रादिपदं सार्वत्रं, तथेवापि "चापीडश्चेखरीभूषा-शिरसि स्रक्" इति कोशानुसारेणैकत्वेऽपि शिरःसम्बन्धस्यापि चूडाशब्दवत्सङ्ख्याविशेषानुपादकतया सार्वत्रिकः) यद्वा खपदैः सप्तभिरुल्लिखितैः (शिवसप्तकसम्बन्धाः सम्बन्धविशेषात् जटादिषु सम्बन्धविशेषत्वं) सङ्कीर्णं व्याप्तं सवत् सवत् मन्दाकिन्या अर्थात् हरशिरःस्थिताया गङ्गाया वारि जलं यासु तासामोघाः । विद्युल्लायं स्फुरितिभं

অপিচ—যচ্ছালীযিঞ্জলিপ্তঃ ক্বথ ধ্রুব তড়িতাং যস্য ছত্রঃ সমূহো
যস্মিন্ ব্রহ্মাণ্ডমৌঘদ্বিঘটিতমুকুলে কালযজ্বা শুদ্ধাব।
অর্চির্নিষ্টপ্তচূড়াগ্নিগলিতসুধাসারমঙ্গারিকোষম্
স্রাক্তীযীকং পুরারেস্তদবতু মদনশ্লোষণং লোচনং বঃ॥ (২)

যচ্ছন্দাটলীচনপুটং লাজন্যাচিঃসম্পুটং তস্য জ্যোতিষা তেজসা বিমিশ্রা রাজন্যাদিত্যৈবেত্থং মিলিত্বা লিট্ প্রভা যাস্তা তা (পুটমধ্যস্থস্য সমস্তনেত্রসাধ্যস্য তেজোময়ত্বদ্যোতনার্থমেব পুটপদং) অকঠোরয়া কোমলয়া কৈতকশিখয়া কেতকীকুসুমাগ্রেণ সহ সন্দিগ্ধ. সংমিলিতঃ "কিমিয়ং কৈতকশিখা চন্দ্রলেখা বা" ইত্যেবং সংশয়বিষয় ইতি যাবৎ। সুন্দরী মনোরম· ইন্দুযন্দ্রী যাসু তাঃ। তথা সুজন্যাঃ সর্পা এব বল্ল্যো লতাস্তা এব বন্ধনা মণ্ডলাকারেণ স্থিতাঃ জন্যঃ তাভির্নদ্ধো বদ্ধঃ জুটঃ সমূহো যাসাং তাদৃশীনাং ভূতেশস্য শিবস্য জটাঃ স্রাং পাতু রক্ষতু। অত্রেদন্তাসা জটানা রক্ষকত্বমপি পূর্ববদ্বেদনাসম্বন্ধিত্বাৎ।

অত্র কৈতকশিখাদিনা উপমানোপমেয়য়োঃ সংশয়প্রদর্শনাৎ "সন্দেহঃ" মুজঙ্গাদৌ বল্ল্যা-রোপাৎ "রূপক" দুহ্কার্যাদিবর্ণনাৎ "সমাখ্যোক্তি" র্যপদ্বারা, তেষাং লক্ষণানি চ দর্শযিষ্যন্তানি যথা—"সন্দেহঃ প্রকৃতেঽন্যস্য সংশয়ঃ প্রতিভোত্থিতঃ।" "রূপকং রূপিতারোপাদ্বিষয়ে

২। সেই জটাতে মস্তকস্থিত বঙ্কিমমালার কপালব্যাপ্ত মন্দাকিনীর জল বিগলিত হইতেছে, সেই জটার দীপ্তি বিদ্যুৎসদৃশ ললাটলোচনের জ্যোতিঃধারা বিমিশ্রিত, সেই জটাতে কোমল কেতকীশিখাগ্রের সহিত সন্দিগ্ধ মনোরম চন্দ্র বিরাজমান, সেই জটার সমূহ সর্পরূপ যে লতা সেই লতারূপ মণ্ডলাকারাবস্থিত মালাদ্বারা বদ্ধ, মহাদেবের সেই জটা তোমাদিগকে রক্ষা করুক।

निरपत्रपे"। "स्वभावोक्तिर्दृष्टक्रीवैचक्रियाकृपवर्णनम्"। आर्द्रसविक्रीडिते छन्दसि, "दृश्यानेमेसजलता: सगुरव: आर्द्रसविक्रीडिते"मिति लक्षणात्।

यदप्यत्र दुर्वारस्य लटाजूटाबद्धतस्य प्रलयाकालायनीतेर्दीप्तोल्का: करालायका: सूचिता:, लटा इति कपर्दबद्धतेन नायकनायिकाबद्धत्वं, भूतैश्चतेभ्योऽपसर्जनेन लटा इति स्वातन्त्र्येण च नायकस्य स्वकार्यनिर्वाहे योग्यत्वं, कामन्दकादितपस्विनीजनस्य तत्कार्यनिर्वाहोद्योगित्वस्य सूचितमिति केचिदाचक्षिरे। केचित्र "दारादिक्रियसुन्दरामुखमय"इति निरर्गलस्त्री वस्तुमात्रत्वादेतस्यां स्त्रीकाव्यां लक्षणसमन्वयप्रारम्भ: सूचित इत्युपिरे। तथाहि—सुरतप्रधानेन वर्णितसम्भ:, कौलाचक्रौन्मत्तेन सम्पूरुष:, सुखदुःखतया तिरोहितरूपत्वात् कपिरस्यापि लटाजूटस्य स्वातन्त्र्यप्रतिपादनेन नीचोदय:, एवं सर्वविकरश्च, शवशवलनलनेन वर्णश्च, कपालमालया मालाकावलि:, खट्वाटनेनविधा विधुद्योतश्च, केतकदिसीत्यनेन केतकोद्दामश्च इति। एवं मदनोद्दीपनघनसमयसूचनेन मङ्गलादरसमाविर्भावस्य मङ्गलस्य कटाचिंतस्यापि केचिदाचक्षते। तेषामितादृशमूलानवलक्षणं अलयालयहसेन सहृदयहृदयानन्दास्वादकतया क्रीडयन्, सर्वसाधकमिति स एव जानाति।

(१) यद्यपि प्राचीनव्याख्याकृद्भिरव्याख्यानतया "पक्षाली"त्यादि श्लोक: प्रक्षिप्त इति प्रतिभाति, तथापि बहुपुस्तकेषु दृष्टत्वेन सम्प्रतिपन्ना व्याख्यायते। यत्र श्लोकस्य पक्षालीपिञ्जलिप्त: शीतरश्मिपिञ्जलताया: समूहो लक्षिता विद्युता इव शबला: शबल: यत्र एव शबलविद्युल्लुलिताम्र इति व्याख्यम्। तथा काल: सम्पूरुष एव यस्या याजका: कालरूपी याजक ऋत्विज:, यस्मिन् लोचने (आहवनीयस्थानीये) दैवहविर्घटिनमुकुले किञ्चिदुन्मीलिते सति ब्रह्माण्डं जगत् जुहुवे हुतवान्। अग्निभि: स्फुलिङ्गै. निकर: सातिशयं सञ्जात. य. चूडामणी भालकलानिधि.

७। যেই লোচনের রোমরাজির শিঞ্জলতাসমূহ সমস্ত বিদ্যুৎস্ফুলিঙ্গপ্রায়, যেই লোচন কিঞ্চিদ্মীলিত হইলে কালরূপ যাজক তাহাতে ব্রহ্মাণ্ড আহুতি দিয়াছিলেন, যেই লোচনের অপাঙ্গদেশ স্ফুলিঙ্গসকল কপালস্থিত চন্দ্র হইতে ক্ষরিত অমৃতপ্রবাহধারা শবায়মান, সর্বজগদ্রাবক মহাদেবের সেই তৃতীয় লোচন তোমাদিগকে রক্ষা করুক।

[नान्द्यन्ते सूत्रधारः । (४)]

अलमतिविस्तरेण (५) । [पुरतोऽवलोक्य]

सकाहभालगन्धितेन चरितेन सुधासारेण चन्दनप्रवाहेण च कर्पूरी ग्रन्थायमानः कोपः कपालदेवी यस्य तस्योक्तं, मदनशोचिषं मरदाहक पुरारेर्महादेवस्य तार्तीयीकं (तृतीयशब्दात् स्वार्थे ठक्) तृतीयं लोचनं कपालस्थितनेत्रमिति यावत्, वो युष्मान् भवतु रक्षतु। अत्र लोकातिशयसम्पत्तिवर्णनेनोदात्तालङ्कार "लोकातिशयसम्पत्तिवर्णनोदात्तमुच्यते। यद्यपि प्रस्तुतस्यात्र महताश्चरित्र अर्थे" इति दर्पणलक्षणात्। वसन्ततिलकम्, तल्लक्षणमुक्तमेव।

क्वचित् पुस्तके अयमपरोऽपि नान्दीश्लोको दृश्यते—

"दक्षमखेषु संगलत्कबलकलम्बावलंबनव्याकुला
नासालोचनकर्णकुब्जकुहरेष्वुद्यदगदध्वानिनः।
गरुडस्याभिघातशीर्णकविकाया कालवलूनेयः
शम्भोर्वेत्रकपालकन्दरपरिस्यन्दोत्तराः पान्तु वः॥"

अस्यार्थः—ब्रह्मणः विधेः यः कपालकन्दरः करोटिः शिरोस्थिमयः ब्रह्मणः पात्रविशेष इति यावत्, तत्परिस्यन्दोत्तरात्तत्परिस्रवनव्याकुलाः, दक्षमखेषु तत्करोटिस्थितदक्षपशुचित्यर्थः, संगलन्त्यः चरन्त्यः यत एव कबलकलसहितेन व्यावर्तनेन परिभ्रमणेन व्याकुलाः नासालोचनकुब्जकुहरेषु नासादिसुषिरप्रदेशेषु सदगदमदध्वानिनः मुदवदाकारशब्दवत्यः गरुडस्याभिघातशीर्णाः विदीर्णाः कविका यासां ताः, शम्भोः शिवस्य चूडावत्कुलेयः शिरोमालातरङ्गः वो युष्मान् पान्तु रक्षन्तु। वसन्ततिलकम्।

(४) आशीर्वादादिसूचकं नाटकाद्यं पद्यं नान्दी, तल्लक्षणमुक्तं दर्पणे—

"आशीर्वचनसंयुक्ता स्तुतिर्देवात् प्रयुज्यते।
देवद्विजनृपादीनां तस्मान्नन्दीति संज्ञिता॥

सङ्ख्यासङ्ख्यचन्द्रामशोकैरवलिनी।
पदेर्युक्ता छादशभिरष्टाभिर्वा पदैरत ॥" इति।

अत्र षट्सप्तभ्यां केचिदिमामाद्यामाचक्षते, केचित्तु षष्ठसप्तमाभ्यामपरे। तदिदं द्वितीयचतुर्थयोरेव पद्ययोर्नान्दीत्वं, तृतीयश्लोकस्य समुच्चयश्लोके तु श्लोकत्रयेण छादशपदा नान्दी। वस्तुतस्तु विधिपादिश्लोकत्रयेऽपि समुच्चयश्लोके षडभिरामाभ्युदयस एव कविरभिधत्ते। पद्मानिधयोऽपि—"आशीर्नमस्क्रियावस्तु श्लोकः काव्यमुखोदितः। नान्दीति कथ्यते तस्मात् षडादिर्यदि वा त्रिधा" इत्यत्र "यदि वा" इत्यनेन सूचितम्। अत एव "या सृष्टिः स्रष्टुराद्या" इत्यादि यज्ञकलादिनान्दीषु पद्यत्रितयं दृश्यते। "सन्दिग्धसुखं एव" इत्यनेन च नान्दीयं चन्द्रलाञ्छिता, चन्द्रलाञ्छितत्वाच्च प्रथमापि योज्या—"चन्द्रलाञ्छिता आर्या दशमात्र यती निधि"। प्रीतिं चन्द्रमसि स्फीतां रसयोरिति वानुजः" ॥ नन्दयतीति नन्दः, पचाद्यच्, नन्द एव नान्दी प्रज्ञादित्वादण्, तत्प्रियत्वात्प्रयोगस्यापि नान्दीति पदं सिध्यति। नाट्यशास्त्रे—नान्दीपाठानन्तरं स्थपतिः, सूत्रधारः "नाट्यस्य वस्तुसर्वस्वं तत्पूर्वं स्यात् ततोऽङ्गकं। रङ्गदैवतपूजाढ्यं सूत्रधार उदीरितं" इति भरतोक्तसूत्रयोगो नटविधेयः। आदिशब्दात् क्रियाध्याहारेष्वाप्तवः। ननु नाट्यान्ते सूत्रधार इत्युक्तं "नान्दीं प्रयुज्य निष्क्रामेत् सूत्रधारः सहानुगः। व्यापकः प्रविशेत् पश्चात् सूत्रधारगृहाङ्गनां ॥ पूर्वरङ्गविधावादौ सूत्रधारो विधीयते। प्रविश्य सकलपरः काव्यमारभापयेत्ततः ॥ इति भरतानुशासनेन सूत्रधारगृहाङ्गनिनटानामेव काव्यारम्भः स्थापनीयत्वादिति चेदत्र केचित् सूत्रधार इति सूत्रधारसाम्यात् व्यापके प्रयोग इत्याहुः। केचित्तु नाट्यान्ते व्यापक इत्येव पठन्ति। वस्तुतस्तु "प्रस्तावनादिसर्वाङ्गसंपूर्वरङ्गप्रयोगस्थलाभिप्रायेणैव नान्दीं प्रयुञ्जे"-इत्यादि प्रागुक्तभरतानुशासनमिति युक्तमुत्पश्यामः। अत एव दर्पणकृतापि "पूर्वरङ्ग विधायैव सूत्रधारो निवर्तते। प्रविश्य व्यापकरसवत् काव्यमारभापयेत्ततः" ॥ इत्यस्य व्याख्यानावसरे इदानीं पूर्वरङ्गस्य सम्यक्प्रयोगाभावादेक एव सूत्रधारः सर्वं प्रयोजयतीति व्यवहारः, इत्यलमिदानीम्। ७

(५) अतिविस्तरेण नान्दीश्लोकपाठादेर्भीरुस्त्वेन वयं स्मः, अन्यथा नवनाटकविलोकनीत्कण्ठा परिषदो रसनिष्पत्तेश्च क्षणेऽस्मिन्नत्र.।

अये! उदितभूयिष्ठ एष भगवानशेषभुवनद्वीपदीपकल्पनकल्पमुपतिष्ठे (६)। [प्रणम्य]।

कल्याणानां त्वमसि महसां भाजनं विश्वमूर्त्ते!
धुर्य्यां लक्ष्मीमय मयि दृशं धेहि देव! प्रसीद।
यद्यत्पापं प्रतिजहि जगन्नाथ! नम्रस्य तन्मे
भद्रं भद्रं वितर भगवन्! भूयसे मङ्गलाय॥ (७)

---

(६) "ततः श्लोक षटेरिक गभीरमधुरसङ्कुलम्। ईषदोज प्रदीप्तञ्च यत्र भूमा प्रवर्त्तते॥" इति भरतानुशासनानुसारेण माङ्गलिकतया रङ्गद्वारपार्श्वस्थ श्रीलक्ष्मीवतरणिकाकुलापयति—अये इत्यादिना। "अये" इति सम्बुद्धयर्थो निपातः। उदितभूयिष्ठ बहुलं यस्य सः, किञ्चिदूनपूर्णोदय इत्यर्थः। "नेषेदादिषमुद्यन्त" मिति निषेधादुदितभूयिष्ठम् इत्युक्तम्। अशेषाणां भुवनद्वीपानां दीपकः प्रकाशकः, भगवान् षड्ऐश्वर्ययुक्तो, तपनः सूर्यः, स सूर्यं उपतिष्ठे आराधयामि, यद्यप्यनाद्यीक्तेनेति शेषः। "पर्य्याराधनयोर्यै" त्याम्रेडनेपदम्।

(७) आराधनश्लोकमाह—कल्याणानामिति। हे विश्वमूर्त्ते! सर्वात्मक! "मूर्त्तं आत्मा शरीरमूर्त्तयोरि"ति मेदिनिः। त्वं कल्याणानां माङ्गलिकानां महसां तेजसां भाजनं पात्रमसि। हे देव! (द्योतत इति देवः पचाद्यच्) त्वमित्यनुषङ्गो लभ्यः। "एकवाक्यतयदार्थस्यान्यशब्दार्थैरनुषङ्गः।" मयि सन्निधौ धुर्य्यां मत्प्रधुरत्वेन लक्ष्यां मत्प्रतिष्ठ, अधाधशब्दः समुच्चयार्थः, दृशं कृपियवेन धेहि प्रतिपादय। प्रसीद प्रसन्नो भव। हे जगन्नाथ! भुवनस्वामिन्! नम्रस्य मे यद्यत् पाप (मशौचमिति शेषः) तत् प्रतिजहि निवर्त्तय। अत्र यद्यदिति वीप्सया कायिकवाचनिकादिप्रकारकत्वं लभ्यं अभिप्रेतम्, अत एव तच्छब्दे वीप्सा न लभ्या, वीप्सितस्यैव प्रकृतपरामर्शिना तच्छब्देन परामर्शाद्विशेषतस्तच्छब्दापेक्षाविरहात्। हे भगवन्! भूयसे प्रभूताय मङ्गलाय क्षेमाय (तादर्थ्ये चतुर्थी) भद्रं भद्रं अशेषं वितर देहि। अत्र प्रतिप्रदीपनाद्य सूर्यस्याराधनेन प्रकरणप्राप्तस्य प्राप्तस्य सूचितम्। यद्यदिति वीप्सया वीर्यवत्त्वाद्दुःस्वप्नादिकृतोपद्रव-दूरीकरणं पापनाशानन्तरं भद्रं भद्रमित्यनेन

६। सूत्र। नान्दीपाठादिव बाहुल्ये प्रयोजन यस्य। अये! सम्प्रति भुवन-दीपের প্রকাশক ভগবান্ সূর্য্যদেব প্রায় সম্পূর্ণরূপেই উদিত হইয়াছেন, তাঁহার আরাধনা করি (প্রণাম করিয়া।)

৭। হে বিশ্বমূর্ত্তে! তুমিই মঙ্গলজনক তেজের আধার। হে দেব! তুমি

[नेपथ्यो-(८) भिमुखमवलोक्य] मारिष! (९) सुविहितानि रङ्गमङ्गलानि, (१०) सन्निपतितस्य भगवतः कालप्रियनाथस्य, यात्राप्रसङ्गेन नानादिगन्तवास्तव्यो महाजनसमाजः (११)। आदिष्टास्मि विदूषकजनपरिषदा, यथा, केनचिदपूर्वप्रकरणेन सर्वं विनोदयितव्या इति। तत्किमित्युदासते (१२) भरताः।

मालतीमाधवनिकाभाषाटीकायां सङ्गतायां, सुखमे मङ्गलाचरणेन च कपालकुण्डलाश्रीतसाधनी विघटिकारादिकं कथितम्। सन्दाकाक्षाकर,—"सन्दाकाक्ष्यधिः सन्देहेतिमती सौ यदुक्त"मिति लक्षणात्।

(८) नेपथ्यो नाम रङ्गस्थानस्य पश्चाद्भवनिकान्तरितो वेशस्थानादिव्यवहितदेशः, "कुशीलवकुटुम्बस्य स्थानं नेपथ्य मेवत" इत्मरः।

(९) मारिष इति सदृशस्य सम्बोधनम्। "सूतो भवेत आरेति मेनायां मारिषेति च" इति मेदिनात्। "मान्यो भावेति वक्तव्ये किंचिन्न्यूनस्तु मारिष" इत्मरः।

(१०) सुविहितानि साधुसम्पादितानि, रङ्गो नृत्य सम्बन्धीनि तत्सम्बन्धिनिर्वाहकानि लोकयात्रानुकूलानीति। ("सङ्गो सूपे रथचित्रा"दिति विश्व)।

(११) कालप्रियनाथस्य सङ्केश्वरदेवविशेषस्य, यात्रा उत्सवस्तस्य प्रसङ्गः तेन (अनेन मृत्यकालसूचनम्) नानादिगन्तवास्तव्यः नानादेशनिवासी, अनेन च सर्वजनाभिमतत्व मविषयी दर्शयति, विदूषकपरिषत्सन्निधावेव प्रथोत्तकौशल्यप्रदर्शनोत्कण्ठया अभाषिष्टत्वात्। (मालत्य इति षष्ठी कर्तरि तस्यां दीर्घश्च दर्शितवान्) महाजनसमाजो विदूषकोष्टो, आदिष्टवानस्मि उपदिशत.।

(१२) उदासते उदासीनास्तिष्ठन्ति। भरताः तन्नाम्नार्थे तार्यां सदा।

আমাকে বিশেষরূপে চূড়াসম্পাদক লক্ষ্মী ও সম্পত্তি দান কর, তুমি প্রসন্ন হও। হে জগন্নাথ! নটজনোচিত আমার যে যে পাপ থাকে, তুমি সেই সেই পাপ বিনাশ কর। হে ভগবন্! প্রকৃত মঙ্গলের জন্য তুমি নির্দোষ অভীষ্ট বিতরণ কর।

৮-১২। (নেপথ্যের দিকে অবলোকন করিয়া) মারিষ! রঙ্গের মঙ্গলজনক কার্যসকল সম্পাদিত হইয়াছে। ভগবান কালপ্রিয়নাথের যাত্রাপ্রসঙ্গে নানাদেশবাসী মহাজনগণ উপস্থিত হইয়াছেন, আমিও বিদূষকগণ কর্তৃক আদিষ্ট হইয়াছি,

[प्रविश्य पारिपार्श्विकः (१३)] भाव ! (१४) परिषन्निर्दिष्ट-गुणं प्रबन्धं नाधिगच्छामः ।

सूत्र । भारिष ! कतमे ते गुणास्तत्र यानुदाहरन्तार्या विदग्धा मिश्रा भगवन्तो भूमिदेवाश्च (१५) ।

नटः ।—

भूम्ना रसानां गहनाः प्रयोगाः सौहार्दहृद्यानि विचेष्टितानि ।
औदित्यमायोजितकामसत्त्वं चित्रा कथा वाचि विदग्धता च ॥ (१६)

---

(१३) पारिपार्श्विकलक्षणं यथा भरते—"सूत्रधारस्य पार्श्वे यः प्रबन्धं कुशलेक्षणम् । काव्यार्थसूचनायासौ, स भवेत् पारिपार्श्विकः ॥"

(१४) भाव इति सूत्रधारस्य सम्बोधनम्, यत्र पूर्वोक्तप्रकारादसादृशेन सूत्रधारो नटेन सार्धमेव वाक्यम् । परिषदा ये सकलेन निर्दिष्टा गुणा यत्र स, प्रबन्धः प्रकरणम् ।

(१५) "गीत वाद्य च नृत्यं च त्रयं सङ्गीतमुच्यते । पूजावाक्यमर्थं प्रयोगाद्" इति भरतानुशासनात् पूजावाक्यमर्थं प्रश्नयति—कतम इति । कतमे किंरूपा., भारादयाता दूर गता यास्तादृशीर्येषु इत्यार्या, "कृत्स्नं शौचं दया दानं धर्मः सत्यं क्षमा तथा । यद्दोष इति येषु तत्तानार्यान् सम्प्रचक्षते ॥" इत्येवं लक्षणाः । विदग्धाः चतुःषष्टिकलाविदः, पण्डिता., मिश्राः पूज्याः, भगवन्तः सर्वैश्वर्यशालिनः, भूमिदेवा ब्राह्मणाः । समासानन्तर्ये सत्यपि भूमिदेवा इति कथनं तत्प्रधानत्वादनुपदवक्ष्यमाणत्वाच्च तदधीनत्वात् दैवतात्मकत्वेन तेषामाराधनीयत्वाच्चेति मन्तव्यम् ।

(१६) प्रबन्धं लक्षयति दर्शयति—भूम्नेति । रसानां चतुर्दशानामेव स्थितानां अनुरागादीनां भूम्ना प्राचुर्येण गहनाः गम्भीरा सूक्ष्मदर्शिनामवगम्या इति यावत् । प्रयोगाः अभिनयाः, अनेन दृश्यैकप्रवणत्वं प्रबन्धस्य दर्शितम् । तथा सौहार्देन विदग्धाधिकर्मणा हृद्यानि मनोज्ञानि विचेष्टितानि नायकनायिकयोर्व्यापारविशेषाः, अनेन धीरप्रशान्तनायकोपेतत्वं दर्शितम् ।

যে "কোনও অপূর্ব প্রকরণের অভিনয়দ্বারা আমাদের আনন্দ-সম্পাদন কর।" সুতরাং নটগণ উদাসীন কেন ?

১৩-১৪। পারিপার্শ্বিক। (প্রবেশ করিয়া) ভাব! পরিষৎকর্তৃক যে সমস্ত গুণ নির্দিষ্ট হইয়াছে, তাদৃশ গুণসম্পন্ন প্রকরণ দেখিতেছি না।

১৫। সূত্র। মারিষ! কুশলীলাদিসম্পন্ন সমস্ত শাস্ত্রাভিজ্ঞ পূজ্য ঐশ্বর্যশালী ব্রাহ্মণগণ কি কি গুণের নির্দেশ করিয়াছেন ?

সূত্র। স্মৃতং সর্ব্বং। (১৩)

নটঃ। ভাব! কিমিব? (১৪)।

সূত্র। অস্তি দক্ষিণাপথে বিদর্ভেষু পদ্মপুরং নাম নগরম্। তত্র কৈচিত্তৈত্তিরীয়িণঃ কাশ্যপাশ্বরণগুরবঃ ষড়ঙ্গিবিদো ঋক্সামযোঃ কৃতব্রতাঃ সোমযাজিনো ভূরিবসবো নামানো ব্রাহ্মণা ব্রহ্মবাদিনঃ প্রতিবসন্তি স্ম। (১৫)

তথা আত্রেয়িণা চরিতং কামন্দক্যা অনুরাগস্য মূলং (অর্থোপক্ষেপকানাম্নিকয়োঃ) যেন নায়কস্য ঔদার্যং নায়িকায়াশ্চাতুরীসম্বন্ধিনীনাং গুণসমাহারো, তথা বিদূষকস্য বাগ্বৈদগ্ধ্যনিধানা কথা, তথা বাচি বচসি বিদগ্ধতা নেতুব্যম্। তদেতদি যত্র প্রবন্ধে ভবতি, তাদৃশং নাম্নঃ প্রবর্তয়িতুমাদিষ্টবতি ভূমিদেবা ইতি শেষঃ। "আদিষ্টবতা যদি সা ভবতী স্যাৎ" ইতি সূত্রধারবাক্যং যদ্ভবত্যাত্মম্।

(১৩) কি স্মরসি ভাব।

(১৪) "অয়মি রাজধানীয়ং যাবদ্ জীর্ণোদ্যানেশ্বরী। তাবদ্ বিজ্ঞাপকস্যাস্যা সুকৃতং কে দুষয়ন্তি" ইতি নাগানন্দস্থস্য মকরন্দাদিত্যস্য, পরিজনমাদাহ—বয়স্যেতাদিনা। দক্ষিণস্যাস্য প্রকারস্য বয়সাবস্থাপরিচ্ছিন্নং দৃঢ়বিশ্বাসস্য হৃদয়েন প্রকারস্যেশ্বরস্যাপি বয়সাবস্থাপরিচ্ছিন্নতাবিরহাদিনা। বিদূষকেণাপি বৈদগ্ধ্যী নীতি, প্রত্যাদিনা। পদ্মপুরং নাম পদ্মপুরমিতি প্রসিদ্ধং নাম্না পদ্মপুরমিতি বা, অমিদ্রাবংকরতীরায়া ভীপাৎ। তৈত্তিরীয়নামকশাখাবিশেষাধ্যায়িনঃ, কাশ্যপাঃ কাশ্যপগোত্রাঃ., ঋগ্বেদসামবেদাঃ বাক্যাত্মিকেষাধ্যে প্রত্যক্ষমনুষ্ঠে বর্ত্তন্তে, তদ্গুরবঃ, তদধ্যাপয়িতারঃ,

---

১৩। নট। যে প্রকরণে শৃঙ্গারাদিরসের চাতুর্য্যদ্বারা অভিনয় অতি ভাবগম্ভীর হয়, অকপট স্নেহদ্বারা নায়কনায়িকার ব্যবহার অতি মনোরম হয়, যাহাতে নায়কনায়িকা-সখী-দূত্যাদির গুণমাহাত্ম্য অনুরাগবর্দ্ধক হয় এবং হর্ষজনক কথা ও বাক্যে পাণ্ডিত্য থাকে, এরূপ প্রকরণ অভিনয় করিবার জন্য ব্রাহ্মণগণ আদেশ করিয়াছেন।

১৪। সূত্র। তবে আমার স্মরণ হইয়াছে।

১৫। নট। ভাব! কি স্মরণ হইয়াছে।

১৬। সূত্র। দক্ষিণাপথে বিদর্ভদেশে পদ্মপুরনামে এক নগর আছে, সেই নগরে তৈত্তিরীয়শাখাধ্যায়ী কাশ্যপগোত্র বেদাধ্যায়ীদিগের গুরু অঙ্গভোগী

तौ श्रोत्रियान्तस्तुविनिसर्गाय भूरि श्रुतं याजतमाद्रियेते ।
इष्टाय पूर्त्ताय च कर्म्मणेऽर्थान् दारानपत्याय. तपोऽर्थमायुः ॥(२०)

तदामुष्यायणस्य तत्रभवतः सुरुचातनाम्नो भट्टगोपालस्य पौत्रः पवित्रकीर्त्तेर्नीलकण्ठस्याङ्गसम्भवो भट्टश्रीकण्ठपदलाञ्छनो, भवभूति-

---

पंक्तिपावनाः पक्षौ भोजनादिसभायां पावना. पवित्रा. ऋत्भोजिन इति यावत्। पंक्ति-पावनत्वकथनञ्च, यथा—"यज्ञवो पारगो ह्यत्र सर्वो यद्यपि पापकृत्। ऋक्सामिरसोऽर्च्यो सा ब्राह्मणः पंक्तिपावनः ॥" इति। पवायवः पवित्रमाहरणीयसभावसथकर्माग्निपवन-परिचरणशीलाः आहिताग्नय इति यावत्। इतव्रताः चान्द्रायणादिव्रतपरायणाः उत्तर-नामानः उत्तरं प्रसिद्धं ("प्रसिद्धौ उत्तर विदु"रिति विश्वः) नाम येषां ते तथोक्ताः, ब्रह्मवादिनः वेदविदः।

(२०) तेषां सर्वगुणसम्पन्नत्वं वर्णयति—तं इत्यादिना। ("श्रोत्रियश्छन्दोऽधीते" इति निपातनात् साधुः) 'जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते। विद्यया याति विप्रत्वं त्रिभिः श्रोत्रिय उच्यते ॥' इति स्मरणात् ते पूर्वोक्ता ब्राह्मणाः, तत्रत्य पारमार्थिक-ब्रह्मस्वरूपस्य विनिश्चयाय विशेषतो निर्द्धारणाय न तु प्रतिवादिगर्वादिनिराकरणेन यशो-लाभाय, भूरि प्रचुरं याजतं यागसम्बन्धिनं श्रुतं वेदाध्ययनं आद्रियन्ते बहुमन्यन्ते। तथा इष्टाय-कर्म्मणे यागादिक्रियार्थं पूर्त्ताय कर्म्मणे खातादिक्रियार्थाय न तु भोगाय धर्मान् धनानि आद्रियन्ते यागादीनामर्थसाध्यत्वादिति भावः। एवं अपत्याय सन्तत्यर्थं न तु सम्भ्रम ख्यापयितुम्, दारान् भार्य्या आद्रियन्ते, तथा तपोऽर्थं तपस्यार्थं न तु व्यसनार्थं आयुः जीवनं आद्रियन्ते। सर्वत्र तादर्थ्ये चतुर्थी। अत्र यशोलाभादीनामर्थत्वे निराकरणात् "परिसंख्या"-सञ्चारः "प्रधानयत्नो यापि स्यादितरत्रापि तादृशः। तादृशस्यन्दोऽर्थे स्याद्-यार्थोऽथवा तदा ॥ परिसंख्ये"ति दर्पणवचनात्। इदमवधातव्यम् ॥

সাধিক চান্দ্রায়ণাদিব্রতাচারী সোমপায়ী প্রসিদ্ধনামা বেদপারগ ব্রাহ্মণগণ বাস করিতেন।

২০। সেই শ্রোত্রিয় ব্রাহ্মণগণ কেবল তত্ত্বনিশ্চয়ের জন্যই সার্ব্বকালিক প্রচুর বেদাধ্যয়ন করিতেন (যশোলাভাদির জন্য নহে), যজ্ঞ ও ঔর্দ্ধিক খননাদির জন্যই অর্থ সংগ্রহ করিতেন (ভোগের জন্য নহে) কেবল সন্তানের জন্যই দার-পরিগ্রহ করিতেন (ইন্দ্রিয়বৃত্তিচরিতার্থতার জন্য নহে), এবং তপস্যার জন্যই দীর্ঘজীবন প্রার্থনা করিতেন। (ব্যসনের জন্য নহে)।

नाम्ना जातुकर्णीपुत्रः, कविर्निसर्गसौहृदेन भवतेषु स्वकृतिविवेचनाय-गुणभूयस्त्वसम्भावनमर्पितवान्, यत्र खल्वियं वाचो युक्तिः। (२१)

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्ति ते किमपि तान् प्रति नैष यत्नः।

---

(२१) तदानुष्ठानस्य वस्तुव्यवहारायत्वम् विप्रलेभानत्व, सुयशोनामा; -सुयशोनं सुजनजनीकारश्च नाम यस्य तथाभूतस्य सतादिवत् पुण्यश्लोककीर्तिति यावत्, भट्टगोपाल नाम्ना, गोपालो नामा, तस्य पौत्र, पवित्रा कीर्तिर्यस्य तस्य पवित्रकीर्तेः नीलकण्ठस्य तन्नामकस्य आत्मजस्य पुत्र, श्री सरस्वती "श्रीर्विस्तरशोभा श्रीरती सरस्वतु" इति मेदिनी। कण्ठे यस्य स नीलकण्ठ तदाख्यक पदं लात्वन विप्र यस्य स नीलकण्ठोपाधिक इत्यर्थः, यद्वा नीलकण्ठ इवापि तस्य नामान्तर, अम्बप्रसिद्धया अम्बप्रसिरिति प्रसिद्ध, जातुकर्णीपुत्रो जातुकर्णी, तस्या पुत्र, भवतेषु भट्टेषु निसर्गसौहृदेन साहजिकसौहार्देन। (तस्मा पूर्वस्मो विधिवनिव इति वक्ष्यमाण सौहृदेनेत्यत्र नोभयपदसङ्गति) एवम्भूतगुणभूयस्त्वं "भूमा रसाना"मित्यादिलक्षणोक्तबहुत्वं स्वकृति स्वप्रबन्धं तस्मात् अर्पितवान् समर्पितवान् प्रत्यायितवन्तिश्चयेनाक्ष ग्राहे समर्पितवानिवेति। अथ प्रश्नः, कस्तु प्रसिद्धे वाक्यालङ्कारे वा, एव अनलङ्कारीकृतपरिणामा वाची युक्तिर्भवतामति.।

(२२) निजवचनरचनायाश्चुर्यञ्च लक्षयन् प्रति साहङ्कारपरिहारं अन्यान् प्रति च साक्षेपमाह—ये नामेति। नाम प्रसिद्धौ, ये केचित् प्रसिद्धा पारम्पर्यिकतत्तद्गुणगणः नीलकण्ठ इह प्रबन्धे अवज्ञा अवधीरणा प्रथयन्ति तदधीवयन्ति, ते किमपि अनिर्वचनीयं ब्रह्म जानन्ति, तान् प्रति तान् उद्दिश्य एव यत्नकरणीयत्वरूप यत्नो न, विदग्धसभिलसल्लालिसाक्षारसमारं-

---

२१। प्रसिद्ध ग्रेष्ट कुलोत्पन्न पूज्य विद्वान्नामा ভট্ট গোপালের পৌত্র, পবিত্রকীর্তি নীলকণ্ঠ ও জাতুকর্ণীর পুত্র, শ্রীকণ্ঠোপাধিক (অথবা শ্রীকণ্ঠনামা) প্রসিদ্ধ কবি ভবভূতি স্বতঃসিদ্ধের প্রতি সৌহার্দ্দবশতঃ পূর্ব্বোক্তগুণসম্পন্ন স্বকৃত প্রকরণ (সভায় অভিনয় করিবার জন্য) আপনাদিগকে অর্পণ করিয়াছেন। যেই প্রকরণে এবম্বিধ বাক্যের যুক্তি আছে।

২২। যে সমস্ত মহাত্মগণ আমার এই প্রকরণে অবজ্ঞা-প্রদর্শন করিবেন, তাঁহারা অনির্ব্বচনীয় ব্রহ্ম বুঝুন্‌গে, সুতরাং তাঁহাদের জন্য আমার এই উদ্যম নহে, অথবা যে সমস্ত অজ্ঞ লোক আমার এই প্রকরণে অবজ্ঞা প্রদর্শন করিবেন,

उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्मा,
कालो ह्ययं निरवधिर्विपुला च पृथ्वी ॥ (२२) *

वासनापहाना काव्यरसास्वादनपराङ्मुखमानसाना तेषा कस्यैकमूले प्रकरणे पुरोवाक्-धीरयेति विनयोक्तिः। यद्वा नाम सम्भावनायां, केचिदज्ञा अवज्ञा व्यापन्नन्ति, ते किमपि अवश्य जानन्ति, अहो किमाश्चर्यं, अधिगच्छो भिन्नक्रमं, तथाहि ते कि जानन्ति ? न किञ्चिदपि, अत. तान् प्रत्यपि एव यत्नो नेयर्थः। न हि बधिरार्थं केनचिद्गीयत इति भाव.। वासनाया तेषां तदीयप्रकरणार्थावधारणाधिकार एव नास्तीति कुतस्तान् प्रति यत्न इत्यरुचा। तर्हि कथं क्रियते यत्न इत्याह—उत्पत्स्यतेऽस्ति इति। मम समानधर्मा मनसङ्ग कोऽपि यदि उत्पत्स्यते अनिष्यते, अथवा अस्ति विद्यते, तदा तं प्रति एव यत्न इति शेषः। (सङ्गमानामम्बनीता नामनेन प्रकरणेन प्रयोजनविरहात्सदकीर्तनम्, इदानीमनुत्पादेऽपि सङ्गमस्योत्पाद सम्भावना दर्शयति—काल इति। हि यस्मादयं काल निरवधि निरवसान, तथाच इदानीमनुत्पादेऽपि कालान्तरे तदुत्पादसम्भव इति भावः। सङ्गमस्य विस्तारक्षेत्रेऽप्यनुपलब्धि-सम्भावना दर्शयति—विपुलेति। पृथ्वी पृथिवी विपुला महती, तथाच यद्यहं यो मदनुरूपोऽपि दैवात्कारे मदस्तित्वमज्ञश्च इति भाव। इह प्रथमार्द्धे "च" इति बहुत्वेन प्रयोगेऽपि द्वितीयार्द्धे "अस्ति" एकत्वेन प्रयोगो न दोषावह, एकवाक्यार्थत्व एव तात्पर्यविषयीभूतत्वेन दुष्टत्वात्, इह तु भिन्नवाक्यार्थत्वात्। वसन्ततिलकं वृत्तं "उक्ता वसन्ततिलकं तभजाजगैः" इति लक्षणात्।

তাঁহারা অতি অল্পাভিজ্ঞ, তাঁহাদের জন্যও আমার এ উদ্যম নহে। তবে মৎ-সদৃশ কেহ যদি উৎপন্ন হয়, অথবা কোথাও থাকে, তাহাদের জন্যই আমার এই যত্ন। যেহেতু এই কালের অবধি নাই, পৃথিবীও অতি বিপুল, (সুতরাং কোন্ কালে আমার সদৃশব্যক্তির উৎপত্তি বা কোনও দেশে বিদ্যমানতা অসম্ভব নহে)।

---

* । तदुक्तया तत्प्रख्यापनाय सर्वे कृतोद्यमाः यथा—स्वमनोरथपूर्णे कश्चित्कालपरिग्रहे च लक्ष्यतामिति। कविवर्षा प्रति तैनैवोक्तं।

"गुणैः सता न सम को गुण, प्रख्यापितो भवेत।
यथाऽयमात्मा भगवान् स्वयं ज्ञाननिधिर्गुरुः॥" इत्यधिकपाठः क्वचित्।

अपिच,—यद्वेदाध्ययनं, नयोपनिषदां सांख्यस्य, योगस्य च
ज्ञानं तत्कथनेन किं ? न हि ततः कश्चिद्गुणो नाटके।
यत्प्रौढत्वमुदारता च वचसो यत्सार्थतो गौरवम्,
तच्चेदस्ति ततस्तदेव गमकं पाण्डित्यवैदग्ध्ययोः ॥ (२०)

ततो यदग्राक्षमर्पितं प्रियसुहृदाऽत्रभवता भवभूतिनाम्ना प्रकरणं प्रक्रान्तं मालतीमाधवं नाम, तदेव तत्रभवतः कालप्रियनाथस्य

---

(१९) पण्डितविरचितस्य स्व पण्डितावं समादर इति निजपाण्डित्यं प्रकटयति—यद्वेत्यादिना। अन्यापि यत्र कश्चित्यं वाचो युक्तिरित्यनुवर्तते। यद्वेदानां ऋगादीनां अध्ययनं तथा उपनिषदां ब्रह्मार्थतत्प्रतिपादकवेदभागविशेषाणां, सांख्यस्य कपिलप्रणीतस्य, योगस्य पातञ्जलस्य च यज्ज्ञानं तस्य कथनेन तत्तोरुच्चारणज्ञानादेरभिधानेन किं ? न हि-तत्प्रयोजनं। किं यस्मात् ततः वेदाध्ययनादेः नाटके कश्चिद्गुणः उपकारित्वं न भवतीति शेषः। नाटके वेदाध्ययनादीनामनुपयोगादिति भावः। यदि यत्र नाटकोपयोगित्वं तदाह—यत्प्रौढत्वमिति। वचसो यत् प्रौढत्वं गभीरार्थत्वं, यद्वा "पदार्थे वाक्यरचने शब्दार्थे च पदाभिधा। प्रौढिर्भाषासमासौ च काव्यिनायकसख्यं च॥" इत्युक्तलक्षणलक्षितं उदारतागुण-विशेषः। यत्तोक्तं दण्डिना,—"समग्रगुणतां गुणः कश्चित् कश्चिदुच्यते दोषैरिति। तदुदाहार्यं तेन सतापा काव्यपद्धतिः॥" इति। अर्थतो गौरवं अर्थानां गभीरतिपादनसामर्थ्यं नाटके तच्चेदस्ति तदेव पाण्डित्यं काव्यानुपयोगिः, वैदग्ध्यं कविसम्बन्धिः तयोर्गमकं बोधकम्। तथाच नदीग्रामकरत्वस्य प्रौढत्वादिकं इदमेव पाण्डित्यं कवित्वं वा नाटके किं विधास्यति, अकथनतत्प्रतीतेर-भावादिति भावः। ननु नाटक इति कथमुक्तं नाटकप्रकरणयोर्भेदादिति चेत्, नटकर्तृकमिति नटधातोर्धात्वर्थे षु कथने नाटकमिति पदं सिद्धं, तथाच नाटके नाट्ये इत्यर्थतो दोषाभावात्। नाटुकविरचितं इत्यं, अथवा नाटकमेव।

२०। वेदाध्ययन, उपनिषद्, सांख्य ও योगशास्त्रের যে জ্ঞান তাহাদের কীর্তনদ্বারা কোনও ফল নাই, যে হেতু নাটকে তাহার কোনই উপযোগিতা নাই। বাক্যের যে গাম্ভীর্য্য, উদারতা, ও নিষ্টার্থতা তাহা যদি থাকে, তবে তাহাই পাণ্ডিত্য ও কবিত্বশক্তির বিজ্ঞাপক হইবে।

पुरतः प्रयोगेण प्रस्तावयितुमुद्यताः तत् सर्वे कुशीलवाः सङ्गीत-प्रयोगेण मत्तमोहितसज्जादनाय प्रवर्त्तन्ताम्। (२४)

नटः। [श्रुत्वा] एवं क्रियते युष्मदादेशः, किन्तु या यस्य युज्यते भूमिका, तां खलु तथैव भावेन सर्वे वर्ण्याः पाठिताः, सौगत-जरत्परिव्राजिकायास्तु, कामन्दक्याः प्रथमभूमिकां भाव एवाधीते, तदन्तेवासिन्यास्त्वहमवलोकितायाः। (२५)

सूत्र। ततः किम्। २६

---

(२५) भूमिका व्याकर्त्तव्या, यतोऽत्र भरतेन—"अन्यद्वृत्तेदृशस्यास्य नैव न तु भूमिके"ति। तां भूमिकां, वर्णे भवा वर्ण्याः स्वपरिजनान्तर्गता नटा इत्यर्थः, पाठिता शिक्षिता, सौगतजरत्परिव्राजिकायाः बौद्धवृद्धसन्न्यासिन्याः, एतदव्यवहितपूर्वे प्रथमतोऽङ्के भरतेन। यथा—"विश्वदेवविधिका दासी भिक्षुकी भिक्षुकारिका। प्रविश्य चाग्र विवाद्य तूर्णीमार्यैव विन्दति॥" "स्त्रिया नार्यवलं वा कृपिण वा तपस्विनम्। दूत वाप्येवमा तूर्णी न तु दूर्यात् कथञ्चन॥" इति भरतनिषेधात्। इहत्यत्वयनं कृपादिदूषणत्वज्ञापनार्थं। तदन्तेवासिन्या कामन्दक्या भिक्षुण्याः, भूमिकामहमधीये इत्यन्वयः।

(२६) एतावदुक्त्वा किं विरतोऽसीति शेषः।

२४। অতএব প্রিয় সুহৃৎ পূজ্য ভবভূতিনামক কবি স্বকৃত মালতীমাধবনামক যে প্রকরণ আমাদিগকে অর্পণ করিয়াছেন, পূজ্য কালপ্রিয়নাথের সম্মুখে অভিনয়দ্বারা তাহারই প্রখ্যাপনে আমরা উদ্যত হইলাম, অতএব নটগণ সঙ্গীত-প্রয়োগদ্বারা আমার অভীষ্ট-সম্পাদনে প্রবর্ত্তিত হউক (এরূপ আদেশ-কর)।

২৫। নট। (শ্রবণ করিয়া) আপনার আদেশ প্রতিপালন করিতেছি, কিন্তু যাহার যে শেখাবণ উপযুক্ত, সেরূপ ভাবেই আপনি পরিজনবর্গকে শিক্ষা দিয়াছেন। বৌদ্ধ বৃদ্ধ সন্ন্যাসিনী কামন্দকীর বেশেই প্রথম প্রবেশ করিতে হইবে, তাহা আপনি নিজেই শিক্ষা করিয়াছেন এবং কামন্দকীর শিষ্যা অবলোকিতার শেখাবণাদি আমি অভ্যাস করিয়াছি।

২৬। সূত্র। ইহা বলিয়াই বিরত হইলে কেন?

भट: । ततः प्रकरणनायकस्य मालतीवल्लभस्य माधवस्य वर्णिकापरिग्रहः कथम् ? (२७)

---

(२७) तत इति । प्रकारार्थं रूपकभेदः, तन्नायकस्य तदाख्यनीसूतप्रधानपुरुषस्य । नायकलक्षणं यथा दर्पणे—

"त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही ।
दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यशीलयुक्तश्च ॥"

नायकभेदा अपि तत्रैवोक्ताः—

"धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च ।
धीरप्रशान्त इत्यय चतुर्धा प्रथमनायकभेदः ॥"

अयञ्च नायको माधवः धीरप्रशान्तः, दर्पणोक्तं लक्षणं यथा—

"क्षमाबलसमृद्धैर्यात् द्विजादिको धीरप्रशान्तः स्यात्" ।

अमात्यत्वादयं धीरोदात्त इति भरतमतानुवर्त्तिनः, तथाचोक्तं भरतेन—"ईशानसिरमाश्रय धीरोदात्तो प्रकीर्त्तितो" इति । मालती तन्नायकी प्रकरणनायिका । नायिका च नायकक्षमाबलसमृद्धैर्यादिगुणैर्यथासम्भवैर्युक्ता प्रधानस्त्री तन्नायकनीसूता स्त्री । यथोक्तं, दर्पणे—

"अथ नायिका त्रिविधा स्वान्यासाधारणस्त्रीति ।
नायकक्षमाबलसमृद्धैर्यादिगुणैर्युक्ता" ॥

मालती च नायिका स्वकीया कुलस्त्रीत्वात् तदाश्रयिता, यथाह भरतः—"तदाश्रयिता चैव भवेत्तु कुलजाङ्गना" इति । कुलस्त्रीचरितत्वात् प्रकरणस्यैवं भेदं, तदुक्तं भरतेन—

"त्रिधा प्रकरणं तत्तु शुद्धं सङ्कीर्णमेव च ।
कुलस्त्रीचरितं शुद्धं सङ्कीर्णं वेश्यया कृतं ॥"

अथ मालतीवल्लभत्वं माधवस्यानुक्तं, माधवेन सहास्य सर्वाकालीनतया मालत्या जातेः सम्बन्धाभावादिति चेन्न, योगिनीप्रभावादसम्भवसम्भवं सम्पादयता कविना सहृदयहृदयचमत्कारकारिण्या विदग्धतया एवोपपादितत्वात् । माधव इति माला च प्रकारसमवयीत्या सङ्गतस्य प्रकारसमवयत्वात् । प्रकारसमवयेन च विष्णुदैवतत्वसूत्रेऽस्यैव, "प्रकारो विष्णुदैवत" इति भरतोक्तत्वात् । वर्णिकापरिग्रहः भूमिकाप्रकर्षं माधवस्याभिनयादिकार्य्यमिति शेषः । अर्थं चार्याया कामन्दक्या अवलोकितायाश्च भूमिकादयस्य प्रथममेव सङ्गीतत्वात् प्रधाननायकभूमिकापरिग्रहस्तु तेन सम्पाद्य इति प्रकारार्थः । २७

सूत्र। मकरन्दकलहंसप्रवेशावसरे तत्सुविहितम्। (२८)

नटः। तेन हि तत्प्रसिद्धप्रयोगादेवाचभवतः सामाजिकानुपाञ्जहे। (२९)

सूत्र। वाढं, एषोऽस्मि कामन्दकी संवृत्तः। (३०)

नटः। अहमप्यवलोकिता। (३१) [इति परिक्रम्य निष्क्रान्तौ](३२)

---

(२८) सूत्रेति। उत्तरमाह—कलहंसेति। कलहंसो माधवस्य पेटः, मकरन्दो मित्रं, तयोः प्रवेशावसरे तत् माधवमूलिकापरिग्रहणं सुविहितं निर्द्धारितं कविनेति शेषः। तथाच एकदा सर्वथाऽप्रवेशाभावादिदानीं तच्चिन्तनीयमिति भावः।

(२९) नट इति। तेन सामाजिकनिर्द्दिष्टगुणशालित्वेन कृतीशत्वेनोक्तत्वेन च, तत्प्रसिद्धप्रयोगात् तस्य प्रसिद्धस्य प्रकरणस्याभिनयात्। अचमवतः पूजयान् सामाजिकान् समाजे सभ्यानेतान्, उपाजहे आराधयामः।

(३०) सूत्रेति। वाढं तथा कुर्म इत्यर्थः। एषोऽस्मीति—सूत्रधारवेषपरित्यागेन कामन्दकीभूतोऽस्मीत्यर्थः। कामन्दकी नीतिरस्यास्तीति, तं वेत्तीति कामन्दकी। (तद्वेत्त्यधी, तत इकप्रत्ययः) अनया च नामव्युत्पत्त्या नीतिवेदित्वख्यापनेन प्रकृतसिद्धिहेतुता सूचिता।

(३१) संवृत्तावीत्यनुषङ्गेणान्वयः। अवलोकिता इति, अनेन च नाना कार्य्यसिद्धिहेतोरपि कार्य्यसिद्धिहेतुता सूचिता। एतेन वाक्यैः कामन्दकावलोकितयोः प्रथमप्रवेशरूपं सूत्रं सूचितम्।

---

(२७) नट। তবে প্রকরণনায়ক মালতীমাধবের বেশপরিগ্রহ কি প্রকারে হইবে?

(২৮) সূত্র। মকরন্দ ও কলহংসের প্রবেশাবসরে মাধবের বেশধারণ বিহিত হইয়াছে। (সুতরাং এখন সেই চিন্তার প্রয়োজন নাই)

(২৯) নট। তবে সেই প্রসিদ্ধ মালতীমাধবের অভিনয়দ্বারাই পূজ্য সামাজিকবর্গের সংবর্দ্ধনা করি।

(৩০) সূত্র। তাহাই হউক, এই আমি কামন্দকীর বেশ ধারণ করিতেছি।

(৩১) নট। আমিও অবলোকিতার বেশ ধারণ করিতেছি।

[प्रस्तावना । (३३)]

[ततः परिक्रम्य रङ्गपीठिकानेपथ्ये कामन्दकयवनीकिते प्रविशतः] (३४)

कामन्दकी । वत्से ! अवलोकिते ! (३५)

अवलोकिता । आमवेदु अम्मअट्टी । (३६)

---

(३२) आशावयन् अगमनी इति पाठः ।

---

(३२) इतीति । परिक्रम्य पात्रविशेष गाटयित्वा । निष्क्रान्तौ रङ्गभूमिरगमनौ, सूत्रधार· नटाविति शेषः ।

(३३) प्रस्तावना प्रस्तुतोद्घातकं, इतीति शेषः । प्रस्तावनालक्षणं यथा दर्पणे—

"सूत्रधारो विदूषको वापि पारिपार्श्विक एव वा ।
सूत्रधारेण सहिताः संलापं यत्र कुर्वते ॥
चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः ।
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा ॥" इति ।

सा चात्र "एषोऽयमिन्द्रपरिघप्रभृतिः सूत्रधारप्रयोगतः । पात्रप्रवेशो यत्रार्थे पदैरात्मगतैरपि सतः ॥" इति लक्षणे अर्थं पदसौष्ठवकरणात् प्रयोगातिशयाख्या । दर्पणीयं प्रयोगातिशयलक्षणं यथा—

"यदि प्रयोक्तृसंक्रान्तैः प्रयोगैरुच्यते परैः ।
नित्यं पात्रप्रवेशेन प्रयोगातिशयस्तदा ॥" इति

(३४) तत इति । परिक्रम्य पुनरायत्य रङ्गपीठिका नेपथ्यं प्रविशे रङ्गपीठिकानेपथ्ये कामन्दकयवनीपरिवृतावित्यर्थः । कामन्दकयवनीकिते इत्यत्र कामन्दकी सूत्रधारनटी, प्रविशतः रङ्गभूमाविति शेषः ।

(३५) कामन्दकीति । वत्सेति शेषः । एवमुत्तरत्रापि सर्वत्र अर्थपदसन्दर्भाक्षेपसंख्या आदिस्थादिक्रियया योजनीयम् । एवं प्रस्तावनां परिसमाप्य प्रथमाङ्कसूचनार्थं विष्कम्भकमारभते—वत्से ! इत्यादिना ।

---

(७२) (नटी ও সূত্রধার) পরিক্রমণ করিয়া (হাটিয়া) নিষ্ক্রান্ত হইল ।

(৩৩) (রঙ্গভূমিপরিবর্তনে কামন্দকী ও অবলোকিতাবেশে নটী ও সূত্রধারের পুনঃ প্রবেশ)

(৩৪) কামন্দকী । বৎসে অবলোকিতে !

काम। अपि नाम तयोः कल्याणिनोर्भूरिवसुदेवरातापत्ययो-र्मालतीमाधवयोरभिमतः पाणिग्रहः स्यात्?। (३७) [वामाक्षि-स्पन्दनं सूचयित्वा सहर्षम्।] (३८)

विहगखनेव कल्याणमान्तरङ्गेन चक्षुषा।
स्फुरता वामकेनापि दाक्षिण्यमव स्यते॥ (३८)

---

(३७) सम्प्रति कविः कामन्दकीमुखेन प्रकरणार्थं कथयति—अपि नामेत्यादिना। इह हि मालतीमाधवयोर्विवाहनिर्वाह एव समस्तप्रकरणार्थः। नाम सम्भावनायां विधये वा। कल्याणं शुभमस्ति ययोस्तौ कल्याणिनौ तयोः कल्याणिनोः, सन्निहितानुरूपविवाहरूपकल्याण-सूचकमित्यभिप्रायः। भूरीणि प्रचुराणि वसूनि धनानि यस्य स भूरिवसुः सान्वर्थोक्तिः। अनेन सार्थकनाम्नो महाधनिककन्यायाः मालत्याः वराकाङ्क्षाया अवश्यम्भावित्वं सूचितम्। देवरातं राति ददातीति (रा+कर्तरि क.) देवरातो माधवपिता, अनेन च सार्थकनाम्नो दाक्षिण्यसम्भूतया माधवस्यानुरूपवरत्वं सूचितः। पाणिग्रहो विवाहः निश्चितमेव अभिमतः सम्मतः स्यात् भवेत् सर्वेषामिति शेषः। विघ्नैरपि सारम्भिक प्रयासः परस्परं योग्यसमावेशायेति भावः।

(३८) हर्षनिमित्ताङ्गस्पन्दाया आङ्गक्रियाया विशेषणं। स्त्रीणां वामाङ्गस्फुरणस्य शुभ-सूचकत्वात् हर्षो गुरुः।

(३८) विहगखनेति। आन्तरङ्गेनैव अयत्नजः सिध्यति भवेति सन्देहदोलायितं मनोगत-मर्थमिव जानतैवानुकूलेन "मन्ये मह्यं मम प्रायो नूनमित्येवमादिभिः। उत्प्रेक्षा व्यञ्जने मन्ये क्रियायोऽपि गम्यः॥" इत्यनेनैवमन्यमानानुकूलेनाथवा कलत्रस्य दक्षिणेनाभिहितत्वात्। स्फुरता स्पन्दता अत एव कल्याणं भाविं मङ्गलं विद्योतता सूचयता नैमित्तिकैः स्त्रीणां वामाक्षिस्पन्दनस्य शुभसूचकत्वात्, वामकेन सव्येन चक्षुषा दाक्षिण्यं आनुकूल्यं अवलम्बने अङ्गीक्रियते।

---

(৩৬) অবলোকিতা। আপনি আজ্ঞা করুন।

(৩৭) কাম। কল্যাণভাজন ভূরিবসুর কন্যা মালতী ও দেবরাতের পুত্র মাধবের অভিলষিত বিবাহ হইবে ত?

(৩৮-৩৯) (বামাক্ষিস্পন্দন সূচনা করিয়া সহর্ষে) সন্দেহ দোলায়িত আমার অনুরের ভাব বুঝিয়াই যেন (তাহা নিরাকরণের জন্য) বাম চক্ষু স্পন্দিত হইয়া সূচনা করতঃ আনুকূল্য দেখাইতেছে।

अव। महन्तो खलु भगवदीए एसो चित्तविक्खेवो। अत्तरीयं, जं दाणिं चीरचीवरमेत्तपरिच्छदं भिक्खपाअमेत्तपाणउत्तिं भगवदीं ईदिसे आआसे अमअभूदिवसू णिओएदि। तहिं उज्झिदसंसारावग्गहो अप्पा सुद्धेहिंवि णिउज्जिअदि (क)।

(क) महान् खलु अवज्ञा एव चित्तविक्षेपः। आश्चर्यमाश्चर्यं, यदियन्तौ चीरचीवरमात्र परिच्छदा भिक्षपात्रमात्रवृत्तिं भगवतीं ईदृशे आयासे अमृतभूदिवसनियोजयति। तथोज्झितसंसारावग्रह आत्मा शुद्धाभिरपि नियुज्यते।

अपिरम विरोधे, तथापि वामनेन सर्वेणापि तया दाक्षिण्यं सम्पादयितव्यं अवलम्बात इति, एवं वामनेन प्रतिकूलेनापि तया दाक्षिण्यमनुकूल्यं अवलम्बते इति च विरोधः, दक्षिणव्याख्यया च तत्परिहार इति विरोधालङ्कारः। तल्लक्षणं यथा दर्पणे—"जातिगुणक्रियाद्रव्यैर्गुणी गुणादिभिर्निमित्तैः। क्रिया क्रियाद्रव्याभ्यां यद्द्रव्यं द्रव्येण वा सिद्धः। विरुद्धतेव भासेत विरोधोऽसौ दशाकृतिः"रिति॥ अनुष्टुप्छन्दसम्, तल्लक्षणं यथा—"पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः। गुरु षष्ठक्ष पादानां शेषलक्षणवर्जितं मतः॥" इति

(क) महानिति। अत्र खलु निमित्ते। चित्तविक्षेपः क्षुब्धचित्तविषयाभिनिवेशः। चित्तं चेतसो भावः चित्तत्वं तेनेति यावत्, निर्भरं सम्यग्दर्शनाभावः समाधः। यत् चीरं वृक्षनिर्यासः आदानिमृगाजिनवल्कलेति स्मृतिः, तन्मात्रपरिच्छदो ऽवयवादिमात्रवस्त्रो यस्यासौ। भिक्षापात्रो नाम भोक्तानां भिक्षाभाजनेन भोजनं, अथवा भिक्षस्य साधुधारणोचितमल्पवस्त्रपात्रः उदरपूरणे निक्षेपः, तन्मात्रेण साधुजनोचितधारणं यस्याः तां भगवतीं ईदृशे चाण्डाले दुःखबहुलविषादजन्यादरुदयादिकार्ये। इदन्तु दानिमनोचितकार्यं पुरस्त्रीवासेव शोभते, न तु भगवतीनां विश्वविरक्तानामित्याशयः। तत्र दानिमाद्यतनसमये कर्मणि, उज्झितः उन्मूलितः संसार एव अवग्रहः नीवारतर्वरतिबन्धो यस्य, स एवभूत आत्मा शुद्धाभिरपि नियुज्यते किमिदमत्र युक्तमिति चार्थेऽनेनेति योजना। अमृतभूदिवसशब्दविधयासङ्गतमाशयः अत्रेत्यस्य दुष्करोदयादिरूपे कार्ये भगवतीं नियोजयतु नाम, भगवत्यापि तदङ्गीकरणमिति महदाश्चर्यमिति ज्ञातव्यम्।

(क) अरे! ইহা আপনার চিত্তের নিতান্তই অসদভিনিবেশ। অমাত্য ভূরিবসু যে বল্কলবস্ত্রবিনির্মিত ভিক্ষুজনোচিত বস্ত্রমাত্র পরিধারিণী ভিক্ষাপাত্রমাত্রোপজীবিনী আপনাকে এরূপ আয়াসজনক কার্য্যে নিযুক্ত করিয়াছেন,

काम। वत्से! मा मैवं ब्रूहि।

यस्यां विधेयविषये स भवान्नियुङ्क्ते,
स्नेहस्य तत् फलमसौ प्रणयस्य सारः।
प्राणैस्तपोभिरथवाभिमतं मदीयैः,
कृत्यं घटेत सुहृदो, यदि तत् कृतं स्यात्॥ (४०)

अयि, किं न वेत्सि यदेकत्र नो विद्यापरिग्रहाय नानादिगन्तवासिनां साहचर्य्यमासीत्, तदैव चाक्रन्दोदामिनीसमत्तमनयोर्भूरिवसुदेवरातयोर्मैत्रेयं प्रतिज्ञा, अवश्यमावाभ्यामपत्यसम्बन्धः कर्त्तव्य

---

(४०) कामेति। मा मेति वीप्सा अत्यन्तनिषेधसूचनाय। यस्यामिति। स भवान् पूज्यः भूरिवसुः विधेयविषये नियोज्यगोचरे कर्म्मणि यस्यां नियुङ्क्ते प्रेरयति, तत् स्नेहस्य प्रीतेः फलं। असौ नियोगः प्रणयस्य प्रकृष्टस्य प्रणयः प्रेम्णि विश्वासे यावज्जीवयोरपी"ति विश्वः। सार इत्कर्षः स्थिरांशो वा। स्नेहाधिक्यादेवेदृशे कर्म्मणि तस्य नियोजनं समाधेयमित्यर्थः। यदि मदीयैः प्राणैः अथवा तपोभिः प्राणेभ्योपि श्लाघ्यैरित्यर्थः। सुहृदो मित्रस्य अभिमतं अभिलषितं कृत्यं कार्य्यं घटेत निष्पद्येत, तदा तत् कृत्यं कृतं स्यात् प्राणादिभिरपि तदवश्यं कर्त्तव्यमित्यर्थः। यद्वा तत् तदा मदीयैः प्राणैः तपोभिश्च कृत्यं करणीयं कृतं सम्पन्नं स्यादित्याशया योजनीयं। प्राणैस्तपोभिरपि सुहृत्कार्य्यसम्पादनादधिकं करणीयं नास्तीत्याशयः। वसन्ततिलकं वृत्तम्॥

(४१) साधवाय नान्दीदानार्थं भूरिवसोः तत्सम्पादनार्थं भवत्याश्च कथमेवमायास इत्यत आह—किं न वेत्सीति। विद्यापरिग्रहाय विद्याग्रहणार्थं नानादिगन्तवासिनां बहुदेशप्रवासिनां नः अस्माकं भूरिवसुदेवरातयोर्मध्ये च इत्यर्थः। एकत्र साहचर्यं सहचरभावः

आपनिও আবার সাংসারিক ভাবোচ্ছেদে অগ্রসর আমাকে সেই কার্য্যে নিযুক্ত করিতেছেন, ইহা নিতান্তই আশ্চর্য্যজনক।

(৪০) কাম। বৎসে! এরূপ বলিও না; পূজ্য ভূরিবসু যে আমাকে দূতীজনোচিত কার্য্যে নিযুক্ত করিতেছেন, ইহা স্নেহের ফল, এবং এই নিয়োগ প্রণয়ের স্থিরাংশস্বরূপ। অতএব যদি আমার প্রাণ অথবা (প্রাণাপেক্ষাও প্রিয়) তপস্যাদ্বারাও সুহৃদের এই কার্য্য সম্পন্ন হইতে পারে, তবে অবশ্য কর্ত্তব্য।

इति। तदिदानीं विदर्भराजमन्त्रिणा सता देवरातेन माधवं पुत्र-मात्मोद्दिश्यैवमवधाय, कुण्डिनपुरादिमां पद्मावतीं प्रहिणता सुविहितम्। (४१)

अपत्यसम्बन्धविधिप्रतिज्ञा प्रियस्य नीता सुहृदः स्मृतिश्च।
अलोकसामान्यगुणस्तनूजः प्ररोचनार्थे प्रकटीकृतश्च॥ (४२)

यदाशीयत् किं न वेत्सि? आवाभ्यामहमेवासिनीलमवयमेव आनाशीयः। सदा एकत्रा-ध्ययनविवाहयवदानयजनादीनि, यज्ञात् सौदामिनीलमवं यज्ञार्थं सौदामिन्याय प्रवर्यं (सौदा-मिनी ज्ञानदत्ता सवर्णिका) सौदामिनीजनपदनिवासेन च सदा चर्यं सत् प्रतीक्षसम्बा दत्ता प्रतिज्ञतीत्या देवरातस्यतया सवर्णाद्दे माधवायाध्ययनार्थमस्या प्रवेशो युक्त इति सूचितं "नानूचित विप्रेण पाठ" मिति भरतानुसारेणानूचितपाठप्रवेशस्यानुचितत्वात्। अपत्य-सम्बन्धस्य अपत्यौद्वाहिकसम्बन्धस्य कर्त्तव्य इति प्रतिज्ञा इत्येति योजना, तथाच पुत्रप्रतिज्ञातत्वाद्-धूरिवर्णा प्रतिज्ञाया सत्पुरोहितत्वाद्यत्न च सत्सम्पादनाय निर्बन्धातिशयो युक्त इति भाव। आधिविकी आधिदत्ता, तत्पुत्रवधाय तत्पाठनिमित्तं, एतेन च आधिदाने सर्वस्वनाशादि-प्रदर्शनात् तत्पालने माधवस्य चौरिकाविधाने चौरसम्बन्ध सूचितः। कुण्डिनपुरं विदर्भ-राजधानी, तस्मात् प्रहिणता प्रस्थापयता सुविहितं शोभनं कृतम्।

(४२) अथ कुतः माधवं प्रहिणता सुविहितमित्यत्र हेतुं सङ्गच्छयति—अपत्येत्यादिना। अपत्यस्य कन्यायाः सम्बन्धविधेर्विवाहविधेः प्रतिज्ञा प्रियस्य सुहृदः शीतः, मित्रस्य (धूरिवर्णः) स्मृतिः

---

(४१) अरे! तुमि कि जान ना ये, विद्याध्ययनेर जन्य नानादिगन्तप्रवासी आमादेर एकत्र सम्मिलन हइयाछिल, तखन आमार ओ सौदामिनीर सम्बन्धे एই धूरिवसु ओ देवरातेर एইरूप प्रतिज्ञा हइयाछिल ये, "अवश्यই आमरा सन्तानेर (परस्पर) सम्बन्ध करिब"। सেই हेतु सम्प्रति विदर्भराजमन्त्री देवरात निज पुत्र माधवके छात्रपाठ्य अध्ययन जन्य कुण्डिनपुर हইতে এই पद्मावतीनगरে पाठाইয়া भालই करিয়াছেন।

(४२) (सেहেतु এই সুহৃৎপ্রেরণায়), অপত্য-বিবাহ-বিষয়ের প্রতিজ্ঞা প্রিয় সুহৃৎকে স্মরণ করাইয়া দেওয়া হইল, এবং (সম্বন্ধবিষয়ে) প্ররোচনার্থ পুত্র যে অনন্যসাধারণ গুণসম্পন্ন তাহাও খ্যাপিত হইল।

अव । तदो, किंति मालदीं अमच्चो अप्पणा माहवस्स ण पडि-
वादेदि, जेण चोरिअविआहे भअवदीं तुवराबेदि ? (ख)

काम । तां याचते नरपतेर्नर्मसुहृद्वन्दनो नृपमुखेन ।
तस्माच्चात्मप्रतिषेधः कोपाय शिवस्त्वयमुपायः ॥ (४२)

(ख) तत किमिति मालतीममात्यो माधवस्य आत्मना न प्रतिपादयति । येन चौर्येविवाहे भगवतीं त्वरयति ।

ऽरण्यञ्च नीता प्रापिता, माधव ग्रहिष्यता ईश्वरानेनेति गर्भस्थितेन सम्बन्धः । पुत्रार्थे स्त्रीआत्मभावात् कामातिपातात्च प्रतिज्ञा विस्मर्तुमपि शक्यतेत्याशयः । असाधारणगुणः असितरसाधारणगुणः भूतलदुर्लभगुण इति यावत्, तनुज पुत्र प्रदोषनार्थं सम्बन्धेच्छोत्पादनार्थं प्रकटीकृतः प्रकाशितः लोकविलक्षणगुणतया स्फटीकृत इत्यर्थः, अन्यथा ज्ञातप्रतिज्ञेनापि निर्गुणाय वराय सामान्यरूपलाभेच्छासम्पन्ना कन्या क्वापि यदि सञ्जयीतेत्याशयः । "उपेन्द्रवज्रा" वृत्तम् । लक्षणन्तु—"उपेन्द्रवज्रा प्रथमे लघौ सा" इति ॥

(ख) तत इति । अमात्यो भूरिवसुः, आत्मना स्वयं माधवस्येति चतुर्थ्यर्थे षष्ठी, अथवा ज्ञात इति शेषः । प्रतिपादयति ददाति ।

(४२) स्वयमप्रदाने हेतुं दर्शयति—तामिति । नन्दनः नन्दनामा, नन्दयतीति व्युत्पत्त्या आनन्दजनकत्वादस्यपुरप्रविष्टता तस्य युक्तेति सूचितम् । नरपतेः राज्ञः नर्मसुहृदस्य पुरः क्रीडासचिवः, "स्यान्नर्मसचिवः सोऽयं कृपितः स्त्रीप्रसादकः" इत्युक्तलक्षणक इति यावत्, मुखमुपेत्य मुखद्वारा तां मालतीं याचते "नन्दनाय मालतीं देहीति" नृपेण याचयतीत्यर्थः । तस्मा राजप्रार्थनायाः साक्षात् प्रतिषेधः "न प्रदास्यामीति" मुखतः कथन कोपाय राज्ञो भविष्यतीति शेषः । अयन्तु मद्वारा नृपमर्यादाजनकः उपायः शिवः परिणामशुभजनकः । अनुष्टुप्छन्दः ।

(ख) अव । তবে অমাত্য নিজেই কেন মাধবকে মালতী সমর্পণ করেন না ? আপনাকে যে চৌর্য্য বিবাহ-সম্পাদনের জন্য ত্বরান্বিত করিতেছেন ?

(৪২) কাম । নন্দননামক নৃপতির অন্তঃপুর-সচিব নৃপতিদ্বারা মালতীকে প্রার্থনা করিয়াছেন, তাহার সাক্ষাৎ প্রতিষেধ (রাজার ও নন্দনের) কোপের কারণ হইবে, সুতরাং এই চৌর্য্য বিবাহ-সম্পাদনই মঙ্গলজনক উপায় ।

अत्र । अच्छरीयं ! अच्छरीयं ! ण क्खु अमच्चो माहवस्स णामम्मि आणादिन्ति णिव्वेक्खदा लक्खीअदि (ग) ।

काम । संवरणं हि तत् । (४४)

विशेषतस्तु बालत्वात्तयोर्विवृतभावयोः ।
तेन माधवमालत्योः कार्यः स्वमतिनिह्नवः ॥ (४५)

(ग) आश्चर्यमाश्चर्यम् । न खल्वमात्यो माधवस्य नामापि जानातीति निर्वेक्षता लक्ष्यते ।

(ग) आश्चर्यमित्यादि । निरपेक्षता अवधानरहितता औदासीन्यमिति यावत्, लक्ष्यते प्रतीयते । अमात्यः खलु माधवाय सुतां दातुमभिलषति, अथच तस्य नामाप्यजानन्निव अवहरतीत्याश्चर्यमित्यर्थः ।

(४४) कामेति । संवरणं आकारगोपनं रहस्यभेदेन तदौदासीन्यख्यापनमित्यर्थः ।

(४५) तेन भूरिविषयेण बालत्वात् बाल्यस्य प्रथमयौवनं बोद्धव्यं, अन्यथाऽन्योऽन्यानुरागासम्भवात् । विशेषत्वात् प्रथमयौवने वर्णनालक्षादित्यर्थः । विवृतभावयोः प्रकाशिताभिप्राययोः, आकारगोपना-भिज्ञयोरिति यावत्, माधवमालत्योः, स्वमतेः तयोरन्योऽन्यानुरागविषयिण्या स्वबुद्धेः निह्नवः गोपनं । विशेषतः कार्यः करणीयः । मदनाज्ञे खलु बलवदसत्या तयोरभिप्राये सर्वानुभवसाध्येऽपि गुरुजनपरिज्ञानं यथा स्यान्न जानीतस्तावत्खं कर्तव्यमित्यर्थः । अन्यथा गुरुजनेनावयोरापत्यं विदितमिति लज्जया तयोरदर्शनभङ्गे वाञ्छितपीयूषविघाते न निर्यास्यत इति भावः । अत्र मालतीमाधवयोरन्योऽन्यानुरागस्य बीजस्योपन्यासादुपक्षेपो नाम मुखसन्धेरङ्गमुक्तं । यथोक्तं—"बीजन्यास उपक्षेप" इति । "अनुष्टुप्" इत्यम् ॥

(ग) অহ । কি আশ্চর্য্য ! অমাত্য যেন মাধবের নামও জানেন না, এইরূপ ঔদাসীন্য-দেখা যাইতেছে ।

(৪৪) কাম । তাহা গোপন করা মাত্র ।

(৪৫) বালত্বনিবন্ধন সেই মালতী ও মাধবের অভিপ্রায় ব্যক্ত হইলেও অমাত্য যে বুঝিতে পারিয়াছেন, তাহা মালতী ও মাধবের নিকট গোপন করা অবশ্য একান্ত কর্তব্য ।

अपिच,—अनुरागप्रवादस्तु वयस्योः सार्वलौकिकः।
श्रेयोऽप्यस्माकमेवं हि प्रतार्य्यौ राजनन्दनौ ॥ (४६)

पश्य,—बहिः सर्वाकारप्रगुणरमणीयं व्यवहरन्,
पराभ्युच्छ्वासानान्यतिलघुतराणि स्वगयति।
लनं विद्वानेकः सकलमभिसन्धाय कपटै-
स्तटस्थः स्वानर्थान् घटयति च, मौनञ्च भजते ॥ (४७)

---

(४६) अनुरागेति। अनुरागो मागधीमाधवयोः, उभयोरेव प्रियसुहृदुपचयतया अनुरागयोरिति निर्देशः कामन्दक्या लाघवात्। अनुरागप्रवादः गुणालापः किं भूतः, सार्वलौकिकः सर्वलोकविदितः "लोकसर्वलोकाभ्यां ठञ् (ठक्ष्) अनुपदादिलाभ्यपदबहिः। श्रेयस्य बहुत्वोक्तरत्वादनेन "परिकरो"नाम सन्ध्यङ्गं प्रदर्शितं। यथा—"बहूक्तिर्यं परिकरः" इति। एवं अनुरागप्रवादस्य सार्वलौकिकत्वे अस्माकमपि श्रेयो मङ्गलं भवतीति श्रेयः। हि यस्मात् राज्ञा कृपणेः नन्दस्य तन्नाम्ना तस्य सर्वस्वसुहृद्वर्गौ प्रतार्य्यौ वञ्चनीयौ। यदि राज्ञा नन्दनो वा तयोर्विनाशे कृते प्रार्थनावधारणावसानितः कुतो यदा "तयोरन्योऽनुरागेण परिक्षयो कृतो न तया कारितः" इत्युक्तौ न क्रोधो वर्णयितव्यः, अयञ्च प्रवादः सार्वलौकिकत्वेन वयस्यः सख्यताप्रतिपादकतया तत्रानुकूलो भवेदिति भावः। "अनुष्टुप्" छन्दः ॥

(४७) विश्वस्तभावविहितया दर्शितकपटव्यवहारत्वादीषत्वं प्रकटयति—बहिरिति। एषः अमित्रीयः, भेदी वा। "श्रेयसदेहयोरेव" इति धरणिः। विद्वान् सांसारिकज्ञानवान् चतुर इति यावत्। पारमार्थिकज्ञानस्य लिप्सोरपि एतादृशाचरणस्य गर्हितत्वात्। बहिर्भावे सर्वाकारेण इङ्गितादिना प्रगुणेन सरलगुणेन च। "सर्वाकारवचरमणीय"मिति पाठे तु प्रवर्तेति भावप्रधानो निर्देशः, सर्वाकारप्रवर्त्तनेनेत्यर्थः। रमणीयं यथा तथा व्यवहरन् वास्तवमनीतभावमाच्छाद्य सुधेदितादिभिर्बहिरतिमधुरं भावं प्रदर्शयन्नित्यर्थः। अनुसरणि अतिसूक्ष्माणि यदि परेषां दर्शनविषया भवेयुः वा अभ्यूहस्य तर्कस्य स्थानानि स्थलानि स्वगयति विधत्ते। एवं सकलं जनं कपटैरुक्तैः अभिसन्धाय वशयित्वा "अभिसन्धिर्वञ्चनायै"इति धातुरत्नाकरः।

---

(४६) आर देख—मागधी ও মাধবের অনুরাগবৃত্তান্তও প্রায় সকলেই জানিয়াছে। ইহাতেও আমাদের মঙ্গলই হইবে, যেহেতু (ইহাদ্বারাই) রাজা ও নন্দনকে প্রতারিত করিতে হইবে।

अय। अएवि तुह्म वअणाटो, तेण तेण वअणोवण्णासेण भूरिवसुमन्दिरासण्णराअमग्गेण साहुआ सञ्चारीअदि। (घ)

आम। कथितमेव नो मालतीधात्रेय्या लवङ्गिकया। (४८)

(घ) अयापि युष्मदचनात् तेन तेन वचनोपन्यासेन भूरिवसुमन्दिरासन्नराजमार्गेण साधवः सञ्चार्यन्ते।

तटस्थ उदासीन एव स्यात् अर्थान् घटयति सम्पादयति, क्षीण अभावयुक्त भवति। अस्मिन्नर्थे वाक्यानमपि न वदसीयर्थं। अत्र पुनरार्था स्वभावधर्मणात् "स्वभावोक्ति"रलङ्कारः। सा च तटस्थ इवेत्युक्ते उक्ता मन्यते। स्वभावोक्तिलक्षणं यथा दण्डिने—"स्वभावोक्तिर्दुरूहार्थ-स्वक्रियारूपवर्णन"मिति। विस्तरिणोदाहरणम्, तत्रैव यथा—"दर्भैः कटे क्षिप्तैः शयनसमलाभः शिखरिणी"ति॥

(घ) अयेति। अयापि साधवः युष्मदचनात् युष्माकं आदेशात् तेन तेन युष्मदादिष्टेन-र्थिता वचनोपन्यासेन वाग्व्यवहारप्रकाशनप्रकारेणेत्यर्थः, भूरिवसुमन्दिरस्य बहुधनभवनस्य आसन्नः अतिसन्निहितः यो राजमार्गः राजपथः तेन, सञ्चार्यन्ते सञ्चार्यन्ते। तदवचन-कारणमाह सन्तीति बहुधनभवनसन्निहितराजपथेनैव सर्वदा गमनागमनं कर्तव्यमिति। राजादेशश्च पुनः पुनः सन्देशनिर्लक्षणोऽनुरागवर्धनाय, राजमार्गपदञ्च पुनः पुनर्गमनेऽप्यनायास-साध्यत्वसूचनाय, अन्तर्हितलक्षणायाश्च सर्वाङ्गीणदर्शनलोभसूचनाय। "साधवो यथा बहुधनभवनसन्निहितमार्गेण सर्वदा सञ्चरन्ति, तथा कर्तुमर्हसीति। आनन्दकारणोक्तिरूपया च सत्याज्ञ"प्तिरूपोक्तया वाक्योक्तेन सूचित.। अत एव "आनन्द-कारणोक्तिरूपायोक्तमनुकूलत्वात् युष्मदचनादिति कश्चित् सङ्गच्छते"इति अरुचित् यथावक्यायोऽपि मिश्रत्व इति सम्भाव्यम्।

(४८) आमेति। अवलोकितानुष्ठितकार्यस्य फलसिद्धिं दर्शयितुमुपक्रमते—कथितमेवेति।

(৪৭) অভিজ্ঞ বিদ্বান্ ব্যক্তি আকার, ইঙ্গিত ও উৎসুক্য গুণদ্বারা সাধিবে অতিমধুর ব্যবহার করিয়া ছিদ্রান্বেষী ব্যক্তিদিগের অতিসূক্ষ্ম তর্কস্থানগুলি আচ্ছাদিত করেন এবং ছলনাদ্বারা সকলকে বঞ্চিত করিয়া উদাসীনভাবে নিজের প্রয়োজন সাধন করেন ও (অভিমত কার্য্যবিষয়ে) মৌনাবলম্বন করিয়া থাকেন।

(ঘ) অয়ি। আমিও আপনার আদেশ অনুসারে নানাবিধ সত্যার্থ বাক্য বলিয়া ভূরিবসু-ভবনের সন্নিহিত রাজপথে সাধবকে সঞ্চারিত করিতেছি।

भूयोभूयः सविधनगरीरथ्यया पर्य्यटन्तं
दृष्ट्वा, दृष्ट्वा, भवनवलभीतुङ्गवातायनस्था।
साक्षात्कामं नवमिव रतिर्मालतीनाथवं यत्
गाढोत्कण्ठालुलितलुलितैरङ्गकैस्ताम्यतीति ॥ (४८)

धात्रा सृष्टमातुः सुता धात्रेयी (धात्री टक् (एयन्) ई) सखी धात्रेय्या, एतेन विश्वस्तेन सर्वविद्यायां मालतीसखीत्वमुक्तं। यदाह भरतः—"काश्यदासी च धात्रेयी प्रतिवेश्या च शिल्पिका। बाला प्रव्रजिता चेति नायिकाना सखीजन" इति। सखीत्वं च विश्वस्तत्वात्तया मालत्याः सकलमनोभाववेदित्वसूचनात् सर्वविद्या मालतीमत यत् जययति तत् सर्वथा विश्वसनीयमिति सूचितम्।

(४८) भूयोभूय इति। भवनस्य या वलभी प्रासादोऽ वेश्म, तत्र तुङ्ग उन्नत यद्वातायनं वातस्य अयनं गमनं येन तत्, मुक्तत्वविशेषणाद्यथाकाङ्क्षदर्शनं सूचितम्। यथाच, तत्र तिष्ठतीति तथोक्ता। यद्वा भवनरूपा मालतीरासस्थानत्वं न निर्हिष्टा या वलभीपदं श्रवण समान। एवच —"यद्वाले वलभी चन्द्रमाणे धौर्धाङ्ग वेश्मनो"ति रभसात्तुसारित्व वलभीपदेनैव गतार्थतया भवनपद व्यर्थमित्याशङ्क्यापि निरस्ता, भवनपदेन वलभ्या सहासस्थानत्वप्रतिपादनात् तत्प्रतिपादनेन च "स्वयङ्कात् कथं पुनः पुनर्गमो न दोषाय"इत्यदोषायमङ्काया निरासात्। मालती सविधनगरीरथ्यया तत्समन्निहितराजपथेन, अत्र नगरीपदेन रथ्याया अनेककोलूहलोद्दीपकविषयसमावेश उक्तः, एवच माधवस्य तत्र पुनः पुनर्गमनं न दोषावह, मालत्याश्च पुनः पुनस्तदालोकनेऽपि मालतीयत्नाकन्दोदय इति सूचितम्। भूयो भूयः पुनः पुनः, वीक्षया दर्शनं प्रति हृदता दर्शिता। पर्य्यटन्तं गतागतानि कुर्वन्त माधव साक्षात्प्रत्यक्षं नव नूतनं दाहानङ्गरोगपदमिति यावत्, काम कन्दर्प रतिः कामकान्तेव दृष्ट्वा दृष्ट्वा, वीक्षया तत्कटाक्षातिशयः सूचितः। पुनः पुनरवलोक्य गाढोत्कण्ठया दृढाकाङ्क्षया तत्कटाक्षादर्शनदुर्लभत्वात् उक्ता भावमकाङ्क्षिकाया यथा—"सर्वेन्द्रियसुखास्वादी सर्वासीति मनः स्त्रियः। तत्प्राप्तीच्छा समस्तास्तुत्कण्ठा कथयी विदुः॥ अन्य. सखीजनदत्तस्वसदाशावलोकन। अङ्गलालिर्म्मोरन्ति-,

---

(४८-४९) काम। मालतीर यात्रोसृष्टा नवधिका आमार निकट बलिताछे ये, निजभवनस्थित सर्वोच्चप्रासादेर उन्नत गवाक्षे बसिया मालती सन्निहित राजपथे बारबार गमनागमनकारी माधवके पुनः पुनः अवलोकन करतः दाहानलसंजात कन्दर्पदर्शने यदिव हाय कामज सन्ताप-वेदनाय अत्यन्त म्लानि अनुभव करितेछे।

अव। वाढं, अदो-ताए वि उक्कण्ठाविणोदणिमित्तं माहव-पडिच्छन्दअं आलिहिदं, तं लवङ्गिआए अप्प मन्दारिआए हत्थे णिहिदं दाव (ङ)।

काम। [विचिन्त्य।] सुविहितं लवङ्गिकया, यतो माधवा-नुचरः कलहंसकस्तां विहारदासीं मन्दारिकां कामयते, तदनेन तीर्थेन तत्प्रतिच्छन्दकं उपोद्घातेन माधवात्मिकमुपेयादित्यभि प्रायः। (५०)

(ङ) बाढं, अतस्तावदुत्कण्ठाविनोदनिमित्तं माधवप्रतिच्छन्दकमालिखितं तल्लवङ्गिकया अद्य मन्दारिकाया हस्ते निहितं तावत्।

श्रीनोरयविधिनम् ॥ अधिज्ञानुभुजालम्बि अपोच्छलनमालभं। अवद्यसुखरागस्य छेदोद्या-दहनदा च माधू ॥ उत्कण्ठानुभवा भावा जनयन्ते मानसीविदे." इति। सुखितसुखिते अति-स्नानिमापन्नैः मलीनसज्जापेनाप्यन्य कलुषितैरिति यावत्। खचितसुखितैरिति पाठे पूर्वं खचिते-रस्यैः इदानीं सुखितैः स्नानिमापन्नैरित्यर्थः। अङ्कैः अङ्गैः (खार्थे कः) साधयति चलितरतं सायतीत्यस्य खचितं लवङ्गिकयेति यथाश्रुतान्वयः। यद्वा रतिः दाडिमलतोत्पन्नं आर्यं साधान् समीक्ष्याङ्कैरनाम्नतया मालतीमाधवनवोद्वाहेऽस्मान्तीति साम्यमेवेन वाक्येन प्रतिपादनादपह्नवालङ्कारः. स्फुट एव। यदि च कामस्यानङ्गतया साधाराधुक्तिर्न विरुद्धमिति सूक्ष्मीक्ष्यते तदोत्प्रेक्षा सायानिवयवः। अनेन श्लोकेन मालत्या अभिलाषाख्या दशमी कामदशा दर्शिता, दशाश्च यथा दर्पणे—"अभिलाषचिन्ता स्मृतिगुणकथनोद्वेगसम्प्रलापाश्च। उन्मादोऽथ व्याधिर्जडतामतिरिति दशमावस्थाः कामदशा.॥ अभिलाषः स्पृहेति। मन्दाक्रान्ता छन्दः—"मन्दाक्रान्ताम्बुधिरसनगैर्मोभनौ तौ गयुग्म"मिति तल्लक्षणम्।

(च) अथेति। बाढम् लवङ्गिकया यत् कथितं तत् सर्वं चलितरागनुरक्ता मालतीत्यर्थः। अत्र पुनरुक्तमाह—यत इति। तथापि मालत्यापि उत्कण्ठाविनोदनार्थं उत्कण्ठाजनकाय, माधवप्रतिच्छन्दकं माधवस्य प्रतिकृतिम्। तत्प्रतिच्छन्दकं लिखितं लिखितं। अनयो माधव-फलकगतं करिष्यतीति कार्योपक्रमसम्भावनच्छन्देनैव सूचितः।

(ङ) अब। ইহা ঠিক, যেহেতু মালতী উৎকণ্ঠা-প্রশমনের নিমিত্ত মাধবের প্রতিকৃতি অঙ্কিত করিয়াছে এবং সেই প্রতিকৃতি আর্য লবঙ্গিকা মন্দারিকার হস্তে সমর্পণ করিয়াছে।

अव। अज्ज, माहवोवि कोदूहलमुप्पादिअ, मए अउत्तम-अणमङ्गसंदं मअरंदुज्जाणं पभादे अणुप्पेसिदो, तहिं किल मालदी गमिस्सदि, तदो अक्खोवदंसणं भोदुत्ति (च)।

काम। साधु वक्से, साधु! अनेन मल्लियाभियोगेन स्मारयसि मे पूर्व्वगिथां सौदामिनीम्। (५१)

(च) अद्य माधवोऽपि कौतूहलमुत्पाद्य मया प्रत्यूषमदनमहोत्सवं मदनोद्यानं प्रभातेऽनुप्रेषितस्तत्र किल मालती गमिष्यति, ततोऽक्ष्णोऽवदर्शनं भवतीति।

---

(५०) कामेति। (विचिन्त्य मन्दारिकाङ्के विषफलकविधानस्य तात्पर्य्यं विभाव्य, विहरतीति शेषः) सुविहितं साधु अनुष्ठितम्। विहारः सौगतप्रव्राजिकालयः, तत्र व्यापृता दासी परिचारिका विहारदासी तां मन्दारिकां कामयते अभिलषति। एतेन मन्दारिका-ऋजुसंभवयोः सन्दर्शनसुखमः सूचितः, तथाच ऋजुसंभवसङ्गेनैव प्रतिच्छन्दक मन्दारिका माधवं उपस्थिप्यतीत्याशयः। तत् तथात्व, अनेन निधानरूपेण तीर्थेन उपायेन, "तीर्थं शास्त्रावतारोपायनारोरजःसु च। अवतारविशुद्धाम्बुघाटोपाध्यायमन्त्रिषि"ति मेदिनी। उपोद्घातेन प्रस्तावेन अथवा उपोद्घातेन प्रकृतोपपादकेनेति तीर्थविशेषणम्। उपोद्घातायेति पाठे तु प्रकृतोपपादकार्थसिद्धार्थमित्यर्थः, इति अभिप्रायः। एतदेव मन्दारिकाङ्के विषफलकार्यस्य तात्पर्य्यमित्यर्थः।

(च) अद्येति। स्वानुष्ठितकार्य्यान्तरं कथयति—अद्योत्यादि। प्रकृतो मदनमहोत्सवो यस्मिन् तत् प्रकृतमदनमहोत्सवं, अनेन विशेषणेन विवाहप्रसाधकवसन्तकालः सूचितः। अनुप्रेषणे हेतुमाह—तत्र किलेति।

(५१) कामेति। मत्प्रिये मम प्रीतिविषये, अभियोगेन अत्यन्ताभिनिवेशेन। मे इति सम्बन्धे षष्ठी।

---

(५०) काम। (चिन्তা করিয়া) নবঙ্গিকা ভালই করিয়াছে, যেহেতু মাধবের অনুচর কলহংস বৌদ্ধ পরিব্রাজিকালয়ে ব্যাপৃত পরিচারিকা সেই মন্দারিকাকে কামনা করিতেছে, সুতরাং এই উপায়ে প্রসঙ্গতঃ সেই প্রতিকৃতি মাধবের নিকট পহুঁছিবে।

(চ) অব। অদ্য প্রাতঃকালে নানাবিধ কৌতূহল উৎপাদন করিয়া

অব। ভগবতি! সা সৌদামিনী অদৃশ্যা সমাসাদিতযত্নতোষ-মন্ত্রসিদ্ধিপ্রভাবা, শ্রীপর্বতে কাপালিকব্রতং ধারয়তি। (ঙ)

কাম। শ্রুতঃ পুনরিয়ং বার্ত্তা? (৫২)

অব। অস্তি, যত্র নগরে, মহাসমাণপ্পদেশে করালা নাম চামুণ্ডা। (চ)

কাম। অস্তি, যা কিল বিবিধজীবোপহারপ্রিয়েতি মাতঙ্গি-কানাং প্রবাদঃ। (৫৩)

(ঙ) ভগবতি। সা সৌদামিনী অদৃশ্যা সমাসাদিতযত্নসন্তোষসিদ্ধিপ্রভাবা শ্রীপর্বতে কাপালিকব্রতং ধারয়তি।

(চ) অত্রান্তরে নগরে মহাসমাণপ্পদেশে করালা নাম চামুণ্ডা।

(ঙ) ভগবতি। সমাসাদিত. প্রাপ্ত. আরাধনসন্তোষেণ: প্রভাবো যয়া সা। সর্বদা পরিগৃহীত-মরক্তপাল নৈবেদ্যমহাবিশেষ কাপালিক., তদনুষ্ঠেয়ং ব্রত ধারয়তি।

(৫২) কামেতি। শ্রুতেতি স্পষ্টং।

(৫৩) কামেতি। অস্তীতি চামুণ্ডেতি স্পষ্টং। সা চামুণ্ডা, কিল প্রসিদ্ধৌ, বিবিধা নানাজন্তবো মনুষ্যাদয় এব উপহারো বলয়: প্রিয়া যস্যা সা। অজৈব বধমাত্রে লালসোপহার' যুক্তিত:। মাতঙ্গিকানা মাতঙ্গযোগিনীনা প্রবাদ প্রসিদ্ধি:।

মাধবকেও আমি মদনমহোৎসব উপলক্ষে মদনোদ্যানে প্রেরণ করিয়াছি, মালতীও তথায় যাইবে, সুতরাং পরস্পরের সন্দর্শন ঘটিবে।

(৫১) কাম। সংপ্রতি! তুমি ভাল অনুষ্ঠান করিয়াছ, আমার প্রিয়বিষয়ে তোমার এই অভিনিবেশ আমার পূর্ব্ব লিখা সৌদামিনীকে স্মরণ করাইতেছে।

(ঙ) অব। সেই সৌদামিনী সম্প্রতি আশ্চর্য্য মন্ত্রসিদ্ধির প্রভাব লাভ করিয়া শ্রীপর্ব্বতে কাপালিকব্রত ধারণ করিয়াছে।

(৫২) এই বৃত্তান্ত কাহার নিকট হইতে শুনিলেন?

(চ) অব। এই নগরে মহাশ্মশানপ্রদেশে করালা নামে এক চামুণ্ডা আছে।

(৫৩) কাম। আছে, যেই চামুণ্ডা নানাবিধ নরপশু প্রভৃতি বলিপ্রিয়া বলিয়া মাতঙ্গিকদিগের প্রবাদ আছে।

अव। तहिं क्खु, सिरिपव्वदादो आअदस्स, रत्तिविहारिणो णादिदूरारण्णवासिणो साधअस्स, मुण्डधारिणोऽघोरघण्टणामधेअस्स, अल्लेवासिणी महाप्पभावा कवालकुण्डला णाम, अणुसव्वं समाअच्छदि, तदो इअं पउत्ती (ऋ)

काम। सव्वं सौदामिन्यां सम्भाव्यते। (ऋ)

अव। अलं दाव एदिणा। भअवदि! एसोवि सहअरो माहवस्स, बालमित्तो मअरंदो णाम, णंदणस्स बहिणिं मदय-न्तिआं जइ समुव्वहदि, तंपि णाम माहवस्स दुदीअं पिअं किदं भोदि। (ऋ)

(ऋ) तत्र खलु श्रीपर्वताद्आगतस्य रात्रिविहारिणो नातिदूरारण्यवासिनः साधकस्य मुण्डधारिणोऽघोरघण्टनामधेयस्य, अल्लेवासिनी महाप्रभावा कपालकुण्डला नाम, अनुसर्व्वं समागच्छति, ततः इयं प्रवृत्तिः।

(ऋ) अत्र तावदेतेन। भगवति। एषोऽपि सहचरो माधवस्य बालमित्रं मकरन्दो नाम, नन्दनस्य भगिनीं मदयन्तिकां यदि समुद्वहति, तदपि नाम माधवस्य द्वितीय प्रियं कृतं भवति।

(ऋ) अवेति। नातिदूर अर्थात् कपालकुण्डलायाः सन्निहितं यदरण्यं तत्र वसतः शीलं यस्य तस्य, साधकस्य मन्त्रसाधनोद्यतस्य, मुण्डधारिणः करशिरः कपालधारिणः कापालिकस्येति यावत्। अनुसर्व्वं सम्प्रत्यां। प्रवृत्तिर्व्वार्त्ता, मया श्रुतेति शेषः। "कापालिकास्तु षट्चक्र-नामानः समुदाहृता" इति भरतानुसारेण कविनात्र अघोरघण्टेति षट्चक्रनाम विहितम्।

(ऋ) कामेति। एतेन सौदामिन्या असाध्यं साधनीयमिति सूचितम्।

(ऋ) অব। অঘোরঘণ্টনামক রাত্রিবিহারী এক কাপালিক সন্ন্যাসী শ্রীপর্ব্বত হইতে আসিয়া চামুণ্ডার সন্নিহিত অরণ্যে বাস করিতেছেন, তাঁহার নিকট হইতে কপালকুণ্ডলা মহাপ্রভাবা নাম্নী তাঁহার সেই চামুণ্ডাসন্নিহিত আশ্রমে আসিয়া থাকেন, তাঁহার নিকট হইতে সৌদামিনীর বৃত্তান্ত শুনিয়াছি।

(ঋ) কাম। সৌদামিনীর পক্ষে সমস্তই সম্ভবপর।

काम। नियुक्तैव मया सखियसखी तत्र बुद्धरक्षिता। (५५)

अव। सुविहितं भगवत्या। (अ २)।

काम। [विचिन्त्य।] तदुत्तिष्ठ, माधवप्रवृत्तिमुपलभ्य, मालती-मेव पर्य्याय:। (५६) [इत्युभौ उत्तिष्ठत:।]

काम। [विचिन्त्य।] अत्युदारप्रकृतिर्भवती, तन्निपुणं निसृष्टार्थदूतीकल्पमन्वयितव्य:। (५७) सर्वथा—

(अ २) सुविहितं भगवत्या।

(अ) अनेति। एतेन अनुमानुवृत्तेन कापालिकवृत्तान्तकथनेन, इदं अर्थसिध्यर्थं:। माधवेति माधवप्रधानो निर्देश:, तेन माधवान्विसिध्यर्थं:, सिध्यर्थस्यात्मनेपदित्वात् तुं'त्त'। यदा मालतीविवाहो माधवस्य प्रियतया नन्दनमनिच्छा मदयन्तिकया सह मकरन्दस्य विवाहोऽपि प्रिय:, तदाप्यर्थसिध्यर्थमेव। अनेनोपायेनास्य मकरन्दस्य अर्थकर्त्री पताकास्थानीया भूयात्।

(५५) कामेति। नियुक्तैवेत्यनेन मयापि तत्पूर्वमेव चिन्तितमित्यर्थं: सूचित:। बुद्धरक्षितेत्यनेन सिद्धयौत्वं सूचितं, ततश्च तस्या दौत्ये नियोगो युक्त एवेत्यर्थ:।

(५६) कामेति। माधवप्रवृत्तिं मदयन्तीप्राप्तौ तयोरन्योन्यावलोकनं जातं, अनेति वार्त्तां श्रवणेन लब्ध्वा।

(५७) कामेति। विचिन्त्य "निसृष्टार्थो मितार्थश्च तथा सन्देशहारक:। आर्य्यैरभिहिता दूती दूत्यश्चापि तथा त्रिधा" इति दर्पणादौ दूतीनां त्रैविध्यदर्शनात् कीदृशं दौत्यमाचरणीयमिति विमृश्य, निसृष्टेत्यसौति शेष:। अत्युदारा अति गाम्भीर्ययुक्ता प्रकृतिर्यस्या: सा। गाम्भीर्यञ्च— "एषु प्रभावहर्षादिकारा हर्षक्रोधमदादिषु। आवेद्य गोपनञ्चैव तदगाम्भीर्यं प्रकीर्त्तितं"

(अ) অনেন। এই কাপালিকবৃত্তান্ত-কথনে এখন প্রয়োজন নাই। ভগবতি! মাধবের সহচর বালামিত্র এই মকরন্দ যদি নন্দনের ভগিনী মদয়ন্তিকাকে বিবাহ করিতে পারে (তবে) তাহাও মাধবের দ্বিতীয় প্রিয়কার্য্য করা হইবে।

(৫৫) কাম। আমার প্রিয়সখী বুদ্ধরক্ষিতাকে পূর্ব্বেই আমি সে বিষয়ে নিযুক্ত করিয়াছি।

(অ ২) অব। আপনি ভালই ব্যবস্থা করিয়াছেন।

(৫৬) কাম। (চিন্তা করিয়া) তবে উঠ মাধবের বৃত্তান্ত জানিয়া মালতী-কেই (যাইয়া) দেখি। (উভয়ের উত্থান)।

शरच्चन्द्रोत्सन्ना कामं कुमुदमिव तं नन्दयतु सा,
सुजातं कल्याणीभवतु कृतकृत्यः स च युवा।
वरीयानन्योऽन्यप्रगुणगुणनिर्माणनिपुणो,
विधातुर्व्यापारः फलतु च मनोज्ञश्च भवतु ॥ (५८) ॥

निपुणत्वञ्चैवं। तत् तस्मात् चतिगम्भीरप्रकृतित्वात् चतिमात्रौदार्यशालिनी मालती प्रायात्मनोऽपि स्वाभिप्रायं न स्वयं निवेदयतीत्यादिति यावत्, निसृष्टः समर्पितः सर्वः कार्यभारो यस्यामिति निसृष्टार्था या दूती तस्याः कस्याः व्यापारपद्धतिः निपुणं यथा स्यात्तथा तत्रयितव्यः चवलम्बितव्यः प्रायार्थे साङ्गीकर्त्तव्य इत्यर्थः। "उभयोर्भावमुन्नीय स्वयं वदति चोत्तरम्। सुश्लिष्टं कुरुते कार्यं निसृष्टार्थेषु सा मता॥" इति निसृष्टार्थदूतलक्षणोक्तलक्षणायां दूत्यामपि दर्पणकृतातिदिष्टत्वात् "नायिकाया नायकस्य वा मनोरथं ज्ञात्वा तदनुमतैव या कार्यं साधयति, सा निसृष्टार्था दूती" उच्यते।

(५८) साध्वसे शरदिति। कल्याणी मनोहराकारगुणमयीत्यर्थशालिनी सा मालती शरच्छ्रोत्स्ना शारदीया चन्द्रिका कामं यथं कुमुदमिव सुजातं शोभनजन्मानं कामं यथा "चन्द्रश्रीभोगसम्भूतं विद्धं यस्य न विद्यते। देवैः साध्यपरैः सापि स कान्त इति कीर्त्यते॥" इति मतीलक्षणलक्षणसम्पन्नं वा तं साधुं नन्दयतु समीक्षयतु। स च युवा कल्याणी विवाहकल्याणयोगी सन् कृतकृत्यः कृतार्थो भवतु। (उभयोरनुरागित्वेन स तां नन्दयतु, सा च कृतकृत्या भवतु इत्यर्थोऽपि चकारेण द्योत्यते। युवेत्यनेन साधुत्वानुरागाधिक्यसम्भवः सूचितः) एवं सति कल्याणोऽनयोः परस्परस्य प्रगुणाः अनुरूपा ये गुणास्तेषां निर्माणे निपुणः कुशलः अत एव वरीयान् श्रेष्ठः विधातुर्व्यापारः प्रयत्नः फलतु सफलो भवतु, मनोज्ञः सर्वजनग्राह्यश्च भवतु। कल्याण्यानुरूपनिर्माणस्य साहश्यौज्ज्वल्यघटनमेव फलं, तदभावे तद्विरूपत्वमेव अनर्थ इति भावः। यथा शरच्चन्द्रिका कुमुदं नन्दयति, तथा मालती तं नन्दयतु इति साम्यलाभेनैव वाक्येन प्रतिपादनादुपमालङ्कारः। तल्लक्षणं यथा दर्पणे—"साम्यं वाच्यमवैधर्म्यं वाक्यैक्ये उपमा द्वयोः" इति मिश्रविशेषितम्।

---

(५८) কাম। (চিত্তা করিয়া) মালতীর স্বভাব অতীব উদার, (অর্থাৎ কিছুতেই সে তাহার মনের ভাব ব্যক্ত করিবে না) সুতরাং নিপুণভাবে নিসৃষ্টার্থ-দূতীর পদ্ধতি অনুসারেই (অর্থাৎ নিজের বিবেচনানুসারেই) কার্য্য করিতে হইবে।

[इति निष्क्रान्ते (५८) विष्कम्भकः] (६०)

[ततः प्रविशति गृहीतचित्रोपकरणः कलहंसः ।] (६१)

काल । कहिं दाणिं तुलिदमअरन्दअरुआवलेअविब्भमाबहि-
त्तमालदीहिअपमाइअं णाइमाइअं पेक्खिस्सं । [परिक्रम्य ।]

---

(५८) मालतीदर्शनकौशिके इति शेषः ।

(६०) विष्कम्भकः तदाख्यः अंश विशेष, तल्लक्षणं यथा दर्पणे—"इतवृत्तिप्रसाधानां सूच्यांशानां निदर्शकः । अङ्किद्वारेण विष्कम्भ आख्यातश्चतुर्विधः ॥ मध्येन मध्यमाभ्यां च द्वाभ्यां चोत्तमयोजितः । शुद्धः स्यात् स च सङ्कीर्णो नीचमध्यसमन्वितः ॥" इति । अयञ्च विष्कम्भकः नीचमध्यमाभ्यामवतारितत्वात् "सङ्कीर्णः" । अनेन विष्कम्भकेण राजसुतस्य मदनिकायाः, मालत्याश्च तत्प्रतिविधानं भूरिवसुना मालतीमाधवीयं प्रविवाहसम्पादनाय कामन्दक्या निर्योजनाय कामन्दक्या च तत्साहाय्यकरणायावतारितायाः विदूषकस्य कामन्दकी-भूरिवसुदेवरात्रयोः विवाहमङ्गलसाहचर्यञ्च अत्र भूरिवसुदेवसूत्रयोः परस्परापत्यसम्बन्ध-सम्बन्धिपदस्य सौदामिन्या देवरालम्बनत्वञ्च पञ्चवटे माधवागमनस्य, परस्परसन्दर्शनेन मालतीमाधवानुरागोत्पादस्य कलहंसमन्दारिकानुरागादेर्घातीयस्य, माधवस्य मालतीमाधवी-सन्देशोपलब्धेश्च सौदामिन्या पत्राभ्यासाधनीयत्वस्य विदूषकप्रवेशेन कलहंसप्रवेशादेः सूचनमित्यनुसन्धेयम् ॥

(६१) तत इति । गृहीतं चित्रं चित्रफलकमेव उपकरणं उपजीव्यं येन स तथोक्तः, कलहंसकः तन्नाम्ना माधवानुचरः, [कलहंसो राजहंस तस्य शरत्कालीनत्वस्य प्रसिद्धत्वेऽपि योगिनीप्रभावात् वसन्ते निर्मित इति नामानिधायी सूचनम्) अस्य चेटस्य प्रवेशः प्रवेशः, "माधवानु-चरः कलहंसक" इत्यङ्के कामन्दकीवचनेन सूचितः ।

---

(५८) शरत्कालीन ज्योत्स्ना यেমন মনোজ্ঞ কুমুদকে প্রফুল্লিত করে, কলাপ-জ্ঞানও মালতীও সেইরূপ সহসাজাত সেই মাধবকে আনন্দিত করুক, যুবক মাধবও (তাহাতে) কৃতার্থ হউক, এবং পরস্পরের তুল্যগুণগরিমা নির্ম্মাপ-নীয় বিধাতার উৎকৃষ্ট চেষ্টা ও (তুল্যসমাগমবারা) মনোজ্ঞ ও সফল হউক । (মালবিকা ও অবলোকিতার প্রস্থান ।)

(৬১) (চিত্রফলকরূপ উপজীব্যসহিত কলহংসের প্রবেশ)

परिस्संनोह्मि. जाव इमस्मिं उज्जाणे मुहुत्तं विस्समिअ, मअरंदसहअरं णाहमाहवं पेक्खिस्सं (ट) [इति प्रविश्योपविशति ।]

[ततः प्रविशति मकरन्दः]

मक । कथितमवलोकितया मदनोद्यानं गतो माधव इति, भवतु, तत्रैव गच्छामि । [परिक्रम्य दृष्ट्वा च ।] दिष्ट्या अयं वयस्य इत एवाभिवर्त्तते । [निरूप्य ।] अस्य तु (ठ२)

गमनमलसं, शून्या दृष्टिः, शरीरमसौष्ठवम्,
ग्रसितमधिकं, किं न्वेतत् स्यात्प्रियान्यदितोऽथवा ।

(ट) कुवेदाणीं तुलिअमअरद्धअरूवावलेवपरिहअमालईहिअअमाहाप्पं णाहमाहवं पेक्खिस्सं । परिस्संनोह्मि जावदिट्ठोद्याणे मुहुत्तं विस्समअ मअरन्दसहअरं णाहमाहवं पेक्खिस्सं ।

(ट) कुवेति । तुलित । तुलितः खर्वीकृतः मकरध्वजस्य कन्दर्पस्य रूपावलेपः सौन्दर्यगर्वो "अवलेपः स्तुतौ गर्वे" इति मेदिनीतः । येन तादृशेन रूपविभवेन सौन्दर्यविलासेन अवधिरितं तिरस्कृतं मालतीहृदयस्य माहात्म्यं माधुर्यं येन तं, मालतीहृल्लिखितमाधवप्रतिकृति-सन्दर्शनेनावधारितो मालतीहृदयदर्शनविलम्बना मालतीधैर्यच्युतिरनेन विशेषवेन सूचिता । मकरन्दः सहचरो यस्य तं, अनेन मकरन्दपदेयः सूचितः । क्वचित् पुस्तके मकरन्दमन्दनमिति पाठः, मकरन्दस्य नन्दनं आनन्दजनकमिति तदर्थः । मकरन्द. पुष्परसः, तस्य माधवस्य वसन्तस्य सहचरत्वं युक्तमेवेति यत्र माधवसहचरस्य मकरन्देति नाम युक्तम् । नाथं प्रभुं माधवं प्रेक्षिष्ये द्रक्ष्यामीत्यर्थः ।

(ठ२) कथितमित्यादि । कन्दर्पनिकेतनोपशोभितसुधाम मदनोद्यानं । एतेन मद्दारो-द्यानविभावत्वं दर्शितं । दिष्ट्या भाग्येन, इतीवाभ्यतिरिक्तमन्ययमेतत् । वयस्यः, वयसा तुल्यः समवयस्क इत्यर्थः (वयस् शब्दात्तुल्यार्थे य.), इतः अस्मिन् अभिवर्त्तते आगच्छति । (निरूप्य निर्वर्त्य) अस्येत्यस्य श्लोकस्थितेन गमनमित्यादिना अन्वयः ।

(ट) कर्म । যিনি কন্দর্পের রূপগর্ব্ব-খর্ব্বকারী স্বীয় সৌন্দর্য্যচ্ছটায় মালতীর ধৈর্য্য বিলোপ করিয়াছেন, সেই প্রভু মাধবকে কোথায় দেখিতে পাইব ? (বিচরণ করিয়া) বড়ই পরিশ্রান্ত হইয়াছি, এই উদ্যানে মুহূর্ত্তকাল বিশ্রাম করিয়া মকরন্দসহচর প্রভু মাধবকে দেখিব (প্রবেশানন্তর উপবেশন) ।

(মকরন্দের প্রবেশ) ।

भ्रमति भुवने कन्दर्पाज्ञा विकारि च यौवनम्,
सलिलमधुरास्ते ते भावाः सिध्यन्ति च धीरताम् ॥ (१२)

---

(११) भ्रमतीति। अत्र भ्रमणं भवनं सर्वं व्याप्नुवत् प्रसरणमिति यावत्। एतेनास्यास्तत्रो अधिकारी सूचितः। लक्षणं यथा दर्पणे—"चालनं भ्रमणमौर्ध्वमूर्ध्वं भ्रूकाक्षिनासादिकादिषु" इति। सूत्रं वाक्यार्थहेतुकाव्यलिङ्गं। तदाकारोऽर्थः—"निरन्तरं भ्रमणशीला च आज्ञाप्रसरणशीलता। तथा भ्रमणशीलेन सूत्रेण हृदिस्थत्वात्। सूत्रेण हृदिः ज्ञात्वा किन्न सर्वोपरमत्वमिति" इति च। एतेन विलासस्तत्रो अधिकारी सूचितः, लक्षणं यथा दर्पणे—"स्यात् विलासो विलासाद्यैः सूत्रेण चारुतायुक्त" इति, तथा शरीरं सर्वोपरि विलसत् स्यादिति यावत्। एतेन स्थानस्तत्रो अधिकारी सूचितः, लक्षणं यथा दर्पणे—"स्थानावस्थानसत्तायनृविचारादिकृत्। स्यादनिर्दिष्टपात्रस्य कार्यान्तरनियुक्तादिरु" इति। एवं चरित्रं स्वभावविलसत्वं वर्तते विलासः, एतेन भ्रमविलासमोहादयो व्यभिचारिणः विलासस्य तत् साधारण्यात्। एतेन चित्रं-भावस्वभावानुरूपत्वाच्चा इतीदं स्थानमुद्रा सूचिता। तदाकारोऽर्थः—"हृदयेनैवं चित्रितैरयोऽनुरूपविचित्रितैः। मदे यौवनकार्याणां कथितानु कृतिर्देवा" इति। अत्र चित्रं पूर्वमनिर्वचनीयत्वात्—किं वर्णयितुमादिवा। तु चित्रं एतत् भ्रमणभ्रमणादिकं किं किं निमित्तं स्यात्, यौवनादि निमित्तं स्यात्तनिमित्तं वेति वितर्कार्थः। अथवा प्रकारान्तरे इतः स्यात्तत्वत् किं स्यात् चित्रमिति निमित्तनिमित्तैः। किं शब्दो निर्णये। एतादृशनिश्चये हेतुं दर्शयति—भ्रमतीति। सूत्रेण भ्रमति कन्दर्पाज्ञा मदनानुशासनं स्यात्तभाव इति यावत्, भ्रमति भ्रवतिरूपता विचरति। यौवनं—"रतिव्यापारसहनो मनोभवेन भ्रमता। विद्यते सुखमावो भ्रमद्वयौवनमुदाहृत"मिति लक्षणलक्षितं विकारि विकारजननशीलं। सलिलमः सुन्दरः मधुरा मनोज्ञाश्च (भ्रकृतिमधुरा इति पाठे भ्रकृत्या स्वभावेन मधुरा इत्यर्थः) ते ते भावाः स्त्रीनीलभ्रमणमनोज्ञानविलासादयः धीरतां धैर्यं सिध्यन्ति भ्रवहारयन्ति। धैर्यलक्षणं यथा—"भ्रापदैनानुपहता सर्वोर्वं-भ्रविक्रियता। स्यात्तात्त्विकी विपद्यनिर्दैन्यैनिमनिर्वोधते।" भ्रत्र भ्रमतीभ्रनेनास्यतिहसदृतिलं सूत्रपदेन सर्वदैवस्थापिता, भ्राज्ञापदेनापरिहार्यत्वं. यौवनपदेन मादकत्वादीकारश्च सूचितः।

(७२-७७) भ्रर्थ। अवलोकिता वनिताबृन्द, माधव मदनोद्यानে গমন করিয়াছেন, তবে আমিও সেইখানেই যাই। (বিচার ও অবলোকন করিয়া) আজ্ঞা-ক্রমে বসন্ত ও দিকেই আসিতেছেন। (বিশেষরূপে নিরীক্ষণ করিয়া) ইহার গমন অলসতাপূর্ণ, দৃষ্টি বাহ্যার্থগ্রহণে অসমর্থ,—অত্যধিক দীর্ঘ নিশ্বাস বহি-তেছে, ইহার কারণ কি? অথবা কামদেব ভিন্ন আর কি কারণ হইতে পারে?

[ततः प्रविशति यथानिर्दिष्टो माधवः।] (६४)

माधवः। [स्वगतं]। (६५)

तामिन्दुसुन्दरमुखीं सुचिरं विभाव्य
चेतः कथं कथमपि व्यपवर्त्तते मे।
लज्जां विजित्य, विनयं विनिवार्य्य, धैर्य्य-
मुन्मथ्य, मन्थरविवेकमकाण्ड एव ॥ (६६)

तथाच कामक्रतनैवेतदमनस्त्वादिकमिति स्थितम। अत्र प्रतिभोत्थितस्य कामरोगादि-निमित्तत्वमन्दे इत्य निश्चयान्तया निश्चयान्त सन्दे इ कामाख्या द्योतयं इति अमसगमनादीनां सङ्गतं द्योतकं नोपन्यासात् समुच्चयवाचकः। तत्रचय यथा दर्पणे—"सन्दे इः प्रश्नेऽनास्य संशय: प्रतिभोत्थित:। यद्वो निश्चयगर्भोऽसौ निश्चयान्त इति त्रिधा" ॥ "समुच्चयोऽवधारिक्रिन् यति कार्य्यस्य साधके। खली कपोतकाख्यायात्तनकरः स्यात् परोऽपि चेत" ॥ इति। हरिणी-छन्दः। तल्लक्षणं यथा छन्दोमञ्जर्य्यां—"न स म र स लाग: षड्भिर्दैर्घैर्हरिणी मते"ति ॥

६४। यथानिर्दिष्टः—गमनमित्यादिनावर्णितमदनविकारलक्षणः।

६५। स्वगतलक्षणं यथा भरतयाज्ञे—"यत् स्यात् न सर्व्वस्य स्वगतं तदिहोच्यते" ॥

६६। चन्द्रमुखत्वादिकं दर्शयति—तामिति। इन्दुवत् इन्दोरिवं वा सुन्दरं मुखं यस्याः तथाभूतां तां चिरदृष्टां माधवीं सुचिरं बहुकालं विभाव्य विषयान्तरपरिहारेण चिन्तयित्वा अथ अकाण्ड एव असमय एव (दर्शनकाल एव लज्जावर्जनमौचित्यादित्याशयः;) मन्थरः मन्दीभूतः विवेकः कर्त्तव्याकर्त्तव्यज्ञानं यस्य तादृशं (मन्थरविवेकं यथास्यात्तथेति क्रियाविशेषणं) मे मम चेतः (कर्त्तृ) लज्जां त्रपां "मनः सङ्कोचनं लज्जा स्त्रीणौचित्यप्रवर्त्तना"दित्युक्तलक्षणामिति यावत्। विजित्य निरस्य विनयं प्रश्रयं विनिवार्य्य परित्यज्य धैर्य्यं सङ्कल्पदार्ढ्यं उन्मथ्य उन्मूल्य कथमपि अतिकष्टेन व्यपवर्त्तते निवर्त्तते तदेकाग्र्यातिशयतया केवलं तामेवानुध्यातुमीहत इत्यर्थः। इह तामित्यनेनानुध्यातिः, इन्दुसुन्दरेत्यनेन गुणकीर्त्तनं विभाव्येत्यनेन चक्षुः प्रीतिः, कथमपीत्यनेनौत्सुक्यं;

কামদেবের আজ্ঞা জগতের সর্ব্বত্র (অপ্রতিহত ভাবে) বিচরণ করিতেছে। যৌবনও স্বভাবতঃই বিকার জন্মাইয়া থাকে, রমণীগণের রমণীয় সৌন্দর্য্যাদি মধুরভাবেও ধৈর্য্যচ্যুতি জন্মায় (সুতরাং ইহার এইরূপ অবস্থা কামপীড়ন-জন্য তাহাতে সন্দেহ নাই)।

(৬৪) (মদনবিকারভাবাপন্ন মাধবের প্রবেশ।)

आश्चर्यम्—यद्विस्रम्यस्तिमितमस्तमितान्यभाव-
मानन्दमन्दमनुतप्तवनादिवाभूत्।
तत्सन्निधौ तदधुना हृदयं मदीय
मङ्गारसुप्तिमिव व्यथमानमास्ते ॥ (६७)

मकः। सखे! माधव! इत इतः। (६८)

लज्जा विस्रम्भेत्यनेनोक्तम्, अन्यत्रविवेकस्मित्यनेन अदर्शनमेकस्मिन् अवस्था दर्शिता, ■■ लज्जायाश्चोन्मादस्य। अनन्तरमाकस्मिकयोरादावेवोत्कोचनमनुरागस्यातिहर्षतायामिति आकस्मिकम्। अलक्षणमिदं लक्षणम्।

६७। यदिति। अन्यदीय मम हृदयं मन. सखाः सन्निधौ विस्रम्भेण तदीयाद्यालापालोकाल्लाभ-सम्दर्शनजनितेनातरेण विस्मितं विस्मृतं, इतेन अन्योन्यैः। अनएवाकस्मिन' विस्मितः अन्य विषयातिरिक्तः भावो धर्मो यस्य तत्, अनेन अकस्मोक्तिः। अतो अमृतसेकादिव सुधासिक्तादिव आनन्दं न अनिर्वचनीयसुखेन सन्दं सम्यक् अभूत्, अनेनानुरागाधिक्यात्सन्दर्शनजनितमानसविभ्रम-सम्भवता दर्शिता। तदेव हृदयं अधुना तत्सन्निधौ अङ्गारैश्च अन्यत्तत्ताडेन सुप्तिं संस्फुटमिव व्यथमानं दूयमानं सत् इत्याश्चर्यं, यत्तमायैवेव तत्सन्निधानात्सन्निधानमिव्यथनमेव वैलक्षण्य-मिति तदत्राश्चर्यमित्यर्थः। न च विस्रम्भात् सन्दर्शनात्सन्दर्शनाच्च सुखदुःखे अन्यत्रविस्रं एवेति अत्राश्चर्यमाह, सङ्कल्प इति यत्तमायैवं तत्सन्निधानं तत्सन्निधौ अन्यत्तुल्यतादृश्यत्तत्ताडनपरिवाहपरम्परा साधनस्य "अयमिदमकस्मादापतित" मित्याश्चर्यमात्रत्वादिति अलक्ष्यम्। अतोऽपि अलक्षणमिदं लक्षणम्।

६८। आसन्नतामिति शेषः। अनेनाङ्गारेण मालतीमतल्लिकतया मालत्याश्चर्यदर्शनात्तदर्शनेन माधवो मत्सन्दं न सन्दमिति सूचितम्।

(६६-६७) माधव। (स्वगत) সেই চন্দ্রমুখীকে বহু সময় চিন্তা করিয়া কিংকর্তব্যবিমূঢ় আমার চিত্ত কেন অসময়েই লজ্জায় অঞ্জলি ক্রিয়া ও বিনয় পরি-ত্যাগ করিয়া ধৈর্য্য উন্মূলিত করত অতি কষ্টে নিবর্ত্তিত হইতেছে?

(৬৭) কি আশ্চর্য্য!! আমার সেই চিত্ত তাহার সন্নিধানে বিস্রম্ভাভিভূত হইয়া অন্য সমস্ত ভাব পরিত্যাগ করিয়াছিল এবং অমৃতসেকের ন্যায় (অমৃত-সেকে আনন্দাভিভূতের ন্যায়) আনন্দাভিভূত হইয়াছিল, আমার সেই চিত্ত সম্প্রতি (তাহার অসন্নিধানে) অঙ্গারকাষ্ঠ সংযুক্তের ন্যায় ব্যথিত আছে।

(৬৮) মকরন্দ। সখে! মাধব! এদিকে এদিকে।

माध। [परिक्रम्य]। कथं, प्रियवयस्यो मम मकरन्दः। (६८)

मक। [उपसृत्य।] सखे! ललाटन्तपस्तपति घर्मांशुस्तदस्मिन् उद्याने मुहूर्त्तमुपविशावः। (७०)

माध। यथा प्रियवयस्याय रोचते (७१)। [इत्युभावुपविशतः]।

कल। [दृष्ट्वा।] कधं, मअरंदसहअरो इदं च्चेअ बालबउलुल्लाणं अलङ्करेदि माहवो, ता दंसेमि, मअणवेअणाखिज्जमाणमालदीलोअणसुहावहं अत्तणो से पडिच्छंदअं। अहवा मुहुत्तं विस्सामसोक्खं दाव अणुहोदु। (ठ)

(ठ) कथं मकरन्दसहचर इदमेव बालबकुलोद्यानमलङ्करोति माधवस्तदहं यामि मदनवेदनाखिद्यमानमालतीलोचनसुखावहम् आत्मनोऽस्य प्रतिच्छन्दकम्। अथवा मुहूर्त्तं विश्रामसौख्यं तावदनुभवतु।

७०। ललाटं तपतीति ललाटन्तपः (ललाट+तप+खश्, "चमूर्य्यललाटयोर्द्वितपी"ति सूत्रम्) मध्यस्थापकः नभोमध्यवर्त्तीति यावत्। घर्मांशुः सूर्य्यः तपति सन्तापयति।

७१। प्रियवयस्यायेति "रुच्यर्थानां प्रीयमाण" इति सम्प्रदाने चतुर्थी।

(ठ) कथमित्यादि। मकरन्दः सहचरः सहगामी यस्य सोऽयं माधवः, बालबकुलानां अपरिपक्वकेसराणां उद्यानं उपवनं अलङ्करोति भूषयति। तत् तस्मात् मदनवेदनया अरसत्तापेन खिद्यमानायाः खेदमनुभवन्त्याः मालत्याः लोचनसुखावहं नेत्रप्रीतिकरं अस्य माधवस्य आत्मनः स्वस्य प्रतिच्छन्दकं प्रतिकृतिं, मत्सदृशिकया दत्तमित्यर्थः, दर्शयामि माधवमिति शेषः। अत्र मकरन्देन पुष्परसेन सहचरो माधवो वसन्तः बालबकुलमलङ्करोतीति वस्त्वर्थोऽप्यनुसन्धेयः। अनुभवतु इति पश्चाद्गमिष्यामीति शेषः, चित्ते सुस्थित एव दर्शनं युक्तमित्याशयः।

---

(७९) माध। (परिভ্রমণ করিয়া) এ কি আমার প্রিয় বয়স্য মকরন্দ?

(৭০) মক। (সমীপে যাইয়া) সখে! সূর্য্যদেব নভোমধ্যবর্ত্তী হইয়া সন্তাপ দিতেছে, এই উদ্যানে কিছুকাল উপবেশন করি।

(৭১) মাধ। প্রিয় বয়স্যের যেরূপ অভিরুচি। (উভয়ের উপবেশন)

मक। तदस्यैव तावत् उच्छ्वसितकुसुमकेसरकषायगौतलामोद-वासितोद्यानस्य काञ्चनपादपस्याधस्तादुपविश्यावः। (७२)

[तथा कुरुतः।] (७३)

मक। वयस्य! माधव! अद्यैव तावत्सकलनगराङ्गनाजन-प्रवर्त्तितमङ्गोत्सवाभिरामसदमोद्यानयात्राप्रतिनिवृत्तमन्याहर्मं भवन्त-मवधारयामि, अपि नाम ममागमतीर्णोऽसि रतिरमणवाण-गोचरम्? (७४)

७२। उच्छ्वसितानां विकसितानां कुसुमानां पुष्पाणां केसरैः किञ्जल्कैः कषायः सौरभिः (कषायः सुरभौ सौरभिरुच्यते मेदिनी) गौतलः मैरेयगुडसम्भवश्च यः आमोदः गन्धः तेन वासितं सुरभीकृतं उद्यानं येन तस्य। यद्यपि गन्धे कषायशब्दप्रयोगेण सौरभ्यादिकं न वर्णते तथापि गुणविरहागमापि बहुलकर्पूरवत्त्वेन कषायादिरूपत्वं न तस्य विपक्षितमिति दृष्टमेवोपपद्यते। यद्वा किञ्जल्कानां यः कषायो निर्यासः (निर्यासेऽपि कषायोऽस्त्रीत्वमरः) तस्य गौतलः बहुलकटः यः आमोदः तेन वासितं सुगन्धं येन तथोक्तस्य। काञ्चनपादपस्य चम्पकतरोः।

७३। तथाकुरुतः—तादृशतरोरधस्तादुपविशतं इत्यर्थः।

७४। वयस्येति। "समागतरामवसतीरङ्गनाकृतलक्षणं"। विपत्पतितिक्रियादयो वयसः परिजीर्णित"इति वयस्यशब्दम्। सकलेन नगराङ्गनाजनेन प्रवर्त्तितः कृतः यो मङ्गोत्सवः

७२। अन्वय। (देखिয়া) এ কি মকরন্দসহচর মাধব এই বাল-বকুলোপবনই অলঙ্কৃত করিতেছেন। তবে মদনবেদনাগ্রাধিত মালতীর নেত্রপ্রীতিকর ইহার নিজ প্রতিকৃতি দর্শন করাই। অথবা ক্ষণকাল বিশ্রামসুখ অনুভব করুন। (পরে দেখাইব।)

(७२), मक०, पदे, विकसित, कुसुमकिञ्जल्कनिर्यासेन, सुरभीकृते, चम्पक, तरौ, যে উদ্যান আমোদিত করিতেছে, তাদৃশ এই চম্পকতরুর অধোদেশে উপবেশন করি।

(७३) (সেই তরুর অধোদেশে উপবেশন করিল।)

[माधवो लज्जया अधोमुखस्तिष्ठति।] (७५)

मक। [विहस्य।] तत्किमवनतमुखमुखपुण्डरीकस्तिष्ठसि? (७६)

पद्य—

अन्येषु जन्तुषु रजस्तमसावृतेषु,
विश्वस्य धातरि समः परमेश्वरे च।
सोऽयं प्रसिद्धविभवः खलु चित्तजन्मा
मा लज्जया तव कथञ्चिदपङ्क्तिभूत्॥ (७७)

देव अभिरामा मनोज्ञा या मदनोद्यानयात्रा तत: प्रतिनिवृत्तं प्रत्यागतं भवन्तं अन्याद्दं विलक्षणावस्थं अवधारयामि। अपि: प्रश्ने सामस्त्यावगमायां, रतिरमणस्य कामदेवस्य मानगोचरं मानलक्षणां, गोचर इति भावप्रधानो निर्देश:, गतागतं अवस्थौंऽसि प्राप्तोऽसि

७६। अवगतं विदितभावोऽस्मीति लज्जयाऽधोमुखं अतएव मुग्धं किं कर्तव्यतामूढं मुखपुण्डरीकं यस्य तादृश:, अत्र विरहपाण्डुतयापि मुखस्य पुण्डरीकसाम्यं बोध्यम्।

७७। लज्जाया: त्रिलोकरक्षाव्र अरपरवशतायाः सार्वत्रिकत्वं दर्शयति—अन्येष्विति। य: रजस्तमोभ्यां आवृतेषु रजस्तमोबहुलेष्वित्यर्थ:, अन्येषु जन्तुषु, तथा विश्वस्य संसारस्य धातरि सृष्टरि ब्रह्मणि परमेश्वरे महादेवे च समस्तुल्यव्यापार: अवैषम्येणाप्रतिहतप्रभाव इति यावत्, सोऽयं चित्तजन्मा चित्तादजन्म यस्य स मनोभव: खलु निश्चितमेव प्रसिद्धविभव:, अत्र विधेयस्य प्रसिद्धविभवस्य समासे गुणीभूतत्वादविमृष्टविधेयांशाख्यो दोष:। विख्यातविक्रम:, स ब्रह्मादीनामजेय: का कथा अन्येषामित्याशय:। तस्मात् लज्जया कथञ्चिदपि तव अपङ्क्ति-

---

(७५) मक। वयस्य माधव! অগ্রই নগরবাসী প্রমত্ত স্ত্রীজনপ্রবর্ত্তিত মহোৎসব দ্বারা অতি মনোহর মদনোদ্যানযাত্রা হইতে প্রতিনিবৃত্ত (হইয়াছ পর) তোমাকে অন্যরূপ দেখিতেছি, তবে কি তুমি অল্প পরিমাণে মদনবাণের লক্ষ্য হইয়াছ?

(৭৫) (মাধব লজ্জায় অধোমুখ হইয়া রহিলেন।)

(৭৬) মক। (হাস্য করিয়া) তবে মুখপদ্ম অবনত করিয়া রহিলে কেন?

माध। वयस्य! किं न कथयामि शृण्वतां। गतोऽहमलोकितानितकौतुकः कामदेवायतनं, तत्र च इतस्ततः परिक्रम्यावलोक्य च परिमलमुद्भासितमदिरामोदमधुरपरिमलाकृष्टसकलमित्रदलिपटलसङ्कुलाकुलितवकुलमुकुलावलीमनोहरामरणरमणीयसमाकृष्टभुवो बालवकुलस्य बालबालपल्लविसरे स्थितः। तत्र च यदृच्छया निरन्तरनिपतितानि कुसुमानि आदाय विदग्धरचनामनोहरां स्रजमभिनिर्मातुमारब्धवानस्मि। अनन्तरञ्च सञ्चारिणीव देवस्य मकरकेतोर्जगद्विजयवैजयन्तिका, निर्गत्य गर्भभवनादुज्ज्वलविदग्धमुग्धनेपथ्यविरचनाविभाविनकुमारीभावा महानुभावप्रकृतिः भगवदारण्यदेवता काचित् तत्र एव आगतवती। (७८)

एवम्भूतः यौवनमिति यावत्, आस्तां नैव भवतु अन्यथा इतीवाराङ्कयते इति भावः। दुर्लभैव भवतु सत्या न कार्येति सत्या परिक्रम्य सर्वं कदलीमिश्रायः।

७८। वयस्येत्यादि। किं न कथयामि? सर्वविश्वासभाजने तयि मालतीसम्बन्धिनिमित्तम्। अवलोकितानि कलित कौतुक मदनोत्सवादौ यस्य तादृशः अह कामदेवायतनं मदनोद्यानं गत, अमुनेति शेषः। परिक्रम्य परिक्रमणकृत्वेत्यर्थः, स्थित इत्यनेनान्वयः, इतो यत्रतो, परिक्रमादेव स्थित, मलयकन्दलालवङ्गादिन्दाश्रय, ('उद्भासितः स्फुरन् दृ मदिरामोदसहत् तेन या मधुरः मनोज्ञः (पादाघातादयोको विनश्यति यदुक्त योषितालक्तकार्द्र रिलिप्तसिद्धा यदुक्तोद्भासन प्रति मदिरामोदस हेतुत्वमहत्वमनोज्ञहेतुतापि दुर्लभसुलभेन) य परिमलः सुमनस (सुमनस: परिमल इति विश्व.) तेन आकृष्ट यत् सकलानां मित्राणां भ्रमरा पटल समूहं तेन सङ्कुला व्याप्ता अतएव आकुलिता या बकुलमुकुलावली विकसत्कोरकपङ्क्ति वैकरकेलिवापी, तेन मनोहरामरणं तेन रमणीयस्य मनोहरस्य भगवदारण्यस्य प्राङ्गणस्थल, एतेनोद्भटपुष्पावचयोचितदेशत्वं सूचितं। बकुलशब्दस्य मूर्धन्यादित्वं छन्दोनुरोधात् तच्च भाषितविशुद्धिप्रदर्शनायैव। बालबकुलस्येति बालत्वविशेषणं कुसुमानामनुपलब्धे

---

(११) ब्रह्म-शम्भोरहल सामान्यतः प्राणी विश्व के सृष्टिकर्ता ब्रह्मा एवं महेश्वर को भी जिन्होंने समभाव विजय कर लिया है, उन कामदेव का प्रभाव अति सुप्रसिद्ध है। (अतः एव) लज्जावशतः (उन कामदेव के) गोपन होने में संशय नहीं है।

সা রামণীয়কনিধেরধিদেবতা বা
সৌন্দর্য্যসারসমুদায়নিকেতনং বা।

মূচনার্থং। আবদ্ধালং মূলমতপরিখা তৎপরিসরে তৎসন্নিহিতমূমৌ। "স্যাদালবালমাবাল-মশ্রসা যত্র বারণং" "পর্য্যন্তস্তু পরিসর" ইতি অমরঃ। তত্র উপবেশনস্থানে নিরন্তরপতিতানি অজস্রবিচলানি কুসুমানি যদৃচ্ছয়া স্বচ্ছন্দতঃ আদায় গৃহীত্বা বিদগ্ধা নিপুণা যা রচনা তয়া মনোহরাং রচনানৈপুণ্যেন মনোমোহনকরীমিত্যর্থঃ। স্রজ মালাং অভিনির্ব্বর্ত্তুং গ্রথিতুং আরব্ধবান্ অস্মি। মালানির্ব্বর্ত্তনং কামশাস্ত্রজ্ঞানস্যাপনায়ৈবমনুসন্ধেয়ম্। দৈবস্য মকর-কেতোঃ মকরধ্বজস্য কামদেবস্যেতি যাবৎ। সঞ্চারিণী সমনশীলা জগদ্বিজয়বৈজয়ন্তিকা ত্রিভুবন বিজয়পতাকা উজ্জ্বলং প্রকাশমানং বিদগ্ধং অজ্ঞাতং সুগ্ধং মনোরমং যন্নেপথ্য বেষঃ তস্য রচনয়া বিভাবিতঃ প্রমাপিতঃ কুমারীভাব কুমারীত্ব যস্যা, যৌবনসন্ধৌ বর্ত্তমানত্বা-দ্বয়সা কুমারীত্বং ন জ্ঞায়তে পরন্তুবয়ুক্তনাদ্যভাববেষত্বাদিত্যাশয়ঃ। মহানুভাবপ্রকৃতিঃ অতি-ধীরস্বভাবা, অনুদারো মহান্ দক্ষিণো বা পরিজন যস্যাঃ সা, উদারো মহতি দক্ষিণে ইতি যাদবঃ। কাপি অজ্ঞাতনামধেয়া গর্ভমন্থরাৎ মধ্যাবাসাদ্বির্গত্য তত্র যবাই স্থিত ইত্যর্থঃ। তত্র ইতি পাঠেঽপি তত্রস্থ্যলাভস্তু ইতি স এব বার্থঃ। আগতবতী উপস্থিতা।

১৮। মাধব! বয়স্য! তোমার নিকট কি অবক্তব্য আছে? শ্রবণ কর। অবলোকিতা কর্ত্তৃক উৎসাহিত হইয়া কামদেবায়তনে গমন করিয়াছিলাম। সেই স্থানে ইতস্ততঃ পরিভ্রমণ ও অবলোকন করিয়া পরিশ্রমবশতঃ উল্লসিত মদিরামোদে মনোজ্ঞ যে শুভগন্ধ তদ্দ্বারা সমাকৃষ্ট সম্মিলিত সকল অলিকুল কর্ত্তৃক ব্যাপ্ত ও আকুলিত বকুলকলিকাশ্রেণীরূপ মনোহর আভরণ দ্বারা রমণীয় প্রাঙ্গণ-ভূমিস্থিত বকুল বৃক্ষের আলবালসন্নিহিত ভূমিতে অবস্থান করিয়াছিলাম। সেই স্থানে অজস্র নিপতিত কুসুমসকল যদৃচ্ছাক্রমে গ্রহণ করিয়া অতি নিপুণভাবে মনোহর মালা গাঁথিতে আরম্ভ করিয়াছিলাম। অনন্তর সঞ্চরণশীল কামদেবের ত্রিভুবন-বিজয়পতাকাস্বরূপ অতি ধীরস্বভাবা অজ্ঞাতনামধেয়া একটী স্ত্রী অতি দাক্ষিণ্যসম্পন্ন পরিজনবর্গসহকারে মধ্যাবাস হইতে নির্গত হইয়া সেই স্থানেই উপস্থিত হইল। অতি উজ্জ্বল অগ্রাম্য ও মনোহর (অবগুণ্ঠনাদিশূন্য) বেশ রচনা তাহার কুমারী ভাবের পরিচয় দিতেছিল।

तथ्या:, सखे ! नियतमिन्दुसुधामृणाल-
ज्योत्स्नादि कारणमभून्मदनश्च वेधा: ॥ (७९)

अथ सा प्रणयिनीभि: अनुचरीभि: अविरलकुसुमसञ्चयावचय-लीलादोहदिनीभि: अभ्यर्थ्यमाना, तमेव बालवकुलपादपोद्देशमागत-वती, तस्याश्च कस्मिंश्चिदपि महाभागधेयजन्मनि बहुदिवसोपचीय-मानमिव मन्मथव्यथाविकारमुपलक्षयामास । (८०)

---

७९ । तथ्या सुधान् वर्णयति इति । या कुमारी रामणीयकस्य रमणीयताया निधिरवधिर्या यस्या रामणीयकमेव निधिर्निक्षेप: तस्या अधिदेवता अधिष्ठात्री देवता वा ? सौन्दर्यस्य सौन्दर्यस्य: सारसमुदाय, स्त्रिया निकर: तस्य निकेतनं गृहं वा ? (निकेतनशब्दस्यानन्तरनिपातात् स्त्रीसामान्याधिकरण्येऽपि न स्त्रीलिङ्गत्वं) इति संशय: । अथवा रामणीयक इत्यर्थे, तस्याश्च रामणीयकनिधेरधिदेवतेत्यादिवर्ण: । बालायाश्चिरयौवनयोरित्यर्थेऽपि बहुत्वे इति विज्ञ: । चरमेण नायिकानुभववर्णनेन विनोदनं नाम मुखसन्ध्यङ्गमुक्तं तथाह—"बहुमुखार्था विनोदन" मिति । मुखलक्षणनिरूपणादनुक्तत्वादिदानीं चतुर्थावस्थापि सामर्थ्यात् व्यञ्जिता । अवस्था-विशेषवतां तस्या: कामोद्दीपनमेव तस्या इत्याह । हे सखे ! नियतं नूनं इन्दुसुधा-मृणालज्योत्स्नादि तस्या: कारणं सम्बन्धिकारणं जातम्, तथाहि—इन्दुसुधा सुखस्य, सुधा अमरस्य, अमृतं सुखस्य, ज्योत्स्ना लावण्यादीनां समवायिकारणं । आदिपदेन पद्मी पादयो: विद्रुमौ करयोरित्यनुसन्धेयम् । चकार एवार्थे,मदनश्च मदन एव तस्या वेधा: सृष्टिकारक:, चन्द्रादिसकलोपसाद्यमोपादानकत्वं मदनकर्तृकत्वं च विना श्रुतमपदेन अनन्यसाधारणपुराण-प्रसिद्धा च वेधृत्वविरहं सम्भावनोत्प्रेक्षय: । अत्र संभावनोत्प्रेक्षालङ्कारयो: संसृष्टि: । वसन्त-तिलकं वृत्तम् ॥

---

७९ । সেই রমণী কি রমণীয়তাশ্রয়ের অধিষ্ঠাত্রী দেবতাস্বরূপ ? অথবা সৌন্দর্যের সারাংশসকলের নিকেতনস্বরূপ ? হে সখে ! আমার মনে হয় চন্দ্র, সুধা, (পদ্মের) মৃণাল ও জ্যোৎস্নাই তাহার উপাদানকারণ এবং মদনই তাহার সৃষ্টিকর্তা । (নচেৎ সেই প্রাচীন ব্রহ্মা কর্তৃক কেবল পঞ্চভূতদ্বারা এরূপ রূপ কখনও সম্ভবপর হইত না ।)

यतः तस्याः—

परिस्पन्दितमृणालीलोलानमङ्गं, प्रवृत्तिः,
कथमपि परिवारप्रार्थनाभिः क्रियासु ।
कलयति च हिमांशोर्निष्कलङ्कस्य लक्ष्मी-
मभिनवकरिदन्तच्छेदपाण्डुः कपोलः ॥ (८१)

८०। अथेति। प्रथमचौभिः प्रेमार्द्रदानि. अविरलं यथा स्यात्तथा यः कुसुमसञ्चयस्य पुष्पसमूहस्य अवचयः चयनं स एव लीला तस्यां दोहदिनीभिः अभिलाषयालिनीभिः अनुचरीभिः अध्यर्थमाना आह्रियमाणेति यावत् सा बाला तस्मिन् यथाहमुपविष्ट इत्यर्थः, तस्याश्च बालायाः महता मानसेन प्रभावेन जन्म यस्य वाहसो, अनुक्षणोद्भूतिमाधिक्यविरहिणि ताहशक्रियया अभिलाषाजनकत्वात्। अस्मिंश्चित् अप्रतिमानाम्नि पुरुषे बहुदिवसोपचीयमानं बहुदिनात् प्रवर्तमानं मन्मथव्यथया कामवेदनया जनितं विकारं उपलब्धवान् अनुभितवान् अस्मि।

८१। कामविकारानुमाने हेतून् दर्शयति—यत इति। परिस्पन्दितेति। यतस्तस्या मद्दं परिस्पन्दिता मद्दं सञ्चिन्वीक्षता वा मृणाली विसतन्तुः तद्वत् लोल स्वानिलापन्नं, एतेन क्षणतानाम कामदशा सूचिता। तथा क्रियासु स्नानपानादिषु परिजनाना सखीपरिचारिकादिजनानां प्रार्थनाभिः याचनातिशयैः कथमपि अनिच्छयापि ग्रहणं, एतेन विषयविरागः सूचितः। दीनादिदशादपि क्षणत्वादि सम्भवादभ्यभिचारि हेतुं दर्शयति—कलयतीत्यादिना। अभिनवः नूतनः यः करिदन्तच्छेदः दन्तिदन्तखण्डः तद्वत्पाण्डुः गौरः कपोलः निष्कलङ्कस्य कलङ्करहितस्य हिमांशोश्चन्द्रस्य लक्ष्मीं शोभां कलयति। अनेन पाण्डुता मदर्मिता, एतादृशी पाण्डुता च

৮০। অনন্তর সেই কুমারী অবিরল কুসুমচয়নে অভিলাষবতী ও অতি-প্রণয়িনী অনুচরী কর্তৃক আহূত হইয়া, যে স্থানে আমি অবস্থান করিতেছিলাম সেই বকুলপাদপের সন্নিকট ভূমিতেই আসিয়া উপস্থিত হইল। কোনও সৌভাগ্য-জন্য পূর্ব্বে বহুদিবসাবধি বর্দ্ধমান তাহার মদনবেদনাবিকার উপলব্ধি করিয়াছি।

সা পুনঃ মম প্রথমদর্শনক্ষণাদ্প্রভৃতি অমৃতবর্ত্তিরিব চক্ষুষোঃ অতিশয়ানন্দমুৎপাদয়ন্তী, অয়স্কান্তমণিশলাকেব লোহধাতুমনসঃ করণমাকৃষ্টবতী, কিং বহুনা—(৮২)

উৎপাদয়ন্তমতিমাত্রমনন্যসাধ্য-
মাসঙ্গমেতদনপেক্ষিতহেতু চেতঃ।

বিষয়স্য এব তথাবিধস্যাভিনিবেশো হেতুঃ। ন তথাত্বে কামদত্তদর্শনাধিক্ষেপোক্তং "অহহাশীতং তাব, যাবদুষ্ণং ন ভবতীতি" ইতি। আভিনীতকম্, তল্লক্ষণং যথা—"ন নয় যদ্য পুনর্যং সাধিনী ভৌবিলীতৈঃ।"

(৮২) সা পুনরিতি। অমৃতবর্ত্তিঃ, অমৃতমধনেবাহ্লাদনীয়া, সা এব সা কুমারী প্রথমদর্শনাৎ প্রভৃতি দর্শনমাত্রেণেত্যর্থঃ। চক্ষুষোঃ নিজয়োঃ অতিশয়ানন্দং পরমানন্দং উৎপাদয়ন্তী জনয়ন্তী অয়স্কান্তমণিশলাকা লৌহাকর্ষকমণিবিশেষঃ লৌহধাতুমিব লৌহময় দ্রব্যমিব মম অন্তঃকরণং চিত্তং আকৃষ্টবতী তদ্দর্শনাদ্প্রভৃতি তাদৃশী সী চিত্তমনুসরতীত্যর্থঃ। কিং বহুনা কথনেনেতি শেষঃ, তচ্চেতনস্তে কথিত অথবাসীদিত্যর্থঃ।

৮১। যে হেতু তাহার অঙ্গ মর্দ্দিত-পিষ্টতন্তুর ন্যায় শ্লাঘিযুক্ত, পরিজনবর্গের অনুরোধে অতিকষ্টে তাহার ক্রিয়ার প্রবৃত্তি, নূতন হস্তিদন্তখণ্ডের ন্যায় পাণ্ডুবর্ণ তাহার কপোল নিষ্কলঙ্ক শশাঙ্কের শোভা ধারণ করিয়াছে। (কামভাবেই এই সকল লক্ষণ পরিলক্ষিত হয়।)

৮২। সেই বালিকা প্রথম দর্শনাবধিই অমৃতময় অঞ্জনশলাকার ন্যায় আমার নেত্রের অতিশয় আনন্দ উৎপাদন করত অয়স্কান্তমণি (চুম্বক লোহা) যেমন লোহা আকর্ষণ করে, সেইরূপ আমার চিত্তকে আকর্ষণ করিয়াছে। অধিক আর কি বলিব।

प्रायः शुभस्य विदधात्यशुभस्य जन्तोः
सर्वंसहा भगवती भवितव्यतैव ॥ (८३)

मक०। वयस्य माधव! स्नेहश्च निमित्तसव्यपेक्ष इति विप्रतिषिद्धमेतत्। (८४) यश्च—

८३। फलितं कथयति—सन्तापेति। एतत् मदीयं चेतः सन्तापसङ्कलित परितापपरम्परा सैव महाव्यसन परमा विपत्ति तत्र, तदर्थमेव सादरं यतुर्वी। न कथंचित: हेतुः निमित्त बाह्यसाधनमिति यावत्, येन साहस्र सत् निमित्तजनपेक्षोपेक्षेयं, तस्मा त्सन्तप्तं तप्तं। तत्सान्तरतिदुर्लभत्वेन सावज्ञोदासीनदृष्टिरेव मदीयं सन्तापदायिनीव तदालक्षितेति भाव:। तत्रैव कारणमपि उच्च तत्सन्तप्तमि न निवारयसीत्याशङ्क्याह—प्राय इति। प्रायो बाहुल्येन भगवती दुरतिक्रमत्वात्, सर्वंसहा (सर्व+सह+सच्) निमित्ततया सर्वापेक्षापिनी, भवितव्यता एव प्राक्तनकर्मजन्याहृष्टमेव जन्तोः जीवस्य, शुभ मङ्गलमशुभ विदधाति सम्पादयति, विधातापि जीवाहृष्टसापेक्ष एव सर्वं प्रवर्तयतीति भावि मे तत्र स्वातन्त्र्यमिति भाव:। अथ सामान्येन विशेषसमर्थनरूपार्थान्तरन्यासोल्लेखालङ्कार:। तदुक्तं सहृदयै यदा दर्पणे—"सामान्यं वा विशेषेण विशेषस्तेन वा यदि। कार्यञ्च कारणेनेदं कार्येण च समर्थ्यते, साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा मतः॥" वसन्ततिलकं वृत्तम्।

८४। सव्यपेक्षया सह वर्तत इति सव्यपेक्ष: निमित्तस्य बाह्यसाधनस्य सव्यपेक्ष: निमित्तसव्यपेक्ष, स्नेहस्य बाह्योपाधिसापेक्ष इति विप्रतिषिद्धं विरुद्धं अप्रामाणिकमिति यावत्। स्नेहस्यबाह्योपाधिकत्वेऽविद्वत्त्वादय. बाह्यनिमित्तापेक्ष: स स्नेह एव नेत्यर्थ:। यत्तु "द्विधा भवेत् स च स्नेह: कृत्रिमाकृत्रिमात्मक:। सोपाधि कृत्रिम: स्नेहो निरुपाधिरकृत्रिम" इति सोपाधिकेऽपि स्नेहशब्दप्रयोग इति तत् सोपाधिकेऽपि स्नेहत्वोपचारेण भाक्तमिति मन्तव्यम्।

---

(८३) सन्तापसङ्कुलरूप महाविपद्‌लाभের জন্যই আমার চিত্ত কোনরূপ নিমিত্তের অপেক্ষা না করিয়া তাহাতে সমাসক্ত হইয়াছে। সর্ব্বংসহাস্বিনী ভগবতী ভবিতব্যতাই প্রায় প্রাণিদিগের শুভাশুভ বিধান করিয়া থাকে (অতএব এবিষয়ে আমার কোন স্বাধীনতা নাই)।

(৮৪) মকরন্দ। বয়স্য মাধব! স্নেহ যে বাহ্য নিমিত্তকে অপেক্ষা করে, ইহা সম্পূর্ণ বিরুদ্ধ কথা। দেখ—

व्यतिषजति पदार्थानान्तरः कोऽपि हेतु-
र्न खलु बहिरुपाधीन् प्रीतयः संश्रयन्ते ।
विकसति हि पतङ्गस्योदये पुण्डरीकम्
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ॥ (८५)
ततस्ततः ? (८६)
साध्व । ततश्च तत्र, (८७)

---

८५ । श्लोकं व्याचष्टे—व्यतिषजतीति । आन्तरः आन्तरः (अन्तर्+अण्) आन्तरङ्गो योऽपि अनिर्वचनीयो हेतुः पदार्थान् वस्तूनि व्यतिषजति सम्बध्नाति परस्परं सम्बध्नाति । प्रीतयः स्नेहाः न खलु नैव बहिरुपाधीन् बाह्यहेतून् संश्रयन्ते अपेक्षन्ते, बाह्यहेत्वपेक्षा न प्रवर्तन्ते इत्यर्थः । हि यस्मात् पुण्डरीकं पद्मं पतङ्गस्य (पत्+अङ्गच्) "पतङ्गो पक्षिसूर्यौ च" इत्यमरः । सूर्यस्य उदये आविर्भावे सति विकसति उल्लसति, तथा चन्द्रकान्तः तन्नामा मणिविशेषः हिमरश्मौ चन्द्रे उद्गते उदयशिखरिणि सति द्रवति स्रवति । अत्र सौम्यतरहिमकरकरनिकरसम्पर्के सति सौम्यतरस्वभावस्यन्दिनाम्नि, सौम्यतरनिशाकरकिरणनिकरसंसर्गे सति बहिरुपचन्द्रकालक्षितस्वीभावे च बाह्यहेतुर्न कोऽपि परिलक्ष्यते इत्याशयः एवाभीष्टसिद्धौ हेतुः अनिर्वचनीय इत्याशयः । अत्र विशेषेण बालाभ्यासमनोहरः "अर्थान्तरन्यासोऽयम्" । काव्यलिङ्गम् ।

८६ । पदभूतं वस्तु व्याख्यातेति शेषः ।

८७ । ततस्तदनन्तरं, तत्र—अस्मिन्नवसरे ।

---

(८५) অন্তরঙ্গতা কোন অনির্বচনীয় কারণই পদার্থকে পরস্পর স্নেহসূত্রে আবদ্ধ করে। স্নেহ কখনও বাহ্য হেতুর অপেক্ষা করে না। যেহেতু সূর্যোদয় হইলেই পদ্ম প্রকাশিত হয় এবং চন্দ্র উদিত হইলেই চন্দ্রকান্তমণি বিগলিত হয় (এস্থলে কোনই বাহ্য হেতু পরিলক্ষিত হয় না।)

(৮৬) তারপর (যাহা হইয়াছিল, তাহা বল)।

(৮৭) সাধু। তারপর, সেই অবসরে।

सभ्रूविलासमथ सोऽयमितीरयित्वा,
सप्रत्यभिज्ञमिव मामवलोक्य तस्याः ।
अन्योऽन्यभावचतुरेण सखीजनेन,
मुक्तास्तदा स्मितसुधामधुराः कटाक्षाः (८८)

मक० । [स्वगतम् ।] कथं प्रत्यभिज्ञापि नाम ? (८९)

माध० । अथ ताः सलीलमुत्तालकरकमललालितनालिकान्तर
लवलयावलोकम् उच्चस्तमस्तकलहंसविभ्रमाभिरामचरणसञ्चरण-
झणझणाय-मानमञ्जीरमञ्जुशिञ्जितानुविद्धमेखलाकलापकिङ्किणी-

८८। सभ्रूविलासमिति। अन्योऽन्यभावचतुरेण परस्परावयाभिज्ञेन तस्याः मालत्याः सखीजनेन "अयं सः" यः प्रियसखीहृदयवल्लभ इत्यर्थः। इति वचनं सभ्रूविलासं सभ्रू-भङ्गं यथा स्यात्तथा ईरयित्वा कथयित्वा, अथ कथनानन्तरं ज्ञातप्रयोगानन्तर्यलाभेऽपि पुनरथ-पदोपादानमतिसान्निध्यद्योतनार्थं यथा स्यात्तथा ईरयित्वा कथयित्वा सप्रत्यभिज्ञमिव "पूर्वानुभूतस्य सन्निहितेन सदृक्षावगाहिनी बुद्धिः प्रत्यभिज्ञा" तया सहितं यथा स्यात्तथैव मा-मालोक्य तदा तत्काले स्मितं ईषद्विकसितमेव सुधा अमृतं तया मधुराः मनोहराः कटाक्षाः अभिप्रायव्यञ्जका दृष्टिविशेषाः मुक्ताः क्षिप्ताः। मामालोक्य दत्तपूर्वं तां, परस्परावलोकनं ज्ञातवन्त इत्यर्थः। अत्रालोकनामन्तरकटाक्षाणां प्रत्यभिज्ञायमानत्वाभावेऽपि कालान्तरः। तदुक्तं यथा दर्पणे—"भूतस्य पदार्थस्य भूतस्यापि सन्निधेः। यत् प्रत्यभिज्ञायमानत्वं तदभावेऽपि तथोदितम्॥" वसन्ततिलकं वृत्तम्।

८९। नाम सम्भावनायां। पूर्वानुभूत एव प्रत्यभिज्ञानसम्भवात् "मालत्यादिभिर्नाथवो दृष्ट" इत्यत्रापि मकरन्दाविदितत्वात् कथं प्रत्यभिज्ञेति वितर्कः युक्तः।

९०। अथेति। अथ महर्षेर्नानन्तरं ताः मत्सन्निहितास्तत्राः सख्यः, प्रतिनिर्दिशेति क्रियां विशिनष्टि—सलीलमित्यादिविशेषणयैव। लीलया अङ्गचेष्टितादिभिरभीष्टार्थानुकरणेन सह वर्तमानं यथास्यात्तथा "सलीलमुदवागङ्गचेष्टितैः प्रीतिचोदितैः। प्रियानुकरणं लीला सा स्यात् स्त्रीपुंसयोरपि॥" उत्ताना ऊर्ध्वमुखाः या: करकमलयोः ललिताः मनोज्ञाः नालिकाः

---

(८८) परस्परের আশয়বোধে সমর্থ তাহার সখীসকল ভ্রূবিলাসের সহিত "এই সে" এই কথা বলিয়া পূর্ব্ব পরিচিতের ন্যায় আমাকে অবলোকন-করতঃ হাস্যামৃতমনোহর কটাক্ষ নিক্ষেপ করিল।

(৮৯) মক। (স্বগত) প্রত্যভিজ্ঞার কিরূপে সম্ভব হইল ?

रथकारमुग्धरं प्रतिनिवृत्य भर्तृदारिके ! दिष्ट्या वर्धामहे, यदेव कोऽपि कस्यापि तिष्ठतीति मात्र अङ्गुलीदलविन्यासेन आख्यातव्यः । (८०)

मया । [स्वगतम्] । एतत् साहसः प्रागनुरागस्योद्भेदः । (८१)

ऊर्ध्वमारिताङ्गुलीकतया परस्परव्यवधानानि साभिलाषा पक्ष्मणा पक्ष्मलानी, अङ्गुलीदलैरित्यत्र सदृशता आश्रया । एव उत्पुला उद्विद्धा लताया ये अङ्गुलका नेत्रा विमुखी विलासः तिरश्चीनत्वं वा सहचरिताभ्यां मनोज्ञ यत् चरणशब्दरवं पदन्यास, तेन अवधानार्थं अवधानाय इति हेत्वाश्रयात् यत् मञ्जीर नूपुरं तस्य मञ्जुझिञ्जितेन मनोज्ञशब्देन चञ्चरिताः कलिताः ये मेखलाना काञ्चीना कलापस्य गुच्छस्य मेखलाकलापयोर्वा, झिञ्झिकीना क्षुद्रघण्टिकाना रथकारः तेन सुष्ठु यथा स्यात्या "मेखला च काञ्चीकलापश्च मेखले तयोरिवमुच्यमान। एकयष्टिभेदेन काञ्ची मेखला सप्तयष्टिका। रसना तीक्ष्ण श्रेणी काञ्ची पञ्चविंशति"रिति भरतः । प्रतिनिवृत्य पराङ्मुख मत्वा भर्तृदारिके । सम्बुद्धिः । दिष्ट्या भाग्येन वर्धामहे, वर्धयामः यदेव कोऽपि कस्यापि तिष्ठतीत्युक्त्वा अङ्गुल्य एव दलानि "वर्ण विनाऽपि श्लोचया या आख्यानव्यवहार आधिक्यव्यः । अनाङ्गुलीनां दलत्वोपचर्य अत्रत्य प्रयत्नशीलकत् । "राजा महारको देवस्तनयुता भर्तृदारिके"त्यत्र राजपदस्य बहुमानपरत्वादनाख्यातत्वेऽपि आख्याता मानया अपि भर्तृदारिकेति सम्बोधनं न्यायसम । अथो तव सङ्गम इति वक्तव्ये कोऽपि अस्थानीयनिर्दिष्टाभिधानलभ्यार्थं, अत एव अस्थानीति सामान्यस्त्रीपुंसक, कोऽपीति पुंसा निर्देशस्य नि सन्देहार्थः, अन्यथा किमपीत्युक्ते पुंसादिविषया सन्देहसम्भवात् । अस्या अपि सङ्गम इति कथित यत, स च प्रच्छन्नतावैधुर्येण चातुर्यं प्रकट इति मन्तव्यम ।

८१ । एतत् दृष्टं "एतत् दर्शनमुत्कण्ठाया आकारस्थितिविशेषो"रित्यमरः । साहसः अतिप्रच्छन्नस्य प्रागनुरागस्य पूर्वानुरागस्य उद्भेदः प्रकाशः, प्रतीयत इति शेषः ।

---

(८०) माधः । তখন তাহারা উদ্গত কবকমলের মনোজ্ঞ কবতালীদ্বারা কঙ্কণশ্রেণী সঞ্চালিত করিয়া উচ্চিগু ও মত্ত কলহংসের গমনের ন্যায় মনোজ্ঞ পরস্পরগতিদ্বারা রণ্ রণ্ ইত্যাকার শব্দায়মান যে নূপুর, তাহার মনোজ্ঞ শব্দবিমিশ্রিত মেখলাকলাপস্থিত ঘণ্টিকাশব্দদ্বারা মুখরিত করিয়া লীলাসহকারে ফিরিয়া "ভর্তৃদারিকে ভাগ্যক্রমে আমরা বৃদ্ধিপ্রাপ্ত করিতেছি, যেহেতু এখানেই কাহারও 'কোন ব্যক্তি অবস্থান করিতেছে" এইকথা বলিয়া অঙ্গুলীদলবিন্যাসদ্বারা আমাকে লক্ষ্য করিল।

(৮১) মধ । (স্বগত) অহো অতিদৃঢ় পূর্ব্বানুরাগের বিকাশ(উপলব্ধ হইতেছে)

कल। [आकर्ण्य]। कधं सरसरमणीआणुवन्धिणी दत्तीअ-णक्कधा ? (ङ)

मक। ततस्ततः—(९२)

माध। अथान्तरे किमपि वाग्विभवातिहृत्त-
वैचित्र्यमुल्लसितविभ्रमसुत्पलाक्ष्याः।
तद्वर्णिमास्त्विकविकारमपास्तधैर्य्य-
माचार्य्यकं विजयि मान्मथमाविरासीत्॥ (९३)

(ङ) कथं सरसरमणीयानुबन्धिनी श्रोत्रणकथा ?

ङ। सरसरमणीय अनुबध्नाति व्याप्नोतीति सरसरमणीयानुबन्धिनी। श्रोत्रणस्य कथा, अयं अविच्छेदेन प्रवर्तत इति शेषः।

९३। अथान्तर इति। अथानन्तरे एतस्मिन्नवसरे उत्पलाक्ष्याः पद्मलोचनायाः सत्या इति शेषः। किमपि अनिर्वचनीयं अत एव वाग्विभवातिहृत्तवैचित्र्यं वाक्यप्रपञ्चातीतविचित्र-भावं उल्लसितः उद्भिन्नः विभ्रमः "वागङ्गसत्त्वाभिनयमूषालालनविपर्ययः क्रियया कल्पितोऽभीष्ट-दर्शने यः स विभ्रमः" इत्येवलक्षणकः प्रहारचेष्टाविशेषो यत्र तादृशं, तत्प्रसिद्धं भूरि प्रचुर-तरः 'सात्त्विकविकारः' स्तम्भादिसात्त्विकभावो यस्मिन् तत्। सात्त्विकभावलक्षणं यथा—"सत्त्वोद्भवाः पुनस्ते तु प्रलयान्ता भावास्ते सात्त्विका निगदिताः कविभिः पुराणैः"रिति। तद्भेदाश्च "स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभेदश्च वेपथुः। वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विका मताः॥" तथा अपास्तं निराकृतं धैर्यं धीरत्वं येन, तत् विजयि जयशीलं सर्वत्रप्रसिद्धमिति यावत्। मान्मथं मन्मथसम्बन्धि आचार्यकं आचार्यस्य भावः योपधाद्गुरूपधत्वाद्वुञ्। प्रहार-चेष्टा विशेषणविशेष्यभावः, आविरासीत् प्रादुरभूत्। अथ उत्पलाक्ष्या इत्यनेन नानाप्रकार-नेत्रविक्षेपरीतिर्गा भाव उक्तः। यथोक्तं—"भ्रूनेत्रादिविकारादयः प्रहारगात्रारम्भकः। व्याधिभावः स्थितौ हावः स्थितेः प्रीतिगोऽपि वा॥" वाग्विभवातिहृत्तवैचित्र्यादिभिभाव-विशेषैर्निबन्धनात् परिकरोऽलङ्कारः। तल्लक्षणं यथा दर्पणे—"उक्तिर्विशेषैः साभिप्रायैः परि-करो मतः" इति। समग्रमतिवृत्तं क्रमम्॥

(ङ) कল। (শ্রবণ করিয়া) এ কি, সরস রমণীয় রমণীসম্বন্ধীয় কথা (অবিচ্ছেদে চলিতেছে কেন ?)

(৯২) মকরন্দ ! তাহার পর ?

(৯৩) মাধব। এই অবসরে সেই উৎপলাক্ষীর অনির্বচনীয় বাক্যাতীত

ततश्च—स्निग्धसितविकसितानामुन्नमदभ्रूलतानां,
मध्यमसुकुलितानां प्राग्विस्तारभाजाम् ।
प्रतिनयननिपाते किञ्चिदाकुञ्चितानाम्,
विविधमहमभूवं पाश्चमालोकितानाम् ॥ (९४)

९४। "दिशा हारात् सङ्कुचिते"ति भरतानुसारेण हारकार्यत्वेन हारस्वरूपम् "नारीणां स्निग्धसौम्यलज्जाभावसङ्कीर्णः। स्वभावाविष्कृतो यो ऽसौ दृष्टिविकार इष्यते" इत्युत्तरवाक्यं दृष्ट्वा अयमिमं मुखरागदृष्टिविकारविशेषान् अवदत्—स्निग्धेत्यादिना। स्निग्धतादि दर्शनसौलभ्येन पुरोवर्तिनि सति निश्चलादि चक्षुषा स्निग्धत्वादृष्टिविकार एव। उक्तौ—"सकौतुकस्य चाग्रे च यथा स्निग्धमुखस्य"इति। ततो विकसितादि दर्शने स्थिरं सतारोन्मिषितत्वादीति, एतेन विकसितार्थाद्या दृष्टिरुक्ता, विकसितं तद्विषये स्थिरोन्मिषितत्वरूपं दृष्टिधर्मजातम् तैर्यो, यदा स्निग्धं सन्दृ यथा स्वस्मात् विकसितानां प्रकाशितानां प्रसन्नतायां दर्शनेन लक्षिता ग्रहे: ग्रहे: प्रहारिणामाशयैः। एव उन्नमनी किञ्चिदूर्ध्वगती भ्रूलता तैर्यो, चक्षुषा चतुर्थं नाम भ्रूकर्म प्रसन्नास्यस्य इत्यविकार उक्तः। तथाहि—"यद्यं किञ्चिदूर्ध्वाकारपुरा रचना भ्रुवौ" "प्रसन्न तद्भवेत् सम्यग्विकारं सविलास यत्" इति तथा मध्यमादि मधुरानकुलादीनि, चक्षुषा मधुरास्यो इत्यविकार उक्तः। यथा—"मधुरं तत्तु विभं मधुरानकुलादीनि।" सुकुलितादि ऊर्ध्वोन्मिलितादि च तैर्यो, चक्षुषा सुकुलितादृष्टिरुक्ता। तल्लक्षणं यथा—"सुविताम्रिमपक्ष्माग्रा सुकुलोर्ध्वपुटेक्षिता। सुखोन्मीलिततारा च सुकुला दृष्टिरिष्यत"इति। तथा ग्रन्थे चक्षुरादीये विकारभागां पुनःपुनर्दर्शनात्तदेव विस्मरतीति, चक्षुषा विकारी वस्तुदर्शीति विकारदयमुक्तं। तल्लक्षणं यथा—"दैन्यान्विती विस्मयविकारीति कथ्यते। मुहीमुहः स्पृहा यत्र दृष्टेस्तत् वस्तुदं चक्षुः॥" एवं प्रतिनयननिपाते तद्दर्शनाभिलाषेण मनसश्चित्तेनेक्षणे सति किञ्चिदाकुञ्चितानां चक्षुषा दैन्यमनुचितानां, चक्षुषा तद्विलक्षणाद्भुतविकार उक्तः। लक्षणं यथा—"चक्षुषाभावसङ्कीर्णो यत्र स्यात् कुञ्चितं चक्षुः" चाग्रोन्मिलितानां चक्षुषा दर्शनात्। "चक्षुषा दर्शनं यत् स्यात्तदालोकितमुच्यते"

वैलक्षिता ও मयूखित मृगारचेष्टाभाजो एतदुत्तर उक्तानि सात्त्विकभावयुक्त दैन्यो-लोपकारी एवং चक्षुषो মনসের মৃগারচেষ্টা-শিক্ষাপ্রণীণা আবির্ভূত হইল।

(৯৪) অনন্তর তাহার যেই অবলোকন (আষাঢ়েই) নিশ্চল ও প্রকাশিত এবং সেই অবলোকনে ভ্রূলতাসকল উচ্ছ্রিত ও প্রান্তভাগ বিস্তৃত হইতেছিল,

ततश्च—अलसवलितमुग्धस्निग्धनिष्पन्दमन्दै-
रधिकविकसदन्तर्विस्मयस्मेरतारैः।
हृदयमशरणं मे पक्ष्मलाक्ष्याः कटाचै-
रपहृतमपविद्धं पीतमुन्मूलितञ्च ॥ (९५)

तैः। तत्रेति भरतः। चक्षुः विविधं नानाप्रकारं भावं योग्यः "योग्यभाजनयोः पात्र"मित्यमरः। तन्निभूतम्। आलोकितावस्थेति बहुव्रीहेन धारावाहिकप्रवृत्तिपतीतैलौत्पाद्यो दृष्टिविकार उक्तः। यथोक्त—"धारावाहिकसञ्चारो यत्र तल्लोलमुच्यते"। अत्रापि पूर्ववत् परिकरालङ्कारः। मालिनीवृत्तम् ॥

९५। अलसेति। अलसवलितमुग्धस्निग्धनिष्पन्दमन्दैः अलसादिभिश्चतुर्भिर्वलितैः। तेषां लक्षणानि यथा—"अलसं तदधीरार्यास्त्रीरागैर्यदिवलते"। वलितं तन्निरुद्धस्य भूयस्तात्पर्यावलोकनम्"। मुग्धं किञ्चिद्वलितमिति बहुव्रीहेवलम्। "सभरसाक्षेपितं मुग्धं भावज्ञानमपि च्छलात्"। "स्निग्धं यद्वस्तिभावेन स्नेहप्रायेण संयुतम्"। "निष्पन्दं तदयदत्यन्तं किञ्चिदाद्र स्यन्दते क्वचित्"। "मन्थरा मन्दसञ्चारा"। इति। तथा अधिकं विकसता आश्चर्यदर्शनरूपादुद्दीपनादतिशयरक्तभावोन्मुखत्वं, उपनयता चान्तर्विस्मयेन चलता तेन विस्मयेन स्मेराः उत्फुल्लाः तारा यस्यां तैः। अनेन विस्मिताख्या दृष्टिरुक्ता। यथा—"विस्मयोत्फुल्लतारा स्तिमितोभयपुटाश्चिता। चला विकसिता दृष्टिर्विस्मिता विषये मता" इति। प्रथमचतुर्थौ पूर्वार्धस्थितौ यस्मात्तस्याः पक्ष्मलाक्ष्याः कटाचैः "अपाङ्गतारविक्षेपः कटाक्ष इति कथ्यते" इति लक्षणोपलक्षितदृष्टिविशेषैः मे मम हृदयं अशरणं तदधीनतया रक्षकविहीनं सत् अपहृतं बलादपहृतं, तत्तथा अपविद्धं निष्करुणेन मथित तथा मथितत्वेन द्रवत्वात् पीतं, यथा पीतमुदकादिकं पानकर्तुरन्तर्लीयते, तथा कटाक्षैरु मन्मनो विलीनमित्यर्थः। अत उन्मूलितं पुनरुद्भवाभावेन हेतुसमूलोत्पाटनमूलं कृतम्। सर्वत्रैव मन्मनस्तदधीनमित्यर्थः। ततश्चैवं तैरिति पाठे तु तैरुक्तैरालोकितैरेव कटाक्षैः कटाक्षतापन्नैरित्यर्थः। आलोकितावस्थाकटाक्षावस्थयोर्भेदात् नायक-

---

एवं আমার প্রত্যেক নেত্রসঞ্চালনে সেই 'অবলোকন' লজ্জাবশতঃ কিঞ্চিৎ সঙ্কুচিত হইতেছিল, নানাপ্রকারে আমি অনুরাগকষায়িত ও মুকুলিত সেই অবলোকনের যোগ্য হইলাম।

(৯৫) তাম্রগর্ভে প্রশস্ত পক্ষ্মযুক্তনেত্রা সেই মালতীর সেই কটাক্ষে তারাগুলি

एवमङ्कन्तु तथा: सर्वाकारहृदयङ्गमाया: सभ्रूभङ्गप्रान्तसंहरसेनाभिसन्धिना विधेयीकृतोऽपि पारिप्लवत्वमात्मनोऽपनिह्नोतुकाम:, प्राक्प्रस्तुतस्य वकुलदाम्नो यथा कथञ्चिदवशेषं ग्रथितवानेव, ततो मिलितवेत्रयष्ट्यायिवर्षवरप्रायपुरुषपरिवारा, गजवधूमारुह्य, नगरगामिनं मार्गम् इन्दुवदना अलङ्कृतवती। (८६) तदा च—

आतिप्रसादिकैर्विलसितादा पूर्वश्लोकेनास्य न पौनरुक्त्यं। यत्र मनसि अपरिज्ञानादिरसत्यर्थेऽपि तत्प्रख्यत्वाभिप्रायादसत्यर्थे सत्यत्वरूपातिशयोक्तिरलङ्कार:। तल्लक्षणं भेदाय यथा दर्पणे—"सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते"। "भेदेऽध्यभेद अत्यन्तमसत्यत्वप्रतिपत्तये। पौर्वापर्यतिरस्कारिण्यौ सा चाक्षेपिणी मता" इति। मालिनीवृत्तम्॥

८६। एवमङ्कमित्यादि। सर्वैराकारै: इङ्गितैराकारमङ्गादिभि: हृदयङ्गमाया मनोहरायाः, सभ्रूभङ्गप्रान्तै: पूर्वाभिकटाक्षादिभिरनुलोभनात्, सं हरसेन अभिसन्धिना अभिप्रायेण, विधेयीकृत: वशीकृत:, आत्मन: स्वस्य पारिप्लवत्वं चैर्यस्यं च निह्नोतुं परलोकाभिप्रायं कर्तुं कामो यस्य स:। तथा कामयतेऽसौतिति कामुक:। प्राक्प्रस्तुतस्य पूर्वोक्तस्य, वकुलपुष्पदाम्न: केसरकुसुममालाया एव अवशिष्टं, कथञ्चित् तत्प्रथनकष्टादविशङ्क्य च। वेत्रयष्ट्यादि पार्श्वेषु वेत्रा यष्टयो, वर्षवरा: अत्यन्तपुरस्कारिण: क्लीबा: "विनीता: वर्षवरायं क्लीबार्थं च स्वभावत:। आज्ञा न दीर्घविषये ये ये वर्षवरा मता:॥" इति परिभाषाविषया इति यावत्। तत्प्रधाना:, तत्प्रधाना, तत्प्रधा: पुरुषा: परिवारा यस्या सेति विग्रह:। अत्र गजवधूमारोहणादिना सङ्कार्यप्रयोजनत्वेन मालत्या उत्तमप्रकृतेः अत्युदयगामितया दूरदर्शित्वञ्च सूचितं। तत्रापि वधूवाहनमतिमन्थरगतिसूचनाय गजेष्वपि स्त्रिया एव मन्थरगतिप्रसिद्धेरित्यनुसन्धेयम्।

रसभावप्रकाशक अन्तर्गत विप्लवे उत्पन्न हইতে ছিল, অসম্ভবলিত মুগ্ধ, স্নিগ্ধ, নিষ্পন্দ ও মন্দ লক্ষণাক্রান্ত সেই সকল কটাক্ষকর্তৃক বন্ধকবিহীন আমার হৃদয় অপহৃত, মথিত, শীত ও উন্মূলিত হইল।

(৮৬) এবং আমি সর্ব্বাকারে মনোহরা সেই মালতীর সম্ভাবাধান স্নেহরসপ্রবণ অভিপ্রায়দ্বারা বশীভূত হইলেও নিজের ধৈর্য্যভ্রংশ অন্যের নিকট গোপন করিবার জন্য অতিকষ্টে পূর্ব্বাবদ্ধ সেই বকুলপুষ্পমালার অবশিষ্ট গাঁথিতে লাগিলাম। তৎপরে সেই চন্দ্রমুখী গজবধূ আরোহণ করিয়া নগরে যাইবার পথ অলঙ্কৃত করিল। তাহার পুরুষপরিবার শস্ত্র ও বেত্রপাণি ক্লীবপ্রধান ছিল।

यास्या मुहुर्वलितकन्धरमाननं तत्
आवृत्तदुग्धसयसपत्रनिभं वहन्त्या ।
दिग्धोऽमृतेन च, विषेण च, पक्ष्मलाक्ष्या,
गाढं निखात इव मे हृदये कटाक्षः ॥ (८७)

ततः प्रविशति—

परिच्छेदातीतः सकलवचनानामविषयः,
पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान् ।
विकारः कोऽप्यन्तर्जडयति च तापं च कुरुते ॥ (८८)

१७। आत्मनिवेदनं तस्या अनुरागविद्धं दर्शयति—यास्येति। मुहुर्मुहुः वारं वलितकन्धरं यथाभवति तं वा दृष्ट्वा मालतीमाधवे तया स्वयं यास्या वहन्त्या, अथवा वलितकन्धरत्वेनेत्यनेनविशेषणं। आवृत्तदुग्धं आपरिवर्तितदुग्धमित्यर्थः यत् सतपत्रं पद्मं तत्सदृशं तत् आननं वहन्त्या तया पक्ष्मलाक्ष्या अमृतेन विषेण च दिग्ध उपचितः घनतरावयवः अमन्दानन्दहेतुत्वात्प्रकर्षवत्त्वात्सुखः यस्माद्दर्शनात्तद्वियोगे दुःखदत्वाद्विषेण च सदृश इत्यर्थः। कटाक्षः इन्दिन्दिरेक्षणः, मे मम हृदये गाढं दृढं यथा स्यात्तथा निखातः विदार्य्यान्तःप्रवेशित इव। गाढनिखातेन पुनरुद्धरणाशक्यत्वं सूचितम्। अत्र औपम्यतया कटाक्षस्य नाराचवदन्तःप्रवेशसम्भावनोत्प्रेक्षया पक्षादुत्प्रेक्षालङ्कारः। "भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मनी"ति तल्लक्षणम्। वसन्ततिलकं वृत्तम्॥

१८। परिच्छेदेति। ततः प्रविशति कटाक्षसेवनारभ्य। परिच्छेदं देशतो यतीतः अतिक्रान्तः, अथवा इयानेतावानित्याकारकनिश्चयः परिच्छेदः सकलोत्तमद्रव्यविषयः, तथा सकलवचनानां मात्रमात्रतत्तद्विषयवचसां अविषयः अगोचरः, तथा यो विकारः अस्मिन् जन्मनि अनुभवपथं

---

(८७) तখন দৃষ্টচ্যুত পদ্মতুল্যাননা সেই পক্ষলাক্ষী (তোমাকে দেখিবার জন্য) বারবার স্কন্ধদেশ ফিরাইয়া যাইতে যাইতে অমৃতও বিষ তুল্য কটাক্ষ যেন দৃঢ়ভাবে আমার হৃদয়ে সন্নিবেশিত করিল।

(৮৮) তদবধি জ্ঞানের অতীত, সকল বাক্যের অবিষয় এবং ইহ জন্মে

'कल। दिढं कलु एसो एक्कवि अवहरिदो, अवि णाम मालदी जेव्व सा भवे ? (ङ)

मक। [स्वगतम्]। अहो! अभिषङ्गः, तत्किं निषेधयामि सुहृदम्। (१००)

अथवा—मामुत्सुहृत् खलु भवन्तमनन्यजन्मा,
मा ते मनोभवविकारघना मतिर्भूत्।
इत्यादि मन्विह निरर्थकमेव यस्मात्
कामस्य तृप्तिमतगुणो, नवयौवनश्च ॥ (१)

(ङ) इदं खलु केनाप्यपहृतः, यदि नाम मालत्येव सा भवेत् ?।

(ङ) कलेति। इदं अतिशयितं यथा व्यवस्यति अपहरणक्रियाकर्मत्वम्। अथापि निजपथपतितया अपहृतः वशीकृतः। अपि उत्प्रेक्षे, नाम सम्भावनायाम्। इति यथा अपहृतः सा विशाखर्षिवीक्षितः।

(१००) अहेति। अभिषङ्गः आसक्तिरूपविशाखाभिभवविशेषः। 'आसीद्यथाभिमतेऽभिषङ्गपदं विदुः'रिति यावत्, एवमभिष्वङ्गे खल्वियदप्यसौ सम्भावयति—तत् किमिति। निषेधयामि यदहमभिषङ्गान्निवारयामि।

(१) तत्रैव निवारणासामर्थ्यमवधारयति—अथवेति। न अन्यस्मात् विशाखातिरिक्तात् जन्म यस्य सः अनन्यजन्मा मनोजः काम इति यावत्। भवन्तं मामुत्सुहृत् मोहं न दापयतु खलु। (मायन्ययोगे आशिषि लुङ्) एवं ते तव मतिः मनोभवेन कामिलोकसाधारणतया निर्दिष्टेन विकारेण आसक्तिभवेन घना निबिडा विशाखाभवसक्तेति यावत्। मामूत् मे भवतु, इत्यादि निषेधवाक्यं इह अस्मिन् माधवे निरर्थकं निष्फलमेव। अवधारणार्थकयोर्मन्वे यत्तदोः प्रयोगः

(ङ) কল। ইনি কাহারও কর্তৃক দৃঢ়ভাবেই বশীভূত হইয়াছেন। সম্ভবতঃ সে মালতীই হইবে।

(১০০) মক। (স্বগত) অহো আসক্তি! তবে কি প্রিয় সুহৃৎকে নিষেধ করিব?

(১) অথবা "কামদেব যেন তোমাকে মোহিত করে না" "তোমার মতি

[प्रकाशम् ।] अपि घयस्येन विदितं तदन्वयनामनो ? (२)

माध । सखे ! शृणुता, अथ तस्याः करेणुकारोहणसमय एव सपदि सखीसदृशकादन्यतमा वारयोषित् विलम्ब्य, बालबकुल-कुसुमावचयव्याजेन नेदीयसी भूत्वा, प्रणम्य, कुसुमापीडव्याजेन मामेवमुक्तवती, महाभाग ! कादम्बिदत्तवरदा रसभीरु इव वः सुमनसां

अवधारणसमर्थितदानसूचनार्थः । अथवा यत्तु सखीसदृशकं अवसन्निधानात् पूर्वं दीव्यतीव । आलम्बके पैतृसदृशाख्यानि—यस्यादिति । वदिष्यतीति पाठे माधवे इत्यर्थः । वामः मदनः कुत्सिता कुत्सिता वृथा: विरहिजनप्रहारिणो व्यापारा यस्य सवामुनः, यौवनं बालत्वञ्च कुत्सितदुर्वं विरहविवेदनामयकर्कशत्वमिति विरुद्धव्यधिकरणाश्रयः । यद्यपरत्वरागवशवर्तीत्यनयोरर्थं दीप-दीपार्थं इति भावः । यद्यपीतिशब्द इत्यन् ।

(२) इत्यादीति । "यत्तु यदर्थनायाम्" इत्यमरः । विलम्बेत्य विशेषणाद्वारा विरहं तदानुकूल्यं सन्धिपादविषु पृच्छति—अपीति । तस्या वारयोषितो वंशनामधेये ।

(३) माधवेत्यादि । करेणुका हस्तिनी, सखीसदृशकात् विच्छिद्येति शेषः । अथवेत्या एका वारयोषित् वेद्या । अत्र वारयोषित्पदं तस्याः वाहयन्तीवितसम्बन्धेषुपयोगात्मकादि-पर्यालोचनात् प्रयुक्तं, विलम्ब्य विरहिता बालबकुलकुसुमानां अवचयव्याजेन सखीसदृशकादेव पुष्पचयनव्याजेनेत्यर्थः । नेदीयसी अतिशयेनादीयसुदन्ते "अतिशायने तमबिष्ठनौ"इति नेदादेशः । मनीषवर्तिनी, कुसुमापीडव्याजेन पुष्पमालाव्याजेन एवं प्रणम्य सत्कृत्य । विरा-जन्त्याकाशादवतरन्त्यादित्यमानमालाभिरिव वा भान् कादिवतीत्यर्थः । महाभाग भाग्यं

যেন নিন্দিত কামবিকারাসক্ত না হয়" ইত্যাদি নিষেধবাক্য (অবন) ইহার পক্ষে নিরর্থক, যেহেতু কামব্যাপার-বিমুখিত ও বিবেক-বিনাশক এব যৌবন বর্তমান।

(২) (প্রকাশে) বয়স্য! তাহার বংশ ও নাম জানিতে পারিয়াছ কি?

(৩) মাধ। সখে! শ্রবণ কর, তৎপরে তাহার হস্তিনী-আরোহণকালেই একজন বারযোষিৎ অসংখ্য সখীসমূহ হইতে বিচ্ছিন্ন হইয়া পুষ্পচয়নব্যাজে বিলম্ব করিতে লাগিল এবং পুষ্পচয়নব্যাজেই ক্রমে আমার নিকটবর্তিনী হইয়া প্রণাম করতঃ পুষ্পমালা উপলক্ষ করিয়া আমাকে বলিল,—মহাভাগ সূত্রের

सन्निवेशः, कुतूहलिनी च नो भर्तृदारिका वर्त्तते, तस्यामभिनवो विचित्रः कुसुमोपन्यासारम्भस्तद्भवतु कृतार्थता वेदग्ध्यस्य, फलतु निर्माणरमणीयता, आसादयतु सरस एष भर्तृदारिकायां कण्ठावलम्बनमहार्घतामिति। (२)

मकरन्दः। अहो! वैदग्ध्यम्। (४)

यस्य स मकरन्दः: "मालो माल्याऽऽवोरसी"ति विश्वः। सुदिष्टगुणतया सुखस्पर्शतया, सुमनसां पुष्पाणां सन्निवेशो रचनाप्रकारविशेषः, कुतूहलिनी पुष्पदामनि कौतुकवती, भर्तृदारिका प्रभुकन्या, कन्यार्थकदारिकाशब्दयोः कन्यादाने मानुषावहनाय, तस्या मम भर्तृदारिकाया अभिनवो नवोत्थितः, विचित्रवर्णसंस्कारकारी, कुसुमोपन्यासः मालारचनाप्रकारः यदीति शेषः। एतेन मालारचनातिनैपुण्यादिच्छा सर्वेषां रचनाप्रायाणां परीक्षणीयमित्याशयः सूचितः। वैदग्ध्यस्य रचनापाटवस्य, कृतार्थता विदग्धजनप्रशंसया चरितार्थता, निर्माणरमणीयता रचनामनोज्ञता फलतु सन्निवेशनार्थेन सफला भवतु। सरसः सुखानः एव सन्निवेशः, कण्ठावलम्बनेन कण्ठाभरणतया धारणेन महार्घतां कण्ठासूत्रतां चासादयतु प्राप्नोतु। अथ पदे "सुदिष्टगुणतया सुदृष्टसम्बन्धेन सुमनसां शोभनमानसानां यः पुष्पाणां, पुष्पाणामित्यर्थे नीरोहादङ्कवचनम्।" सन्निवेशः संयोगरमणीयः आनुरूप्येणाहरणीयः। कुतूहलिनी कौतुकवती, अभिनवः अनन्यसामान्यतनः विचित्रः नानाः कुसुमानां मालस्य व्यापारः प्रकारः, वैदग्ध्यस्य सकलकलादिपरिशीलनस्य "लौकिके वैदिके कार्ये तथा शास्त्रियेऽपि च। सम्यक् परिचयप्रौढिर्विदग्धा"मिति गीयते।" इति लक्षणलक्षितस्येति यावत्। चरितार्थता उभयोरपि तुल्यतया कृतार्थता, निर्माणस्य सुमनःसृष्टिसम्बन्धविधानव्यापारस्य रमणीयता मनोज्ञता फलतु अनुरूपसङ्गमेन कृतार्था भवतु। सरसः मानुरागः एव सन्नयं कण्ठावलम्बनेन कण्ठनिबन्धेन महार्घतां प्राप्नोतु। इमेदंद्विष्टार्थबन्धिना शास्त्रप्रसिद्धेन व्युत्पत्तिप्रकारेण व्युत्पत्तीच्छार्थं सम्यक् सम्पादितमिति मन्तव्यम्।

(४) द्विष्टपदसंघटनेति शेषः।

সুসংলগ্নতানিবন্ধন আপনার কুসুম-সন্নিবেশ (মালাগাঁথা) (বড়ই) রমণীয়। আমার প্রভুকন্যা বিশেষ কুতূহলিনী আছেন। তাহাতেও লোকাতীত আশ্চর্যজনক মাল্যরচনাশক্তি আছে, সুতরাং (তদর্পণে) আপনার নৈপুণ্যচরিতার্থতা ও রচনা-মনোহারিত্ব সফল হউক, এবং এই মালা ভর্তৃদারিকার কণ্ঠসংলগ্ন হইয়া অমূল্যতা লাভ করুক।"

(৪) মকরন্দ। অহো (বাক্যরচনার) কৌশল!!

भाव। तया च सदनुयुक्तया यमाख्यातमियममात्यभूरिवसोः प्रसूतिर्मालती नाम, यदस्य प्रसादभूमिर्भरतदारिकायाः धात्रेयिका लवङ्गिका नामेति (५)

कला। [सहर्षम्।] किं नाम मालदी त्ति ? दिट्ठिया विलसिदं खु भयवदा देवेण कुसुमाउहेण, ता जिदं मए हिम्। (६)

भक्त। अमात्यभूरिवसोराजजेत्वपर्य्यायस्य। (७)

अपि च। मालती मालतीति मोदते भगवती कामन्दकी, तामु किल राजा नन्दनाय प्रार्थयते इति किञ्चदन्ती श्रूयते। (७)

---

(५) ययेत्यादि। सदनुयुक्तया सता प्रष्टया, यमुपेत्यर्थः। अमुपसर्गोपादानं दविनादि-व्यावर्त्तनेनोत्कर्षसूचनाय। यदस्यभूमि विषयभावं। एतेन यदि सती न वर्त्तयेति सूचितम्। धात्रेयिकेत्युपादानमनुजङ्गलीवचनलटीलनाय।

(६) दिट्ठिया आर्य्येण, विलसितं विजृम्भितं धर्म्मोत्साहपुरस्सरापारीक्षादिति भावः। जितमिति यदं मात्सर्य्यानदीवाक्षेप इत्यनुना विनयदर्शनं कर्त्तव्यतैवेत्यनेव सर्वेदित्याशयः।

(७) यदनुयुक्तया गौरवस्य, यमर्य्यादाः यपरिसीमा, अमात्यभूरिवसोरिति सत्यां यदिदिनुकूलं यदामात्यभूरिवसोरात्मजत्वेनैव गौरवहेतुरित्याशयः।

(७) यमर्य्यादिसुपादानविशेषमाह—अपि चेति। मालती मालतीति यदं विदूषकः, उच्चारयतीति शेषः। मोदते हर्षनिर्भरा भवति, मालया मालतीत्येव नामपदोच्चारण इति सा सुलभपारीक्षाकाशयः। तामित्यादिना नन्दननिर्बन्धेन राज्ञः प्रार्थनया सता गौरवातिशयं दुर्लभत्वञ्च प्रतिपादितम्।

---

(५) प्रश्न। আপনি জিজ্ঞাসা করিলে সে বলিল, তিনি অমাত্য ভূরিবসুর কন্যা,—নাম মালতী, আমি প্রভুকন্যার বিশ্বস্তা ধাত্রেয়ী, নাম লবঙ্গিকা।

(৬) কলা। (হর্ষের সহিত) কি মালতী? আর্য্যক্রমেই কামদেবকর্ত্তৃক বিলসিত হইয়াছেন, তবে আমরাই জয়লাভ করিলাম্।

(৬-৭) ভক্ত। অমাত্য ভূরিবসুর কন্যা,—ইহা তাহার গৌরবের সীমা নহে। আরও দেখ, মালতী মালতী উচ্চারণ করিলেই ভগবতী কামন্দকী হর্ষলাভ

माध। तया चाहमभ्यर्थ्यमानस्तां वकुलमालामात्मनः कण्ठादवतार्य्य दत्तवान्, असौ पुनरभिनिविष्टया दृशा मालतीमुखावलोकनविह्वलतया विषमविरचितैकभागामात्मामेव बहु मन्यमाना महानयं प्रसाद इति व्याहृत्य गृहीतवती, अनन्तरञ्च यात्राभङ्गप्रचलितस्य मरुतः पौरजनस्य सङ्कुलेन विघटितायां तस्यामागतोऽस्मि। (८)

मक। वयस्य! मालत्या अपि स्नेहदर्शनात् सुश्लिष्टमेतत्, योऽपि हि कपोलपाण्डुतादिचिह्नसूचितः प्राक् प्रसन्नवदनायाः कामाभिष्वङ्गः,

---

(८) माधवेत्यादि। तया सखीकृतया अभ्यर्थ्यमानः निवेदयद्भिर्याचमानः, "अनुनयमानः" इति क्वचित् पाठः। सोऽपि तदर्थक एव। अवतार्य्येत्यनेन द्वितीयपुष्पसुकुमारतया मालायां मालत्याः सप्रश्रयादरमभावना सूचिता। असौ सखीकृता अभिनिविष्टया सादरसन्निवेशितया दृशा मालतीमुखावलोकनविह्वलतया मालतीवदनदर्शनव्याकुलतया सङ्गमसाध्वसचित्तत्वेन विकलहृदयतया वा विषम पूर्वभागविन्यासं यथा तथा, विरचितः यथित एकभागो यस्यां तथाभूतां तामेव मालां बहुमन्यमाना श्लाघमाना, मत्प्रेम्णेत्यर्थः। प्रसादः अनुग्रहः। यात्राया उत्सवस्य महता समाजेन प्रचलितस्य चटुलचलिकया धावितस्य पौरजनस्य, पौरैर्जनजनस्येति पाठे "बहुवचनञ्चेतनं सर्वजनाधारसङ्घार्थं"। बहुवर्णोच्चारयुक्तं यत्तन्निगम"मिति लक्षणबलाज्जनसङ्घेत्यर्थः। सङ्कुलेन समावेशेन विघटितायां नैवपथमतिपातितायां तस्यां सखीकायाम्।

(९) माधवीत्कण्ठाविनोदनाय मकरन्दस्तस्मिन् मालत्या अनुरागं ज्ञातमपि पुनर्निर्द्दिदिक्षति—

करেন। নন্দনের জন্য (বয়ঃ) রাজা তাহাকে প্রার্থনা করিতেছেন এরূপ কিংবদন্তী শুনা যায়।

(৮) মাধ। তৎকর্ত্তৃক প্রার্থিত হইয়া আমি নিজের কণ্ঠ হইতে বকুলমালা খুলিয়া দিলাম। মালতী মুখাবলোকন ব্যাকুলতানিবন্ধন মালার শেষ ভাগ পূর্ব্বভাগের ন্যায় সুন্দর না হইলেও তাহাকেই সে অতিনিবিষ্ট দৃষ্টিতে প্রশংসা করিতে করিতে "ইহা মহা-অনুগ্রহ" এইকথা বলিয়া গ্রহণ করিল। অনন্তর উৎসবসমাপ্তিনিবন্ধন (সবেগে) ধাবিত পৌরজনসন্নিবেশদ্বারা সে অদৃশ্য হইলে আমিও চলিয়া আসিলাম্।

(৯) মক। বয়স্য! তোমাদের উভয়েরই পরস্পর স্নেহ দেখা যায়, বলিয়া

सोऽपि त्वद्विरहज्वरप्रलापमेवैतत्. एतत्तु न जायते. क्व दृष्ट-पूर्वस्तयाऽनयेति,[१] न खलु लाटस्त्री महाभागधेयाः कुमार्यो-ऽन्यदासक्तमनसो भूत्वा अन्यत्र चटूक्तिस्त्रो भवन्ति ।(९) अपि च—

अस्योऽन्यसक्तिमद्दृशां सखीनाम् तस्यास्त्वयि प्रागनुरागलिङ्गम् ।
अस्यापि कोऽपीति निवेदितस्य धात्रेयिकायाश्चतुरं वचस्ते ॥ १० ॥

वयस्यीत्यादिना । आत्मनाऽदौत्यविषयत्वेन सखि आत्मना अनुभवाच्च तव ईदृशदर्शनादित्यर्थः । एतत् परस्परानुरागप्रारम्भदर्शनादिकं दृष्टिपूतं मनुचिन्तं, नतु प्रथमदर्शनेनैवायमेव अस्मां स्वपोतपक्षिणादिकामभावस्तोकमात्रदर्शनेनान्यस्मिन्नपि तस्मिंस्तत् भावदर्शनेनानुमानसिद्धत्वात् चर्वं तव अनानुरागो युक्त इत्याशङ्क्याह—ओदीच्यादि । तस्मिन्नेव इति तस्मिन्नेव निवेदनं दैतुर्यमेति शिवः । अत्र तस्मिन्नेव इत्याशङ्क्याह दैतुं दर्शयति—न खलु इत्यादिना । लाटस्त्रीः प्रथमदर्शनपूताः, महाभागधेयाः परमसौभाग्यशालिन्य, चटूक्तिस्त्रः चटुप्रीतिशालिन्यः न खलु भवन्ति । लाटस्त्रीसुलभौदार्यादिवर्णनात् चटूक्तानुरागहेतुविषयकसंशयमाह इति भावः ।

(१०) चाक्षिकादिकालभावस्य भावसिद्धत्वमते हेतुमत्त्वमाह—अपि च अस्योदीच्यादि । सखिभिरहृया परस्परानुरागलक्षितहृदयानां तथा सखीनां "अस्यापि कोऽपीति" निवेदित एव तव मङ्गलशिक्षतीति तात्पर्यम् पूर्वोक्तं अस्यापि कोऽपीत्यादि वचनमित्यर्थः । तस्मिं प्रागनुरागस्य पूर्वानुरागस्य लिङ्गं ज्ञापकं तस्मिं पूर्वानुरागभावे एवं विज्ञापकं सर्वथैवानुमन्यस्व इत्याहेति भावः । धात्रेयिकाया धात्र्याः चतुरं अनुकूलिनीत्यादि लिङ्गं वचनं अपि प्रागनुरागलिङ्गमित्यर्थः, अन्यथा धात्र्या अपि एवं वचनासी भावः । इन्दुवदनान् ।

এই অনুরাগ প্রথমদর্শনাদি জানাই হইয়াছে। তাহার সেই কামভাব যৌবনারম্ভের পাণ্ডুবর্ণাদি চিহ্নদ্বারা পূর্বোৎপন্ন বলিয়া সূচিত হইতেছে, সেই কামভাবেরও যে তুমিই নিমিত্ত হইয়া অভিব্যক্ত হইতেছ, তাহা কোথায় যে সে পূর্বে প্রিয় সমস্তকে দেখিল, তাহা জানি না। অথবা তাদৃশ সৌভাগ্যশালিনী কুমারীগণ একেতে অনুরক্তা হইয়া অন্যেতে চাটুপ্রীতিশালিনী হয় না।

(১০) আরও দেখ, অন্যোৎস্থাবলোকনতৎপর তাহার সখীদিগের "কস্যাপি কোঽপি" ইত্যাদি নিবেদন এবং ধাত্রেয়িকার চাটুবাক্যপূর্ণ বাক্যও তোমাতেই পূর্বানুরাগের বিজ্ঞাপক।

कल.। [उपसृत्य ।] एदं चित्तफलअं । (ण)

(इति चित्रफलकं दर्शयति । उभौ पश्यतः ।)

मक । कलहंसक ! केनैतन्माधवस्य प्रतिबिम्बमभिलिखितम् ?(

कल । जेण जेव्व से हिअअं अवहरिदम् (त) ।

मक । अपि मालत्या ? (१२)

कल । अधइं । (थ)

माध । वयस्य मकरन्द ! प्रमदप्रायस्ते वितर्कः । (१३)

(ण) एतच्चित्रफलकम् ।

(त) येनैवास्य हृदयमपहृतम् ।

(थ) अथ किम् ।

(ण) "त्वयि प्रागनुरागिणि"मिति मकरन्दोक्तसमर्थने तत्स्वभावसरस्य कलहंसस्य तत्काले चित्रदर्शनं सर्वथा तदनुचितम् ।

(१२) पूर्वापरपर्यालोचनेन मालत्येव लिखितमित्यस्यानुमितत्वेऽपि सर्वथा सन्देहनिराकरणाय सामान्यतः पृच्छति—केनेति ।

(त) मकरन्दस्य हृदगतं भावं श्रोतुं कलहंसोत्तरयति—येनेति । यद्भिन्नकर्तृकस्य चित्रविकारस्तेनैव लिखितमित्यर्थः ।

(१२) अपि प्रश्ने । मालत्येति लिखितमिति शेषः ।

(थ) अथकिमित्यभ्युपगमे, वाढं मालत्येव लिखितमित्यर्थः ।

(१३) प्रमदप्रायः संशयलक्षणमालिन्यबाहुल्येन निश्चय., तर्कः "त्वयैव सा पूर्वमनुरक्ते"ति तर्कोऽ ।

(ण) कल । (उपस्थित हइया) एই চিত্রফলক।

(চিত্রফলক দেখাইল ও উভয়ে অবলোকন করিতে লাগিল)

(১১) মক । কলহংসক ! মাধবের এই প্রতিবিম্ব কে অঙ্কিত করিয়াছে ?

(ত) কল । যৎকর্তৃক ইহার হৃদয় অপহৃত হইয়াছে ।

(১২) মক । তবে কি মালতীকর্তৃক অঙ্কিত হইয়াছে ?

(থ) কল । তাহাই (মালতীই অঙ্কিত করিয়াছে)।

(১৩) মাধ । বয়স্য মকরন্দ ! তোমার তর্ক একপ্রকার সন্দেহ-রহিত ।

मक० । कलहंसक ! कुतोऽस्याधिगमः ? (१३)

कल० । मए दाव मन्दारिआए हत्थादो, तत्थवि सवत्ति-आसआसादो (ट) ।

मक० । अथ किमाह मन्दारिका माधवालेख्यप्रयोजनं सालत्या: ? (१५)

कल० । उक्कण्ठाविणोदोत्ति (ठ)

मक० । वयस्य माधव ! सर्वथा समाश्वसिहि ।

या कौमुदीनयनयोर्भवतः सृजन्मा,
तस्या भवानपि मनोरथबन्धबन्धुः ।
सत्त्वङ्कमं प्रति सखे ! न हि संशयोऽस्ति,
यस्मिन् विधिश्च घटनाय कृताभियोगः ॥ (१६)

(ट) मया सालत् मन्दारिकाया हस्तात् तत्रापि सवत्निकासकाशात् ।

(ठ) उत्कण्ठाविनोद इति ।

---

(१३) कुतः कस्मात्कारणात्, अस्य विषयस्य, अधिगमः प्राप्तिः लब्धिरिति यावत् ।

(ट) मयाधिगमः इति पूर्वेण सम्बन्धः ।

(ठ) उत्कण्ठाविनोद इति प्रयोजनमित्यनेन सम्बन्धः । माधवालेख्या मालती तदवलोकना-दिभिः सात्कालमात्मसात्कृता लेख्यालिखीसपत्नीनेवाद्या अधिरूढ'त्व प्रमदवनीलक्ष' ।

(१६) धिति । हे सखे ! या त्वत्सखी भवत नयनयोर्नेत्रयो, कौमुदी ज्योत्स्ना अतिशयाह्लादनिदानत्वात् । सृजन्मा शोभनजन्मा सत्रापि तथा मनीरथस्य चिरितार्थस्य बन्धाय बन्धाय बन्धुः प्रिय, सापि स्वयं च मनोरथ बन्धुनिबन्धनीभूत, । तत् तस्मात् उभयोरुत्कण्ठानुरागात् सङ्गमं सम्प्रयोगेण प्रति उद्दिश्य सखे ह वि अस्ति । नन्वेवं परस्परानुरागसद्भावेऽपि दैवप्रतिकूल्यादसाध्यत्वाशङ्कायां दैवस्यानुकूलत्वमाह—यस्मिन्निति । यस्मिन् सङ्गमे विधि भदृ' भदृ' कालय

---

(१३) मक० । कलहंसक । কাহাৰ নিকট ইহা পাইলে ?

(ट) कल० । আমি মন্দারিকার হস্ত হইতে (পাইয়াছি) ও মন্দারিকা সবত্নিকার হস্ত হইতে (পাইয়াছে)

(१५) मक० । মন্দারিকা মাধবালেখ্য বালতীর কি প্রয়োজন বলিয়াছে ?

(ठ) कल० । উৎকণ্ঠাবিনোদনই প্রয়োজন ।

(१६) मक० । বয়স্য মাধব ! সর্ব্বথা আশ্বস্ত হও । হে সখে ! সেই

द्रष्टव्यस्वरूपा च भवतो विकारहेतुः तदत्रैव लिख्यतां मालती। (१७)

माध। 'यदभिरुचितं वयस्याय, तदुपनय चित्रफलकं चित्र-वर्त्तिकाश्च (१८)। [मकरन्द उपनयति]।

माध। [लिखन्]। सखे मकरन्द!

बारंबारं तिरयति दृगोरुद्गमं बाष्पपूर-
स्तत्सङ्क्लोपचितजड़िमा स्तम्भमभ्येति गात्रम्।
सद्यः चित्तप्रणयमविरतोत्कम्पलोलाङ्गुलीकः,
पाणिर्लेखाविधिषु नितरां वर्त्तते. किङ्करोमि॥ (१९)

कृतानियोगः कृतपत्रः। एकस्य प्रथम उभयोरनुरूपनिर्माणैकदेयमापणादिभिः अपरस्य च मालतीप्रणयानुरागादिसम्पादनादिभिः सुखभाक्। बहुलमतिनर्म्म कृतम्।

(१७) भवतो विकारस्य कामभावस्य हेतुः यत्पादयिनी मालती द्रष्टव्यं मयाप्यवलोकनीयं स्वरूपं आकृतिर्यस्या तथाभूता, तमपि मालतीप्रतिकृतिदर्शनोत्कण्ठा वर्त्तते इत्यर्थः। तत् तस्मात् अत्रैव चित्रफलके।

(१८) वयस्यायेति चतुर्थ्यर्थेऽव्ययोगे संप्रदाने चतुर्थी। तदिष्यते इति शेषः। चित्रवर्त्तिकाः तूलिकादिचित्रोपकरणानि।

(१९) बारं बारमिति। बाष्पपूरः तदनुध्यानसमुत्पन्नाश्रुप्रवाहः बारं बारं पुनः पुनः

मालती तोमार नयनेर (आह्लादजनिका) कौमुदीस्वरूप, शोभनाङ्गी तुमिओ ताहार मनोरथबन्धनेर जन्य प्रिय, सुतराः तोमादेर सम्मिलने (कोनओ) सन्देह नाई। याहाते विधाता एवं मदनओ यत्नवान् बलिया मने हय।

(१७) आपनार विकारहेतु मालतीर प्रतिकृति आमारओ द्रष्टव्य, अतएव एই चित्रफलकेই मालतीके अङ्कित करुन।

(१८) माध। वयस्येर येरूप अभिरुचि, तबे चित्रफलक ओ तूलिकादि चित्रोपकरण आनयन कर। (मकरन्द आनयन करिल।)

(१९) माध। [ ] सखे मकरन्द!

तथापि व्यवसितोऽस्मि (२०) । [चित्रफलकमालिख्य प्रदर्शयति] ।

मकः । [विलोक्य] । उपपन्नस्तावदत्र भवतोऽभिष्वङ्गः । [सकौतुकम्] । कथमचिरेणैव निर्माय लिखितः श्लोकः (२१) । [वाचयति] ।

मध्यमासोऽपीत्यर्थः । दृशोः चक्षुषोः, उद्गमं प्रचारं निरयति (निरस्करोतीत्यर्थे निरम् + दम् + ति) आच्छादयति । "दृशावुद्गत" इति पाठे उद्गतौ बाष्पपुरः दृशौ तिरयतीत्यर्थः । तथा, मङ्क्षीव निरन्तरानुचिन्तनेन उपहित. ग्राहः आडिमा क्रियान्यपाटव येन तादृशं गात्रं सर्वं काष्ठांजलत्वं अनुयातेति ग्राहीति। अथ मम पाणि. करः सद्यः तत्क्षणात् लेखनारम्भसमय एवेत्यर्थः, चित्रम् खे दलनीलाद्रौमिवन् लेखाविधिषु लेखनक्रियासु नितरां अतिमय यथा यथा अविरोत्कर्षेण अविच्छिन्नवेपथुना लीलावशना अङ्गुलयो यस्य तादृशो वर्णते, अङ्गुलीनामेव लेखनक्रियासमयो सम्भावनात्तासां शिथिलं गाढोनीत्यर्थः । "सतरा"मिति पाठे मम ताडशः पाणिः सतरां नैव लेखाविधिषु वर्तते इत्यर्थः । अत्र किं करोमि ? यथार्थं तदालेखितप्रकटनं सम्प्रति दुर्घट-मित्याशयः । अनेनानुभावसञ्चारिभावौ दर्शितौ । तेषां लक्षणानि यथा— "अस्मुनेत्रोद्गमं वारि दुःखक्रोधमदक्षमम् ।" "क्रियान्यपाटवं गात्रं विस्मोत्कम्पादिभिः । सम्भ्रमे त्रासहर्षौत्सुक्यरोमाञ्चादिभि ॥" "वपुर्ग्लानौत्सुक्यं भ्रमः रतिश्रमोत्कम्पादिभिः । रागरोग-भयादिभ्यः कम्पो गात्रस्य वेपथुः " ॥ मन्दाक्रान्ता वृत्तम् ।

(२०) व्यवसितः चालेख्यलेखने उद्युक्त ।

(२१) लालसा लेखनसमयमेवातीत्यावयेनेति भाव ।

অশ্রুপ্রবাহ (উদ্গত হইয়া) বার বার আমার নেত্রবৃত্তি আচ্ছাদিত করিতেছে। নিরন্তর মানসীর অনুচিন্তনবলে জড়তাপ্রাপ্ত করিয়া শরীর কার্য্যে অক্ষম হইতেছে। ক্রিয়া প্রারম্ভেই আমার কত ঘর্ম্মাক্ত ও অতিশয় অবিচ্ছিন্ন কম্পনবশতঃ চঞ্চলাঙ্গুলি হইতেছে, আমি কি করিব ?

(২০) তথাপিও আমি আলেখ্যলেখনে উদ্যুক্ত আছি। (বহুকালে অঙ্কিত করিয়া দেখাইলেন।)

(২১) মকঃ। (অবলোকন করিয়া) এই মালতীতে তোমার আসক্তি যুক্তই হইয়াছে। (কৌতুকের সহিত) আঃ! অল্প কালমধ্যে একটি শ্লোকও নির্ম্মাণ করিয়া লিখিয়াছ। (পড়িতে লাগিলেন)।

जगति जयिनस्ते ते भावा नवेन्दुकलादयः,
प्रकृतिमधुराः सन्त्वेवान्ये मनो मदयन्ति ये ।
मम तु यदियं यात्रा लोके विलोचनचन्द्रिका,
नयनविषयं प्राप्यान्येकः स एव महोत्सवः ॥ (२२)

---

(२१) जगतीति। जगति भुवने जयिनः पुष्पसायकमाहात्म्यसम्पादनेन विरहिजनमनश्चौरा: प्रकृतिमधुराः स्वभावसुन्दरा: अत्र मालतीव्यतिरिक्ता ते प्रसिद्धा ते नवेन्दुकलादयः नवमल्लिकाप्रभृतयश्च । बहुवचनेन प्रथमचन्द्रदर्शनसौरभाधिक्यहर्षप्रदत्वप्रसिद्धिश्च नवेति । आदिना कुसुदकह्लारादिपरिग्रहः । भावा पदार्था: यद्वा भावयन्ति इति भावा: सुन्दरतया भावनार्हा. सन्तोत्र, ये मन: विवेकरहितानां मालतीवदनमनालोकवतां वा चित्तं मदयन्ति सकौतुकयन्ति । तु किन्तु लोके भुवने विलोचनचन्द्रिका समतीव्राह्लादकत्वेन नेत्रद्योतनत्वेन च मालती मम नयनविषयं मत्प्रत्यक्षनिर्देशात् नेत्रगोचरत्वं यद्यस्मात् प्राप्ता सत्ता यद्यर्थं यातस्तिष्ठति । स एव जगन्निष्ठत्वेति शेष:। एक: अद्वितीय: महोत्सव: आनन्दहेतु: । मालतीव्यतिरिक्ता आह्लादप्रदत्वेन प्रसिद्धा ये चन्द्रादय: सन्ति तेषु मालतीवदनावलोकनात् भिन्नत्वविवक्षया अन्ये यामाह्लादकत्वमपि चन्द्रस्तु मम तु महोत्सवमेव मदनुरागादिकं भवतु नाम्नामृत् । यावल्लोकं महान् सुखस्य हर्षस्य उदय: । एतेन मालतीवदनावलोकनानुराग: प्रकाशित: । अत्र प्रकाश्यमानलिङ्गभावित्वात् "स" इति पुंस्त्वम् । अथ चन्द्रादौ स्त्रीपुंसाह्लादजनकत्वं मालती ति वचनानन्तरमाह्लादप्रदत्वे नेत्रद्योतनत्वे चोक्ते सामर्थ्या विलोचनचन्द्रिकेति चन्द्रिकात्वारोपेण साधनस्य स्वरूपो व्याहतमिति चेन्न यथा चन्द्रिकात्वारोपस्य लोचनानन्दविधायिनीति प्रसिद्धि, तथा मम मालतीवेति इति निधाय केवलं लोकप्रसिद्धा चन्द्रिकात्वारोपेणेव व्याहतत्वस्य परिहृतत्वात् । वाचिकोऽयं श्लेष.। यथोक्तं— "रूपादृष्टेरास्पदं: श्लोकेर्यस्मै, यद्वेषया। मालालङ्कारमञ्जूषेर्वाचिकी रत्न रच्यते ॥" अत्र प्रकृतिमधुरत्वसाम्येऽपि मालत्या एव हर्षजनकत्वोत्कर्षसंभावनादतिरेक:, विलोचनचन्द्रिकेति रूपकं विशेषणात् श्लेषालङ्कार:। हरिणीवृत्तम्। लक्षणं यथा—"नसमरसलायै: षड्भिरैदैर्यकारिणी मता।"

---

(२२) জগতে বিজয়ী নূতন চন্দ্রকলা প্রভৃতি স্বভাবসুন্দর অন্য যে পদার্থ ই প্রসিদ্ধ আছে, যাহারা (অন্যের) মনস্তুষ্টিবিধান করে। কিন্তু ভুবনে লোচন-চন্দ্রিকাস্বরূপ এই মালতী যে আমার নেত্রপথবর্তিনী হইয়াছে, তাহাই আমার ইহ জন্মে একমাত্র মহোৎসবস্বরূপ।

[প্রবিশ্য (২৩) নেপথ্যে মন্দারিকা]। কলহংসক! পদানুসারেণ সমাগতাস্মি। [মাধবমকরন্দৌ দৃষ্ট্বা সলজ্জম্]। কথং, দেবি মহানুভাবা দৃশ্যন্তে? (ক)। [উপসৃত্য প্রণমতি।]

ভর্ত্রী। মন্দারিকে! উপাস্যতাম্। (২৪)

মন্দা। [উপবিশ্য।] কলহংসক! উপনয় মে চিত্রফলকম্। (খ)

কল। [গৃহীত্বা।] গৃহ্যতাম্। (ক)

মন্দা। [বিলোক্য]। কলহংসক! কেন পুনঃ, কিংনিমিত্তং বা, এষা মালতী আলিখিতা? (ঘ)

(ক) কলহংসক! পদানুসারেণ সমাগতাস্মি। কথং দেবি মহানুভাবা দৃশ্যন্তে?

(খ) কলহংসক! উপনয় মে চিত্রফলকম্।

(ক) গৃহ্যতাম্।

(ঘ) কলহংসক! কেন পুনঃ কিং নিমিত্তং বা এষা মালতী আলিখিতা?

---

(২৩) এষা যষ্টীদেবীয়ঃ প্রতীহারীয় প্রবিশতি নাট্যেন।

(ক) ক্বচিৎ কলহংস ইত্যস্তঃ "কলহংস! ক্ষীরং ক্ষীরং" ইত্যধিকঃ পাঠঃ। তত্র বিবক্ষিতস্য মনুষ্যস্য। ক্ষীরং হীতি মন্ত্রীধর্মস্য নাম। ক্ষীরেণ মদীয়াদৃষ্টস্য চিত্রফলকস্যানীতিমিত্যুপহাসঃ। মহানুভাবাশ্চ পুরুষা অবিচারানুসারেণৈবেত্যর্থঃ। মকরন্দমিতি সমুদ্রসম্বন্ধিনী কস্য মাইনমনুদ্রামাদীয়েত্যস্তা যুক্তা। নাগীতি যে চিত্রফলকে লিখিতা দৃশ্যন্তে। ক্ষীরবাটকলে পাঠঃ। অন্যথা ক্ষিপ্তে মনুষ্যস্য—সে দুর্বৃদ্ধিস্য ইত্যর্থঃ।

(২৪) উপাস্যতামিত্যাদরোক্তিরনলক্ষ্যার্থমহাপ্রভাবতায়া।

---

(২৩) মন্দারিকা। (সত্বর প্রবিষ্টা হইয়া) কলহংসক! তোমার পদচিহ্নানুসারে আসিয়া তোমাকে প্রাপ্ত হইলাম। (মাধব ও মকরন্দকে দেখিয়া সলজ্জ ভাবে) একি সেই মহাপুরুষগণও (দেখি) এখানেই? (নিকটে আসিয়া প্রণাম)।

(২৪) উত্তরে। মন্দারিকে। এস্থানে উপবেশন কর।

(খ) মন্দা। (উপবেশন করিয়া) কলহংসক! আমার চিত্রফলক আনয়ন কর।

(ক) কল। (গ্রহণ করিয়া) এই গ্রহণ কর।

(ঘ) মন্দা। (বিলোকন করিয়া) কলহংসক! কে আবার কি নিমিত্ত ইহাতে মালতীর প্রতিকৃতি লিখিল?

कल। जो जेण णिमित्तेण मालदीए (भ)।

मन्दा। [सहर्षं]। दिट्ठिआ दंसिदफलं दाणिं विण्णाणं पभावदीए (म)।

मकं। मन्दारिके! यदेव वस्तुनि एष ते वल्लभः कथयति, अपि तथा तत्? (२५)

मन्दा। महाभाग! अथ किम्। (य)

मक। क्व पुनर्मालती माधवं प्राग् दृष्टवती? (२६)

(भ) यः येन निमित्तेन मालत्या।

(म) दिष्ट्या दर्शितफलमिदानीं विज्ञानं प्रजापतेः।

(य) महाभाग! अथ किम्?

(भ) अभिलिखितः इति शेषः। तथाच मालत्या विनोदनिमित्तं माधवो लिखितः, माधवेनापि विनोदनिमित्तं मालती लिखितेत्यर्थः।

(म) सहर्षमित्यादि, दृश्यव्यापारस्य फलीभूतत्वं हर्षहेतुः। प्रजापतेः सृष्टुः विज्ञानं शिल्पिकौशलं इदानीं उपदर्शितफलं सञ्जातमिति शेषः। देहयष्टिरूपवर्णावयवादिसम्पन्नस्य विधातुः परमाराधनीय एव फलमिति तद्विधाता मकरं विधातुः शिल्पिकौशलमिति भावः।

(२५) अथ प्रतिज्ञातविषये वस्तुनि एष ते वल्लभः स्वामी कलहंसः यत् कथयति, तत्सन्तोषविनोदनाय मालत्या लिखितमिति यद् ब्रूते, अपि सत्य, तथा? यत् किं सत्यम्?

(य) अथ किमित्यनुपगमे सदवितथमेवेत्यर्थः।

(२६) पूर्वमनवलोकने मालत्या उत्कण्ठाविनोदनाय माधवालेख्यलेखनासम्भवादवलोकनस्य आपरिशेषत्वात् पृच्छति—क्वेति।

(भ) कल। मालती যে নিমিত্ত যাহাকে লিখিয়াছিল।

(ম) মন্দা। (হর্ষের সহিত) ভাগ্যক্রমে ইদানীং প্রজাপতির শিল্পকৌশল সফল হইল।

(২৫) মক। মন্দারিকে? এ বিষয়ে তোমার ভর্তা কলহংস যাহা বলিতেছে, তাহা কি ঠিক?

(য) মন্দা। মহাভাগ! অবশ্যই ঠিক।

(২৬) মক। (তবে) মালতী পূর্ব্বে কোথায় মাধবকে দেখিয়াছিল?

মন্দা। লবঙ্গিকা ভণতি, বাঢ়মবগচ্ছেতি। (২)

মকরন্দঃ। বয়স্য! ননু অমাত্যভবনাসন্নস্যৈব বহুশঃ সঞ্চরাবহৈ, তদুপপন্নমেতৎ। (২৩)

মন্দা। অণুমন্নন্তু মং মহাণুভাবা, জাব এদং ভঅবদো দেবস্স মঅণস্স সুচরিদং পিঅসহীএ লবঙ্গিআএ নিবেদেমি (ল)

মকরন্দঃ। প্রাপ্তাবসরমেনঙ্গবত্যাঃ। (২৮)

[মন্দারিকা চিত্রফলকং গৃহীত্বা নিষ্ক্রান্তা]।

---

(২) লবঙ্গিকা ভণতি বাঢ়মবগচ্ছেতি।

(ল) অনুমন্যতাং মা মহানুভাবৌ, যাবদিদং ভগবতো দেবস্য মদনস্য সুচরিতং প্রিয়সখ্যা লবঙ্গিকায়া নিবেদয়ামি।

---

(২) বাঢ়মবগচ্ছতা সমাকর্ণিতো (ত্বয়া) ভবতীত্যনেন সম্বন্ধঃ।

(২৩) নন্ন তজ্জাত্ অমাত্যভবনসন্নিহিতমার্গে বি বহুশো গমনাৎ, এতন্মালতীলবঙ্গিকা প্রাপ্তয়া সাধয়ন্ত্য মদনেন তদুপপন্নং যদ্বিশ্রম্ভনীয়মিত্যর্থঃ।

(ল) মদনস্য অধীনমাত্মানমাত্মা যস্যাঃ সা তথোক্তা তস্যা ইতি যাবৎ। দেবস্য অস্মীয়স্যানুরাগ-সম্বর্ধনাদিকীর্তনীয়স্য মদনস্য আসন্নং সুচরিতং এতদনুরাগবর্ধনমন্ত্রযন্ত্র সুচরিতাচারম্। লবঙ্গিকায়া ইতি সম্বন্ধে ষষ্ঠী। "লবঙ্গিকায়ৈ" ইতি ক্বচিৎ পাঠঃ। লবঙ্গিকয়ৈবাস্মদ্বচনং নিবৃক্তেতি তস্যৈবাং নিবেদয়ামি পশ্চাৎ সা যথোচিতমাধাস্যতীতি ভাবঃ।

(২৮) এতন্ন সাধয়ানুরাগনিবেদনাদিকং প্রাপ্তাবসরং সম্পাদকায়।

---

(২) মন্দা। লবঙ্গিকা বলেন, জানিলাম যাইয়া দেখিয়াছিল।

(২৩) অমাত্যভবনের সন্নিহিত পথ দিয়া আমরা বহু বার যাতায়াত করিয়াছি, সুতরাং ইহা (প্রবাদ হইতে দর্শন) হইতে পারে।

(ল) মন্দা। তবে আপনারা অনুমতি করুন যে, ভগবান্ কামদেবের (অন্যোন্যের অনুরাগবর্দ্ধনরূপ) এই সুসমাচার যাইয়া প্রিয়সখী লবঙ্গিকার নিকট নিবেদন করি।

(২৮) মকরন্দ। মাধবের অনুরাগাদি নিবেদন করিবার তোমার এই অবকাশ বটে।

(মন্দারিকা চিত্রফলক গ্রহণ করিয়া নিষ্ক্রান্ত হইল)।

मक। वयस्य! खरतरकिरणोऽयं भगवान् सहस्रदीधितिः अलङ्करोति मध्यमङ्गः, तदेहि संध्यायमेव गच्छावः। (२९)[इत्युत्थाय परिक्रामतः]।

माध। एवं हि मन्ये।

घर्माम्भोविसरविसर्पनेरिटानीम् सुप्ताच्याः परिजनवारसुन्दरीणाम्।
तत्प्रातर्विहितविचित्रपत्रलेखावैदग्ध्यं जहति कपोलकुङ्कुमानि॥ ३०

---

(२९) सहस्रदीधितिः सूर्यः। सन्ध्यायं सदनं "सन्ध्याय सन्निवेशे च सन्ध्यातोऽपि च दृश्यते" इति मेदिनी।

(३०) घर्मेति। इदानीं मध्याह्ने सुप्ते सखिषु यत्र तत्र मालत्या परिजनवारसुन्दरीणां परिचारिकाणां वारविलासिनीनां कपोलगोर्णन्द्रस्वेदवीरणुलिप्तानि कुङ्कुमानि (कङ्कुमं वि), एतेनानुलेपनविशेषः, कथितः। यथोक्तं—"वैदग्ध्यं स्नेपचारितं सत्रीणां कपोलयोः। तस्मादनं मदनयोर्यत्तत स्नेहनुलेपनम्॥" घर्माम्भसा स्वेदजलानां विसरस्य समूहस्य "समूहे निवहव्रातसन्दोहविसरव्रजाः" इत्यमरः। विसर्पनैः प्रसरणैः करणैः तत्र पूर्वाह्णे सखा मालतीभिर्न, प्रातर्विहितानां माङ्गलिकतया प्रभातसमये विरचितानां विचित्राणां चन्दनागरुकर्पूरादीनां पत्रलेखानां पत्रावलीनां वैदग्ध्यं (कर्म) जहति त्यजन्ति। पत्राकारविरचितविचित्रचित्रभूषणानि स्वेदजलात् विगलदौन्दर्याणीदानीं जायन्तीति भावः। मालत्याः सखात्वेन पत्रावल्यभावात्परिजनेत्युक्तं। तस्मादावश्यकतया सदचित्तसम्बन्धकथाया एव स्वभावसिद्धत्वेन तत्परिजनवर्णनमपि न विरुद्धं। यथोक्तं—"तत्तत्सम्बन्धकथा मुक्त्वा सर्वावस्थासतां हि" इति। मन्दविसर्पोद्धतम्। "स्याद्मालिनीभतरगा मन्दविसर्पीह सभ्रमैः" इति तल्लक्षणम्।

---

(२९) मक। हे वयस्य! प्रखरकिरण ভগবান্ সূর্যদেব মধ্যাহ্নকাল অলঙ্কৃত করিতেছেন; সুতরাং এস, আমরা গৃহেই গমন করি। (উঠিয়া পরিক্রমণ)।

(৩০) মাধ। আমার এইরূপ মনে হয় যে, এই মধ্যাহ্ন কালে সুপ্তাদের মালতীর পরিচারিকা বারবিলাসিনীদিগের কপোলানুলিপ্ত কুঙ্কুমসকল স্বেদজলসমূহের সঞ্চারবশতঃ সেই প্রাতঃকালবিহিত বিচিত্র পত্রাবলীর সৌন্দর্য পরিত্যাগ করিয়াছে।

अपि च—सद्योमलत्कुलकरालकुन्दकोश-
प्रद्योतदन्तमकरन्दगन्धबन्धो ! ।
सामीप्यप्रचलविलोचनां नतालीं-
मालिङ्गन् पवन ! मम स्पृशाङ्गमङ्गम् ॥ ३१

मक० । (स्वगतम्) अभिधत्ते, हन्त कथमेष माधवम्
सुकुमारकायमनवद्यवृत्तः स्मरः ।
अचिरेण वैक्लवविवर्तदारुणः
कलभं कठोर इव कूटपाकलः ॥ ३२

---

(३१) सद्यःकालस्थतया बालोरपेतमलेन [illegible]नापूरकायमलमलपरीमोचयत्रेव तं प्रार्थयते—सद्योमलदिति । सद्योमलितानि ईषद्विकसितानि यानि सुकुलानि कुट्मलानि तैः करालस्य दन्तुरस्य "करालो दन्तुरे तुङ्गे" इत्यमरः । कुन्दस्य ओषात् कुट्मलात् "ओषोऽस्त्रीकुट्मले खड्गपिधानेऽस्त्रीऽस्त्रियस्त्री" त्यमरः । प्रद्योतत् सदृश् यत् निर्विडो यो मकरन्दः पुष्परसः तद्गन्धस्य बन्धुः सदृशः, हे तादृश पवन ! [illegible] ईषत्प्रकाशे विकासवशात् विविधवर्णे लोचने यस्यास्तां अथवा स्थिरे चलत्व दुःखदत्वादभावेन सकलाकाङ्क्षितत्वेन वा सत्यौ चारुलोचनमेव तु सर्वविद्वदादरणीय मत्कलत्रमेवेति वा सामीप्यं आलिङ्गन् स्त्रियं मम मदङ्गं प्रत्यङ्गं स्पृश । अत्र कुन्दोद्यत्वादीनां अतिशयितत्वाभावात् मकरन्दसम्बन्धवचनात् श्लेषालं, मकरन्दस्तया सौगन्धस्य प्रतिपादितत्वात्, एतन्मूलोऽपि विरोधाभासोऽलङ्कारः यद्यपि सद्योमलदित्यादीनां समासे सति प्रायेण विशेषणानां परनिपातः प्रायः । अत्रापि प्रकृतिविरोधत्वम् । तल्लक्षणमनुरुध्य श्लोकं—दाहि दाल । यत् कामना तां स्पृश मामपि स्पृश । त्वयि मे गाढसम्बन्धे सति दुःखितमामपि ॥

३२ । अभिधत्ते इति, अनवद्यवृत्तः प्रतिबन्धरहितं अभिधत्ते इति यावत् । एष स्मरः कामः सुकुमारकायः कोमलशरीरः माधवे विह्वलतया वैक्लवमापन्नतया (बालविषयकतया-नवर्षः) अयं वैक्लव. स यादृशो विवर्तः परिणामस्तेन वैक्लवविवर्तेन तेन हारुणो भयङ्करः

---

(৩১) যেই কুসুমলতা ঈষদ্বিকসিত সুকুলশোভা সদ্যঃতরুণ বর্ণিয়া প্রতীয়মান হ, তাহার কুট্মলপরিত নিবিড় পুষ্পরসের গন্ধসহচর হে পবন! তুমি কিঞ্চিৎ লনেত্রা পবনচারী সেই বালতীকে আলিঙ্গন করিয়া আমার প্রতি অঙ্গে অঙ্গে র্শ কর।

(৩২) মক। (স্বগত) হায়! বায়ুপিত্তকফ-সন্নিপাত-নিবন্ধন জীবণ ভীষতম

तदत्र भगवती कामन्दकी नः शरणम् (३३)

माध० । [स्वगतम्] आश्चर्यम् !

पश्यामि तामित इतः पुरतश्च पश्चात्
अन्तर्बहिः परित एव विवर्त्तमानाम् ।
उद्बुद्धसुप्तकनकाञ्जनिभं वहन्ती-
मासन्नितिर्यगपवर्त्तितदृष्टि वक्त्रम् ॥ (३४)

वातपित्तश्लेष्मसन्निपातभीषण इत्यर्थः, अत एव कठोरः अतितीव्रः दृष्टिविषस्य इति यावत् । कूटेन कपटेनाक्षजादानच्च पातयतीति कूटपाक्षज, पृषोदरादित्वात् साधुः, मन्त्रस्वरविशेषः । यथोक्तं वैद्यके—"यथाभिहन्यात् कूटेन कश्चिद्यं वनेचरः । तथा पातालको नाम दृष्टि वै कूटपाक्षजः ॥" अन्यच्च—"मन्त्र वातज्वरो दृष्टि तथा वै कूटपाक्षज" इति । कज्जलं अरिष्टाभकज्जलमिव अधिरेव कज्जलेव कज्जलनिभञ्च एवेत्यर्थः । अयं अभिहन्ति अतीव प्रहरति पीडयतीति यावत् । अत्र अरीऽदि वैकृतविवर्त्तदोषः क्षविकारपरिणामभीषणः, कठोरश्चोग्रार्थकः । इत्तेति विषादे—"इत्त इर्षोऽनुकम्पायां वाक्यारम्भविषादयो"रिति कोषः । अत्र इति इत्तेति हेत्वनुप्रासः । कूटपाक्षज. कज्जलमिव स्वरः साधव इत्तीति पूर्वोपमा चाक्षजस्वरयोः संसृष्टिः । मन्त्रभाविषोऽक्षजम् तद्भवत्वं यथा—"मन्त्रसाध्यो च यदि मन्त्रभाविषो"ति ॥

११ । तदत्रेति । अत्र यस्यां माधवस्यावस्थायां, भगवती ज्ञानसम्पन्ना, शरणं रक्षिका, तासते माधवतिरस्कारेणार्थः । द्वितीयाद्यवर्णलोपस्य सकारस्येन कामन्दकी तदनोयान-इत्यत्रापि निर्देशस्यात् सूचनादङ्कावतारोऽयं । तथोक्तं—"यङ्कावस्थाने यत्रैव भाविनोऽङ्कस्य सूचने । वस्तुबीजमुपक्षेपात्. सोऽङ्कावतार इष्यते ॥" दर्पणोक्तलक्षणं यथा—"यङ्कान्ते सूचितः पात्रैस्तदङ्कस्यार्थशक्तयः । यत्राङ्कोऽवतरत्येषोऽङ्कावतार इति स्मृतः ॥"

१२ । उत्पादावस्थामूलकं तन्मन्त्रत्वमाह—पश्यामीति । तद्वं विकसितं सुवर्णं तनीयं यत् कनकाब्जं सुवर्णपद्मं तद्विभं तत्तुल्यञ्च तथा आसन्नया मध्यमुखयैव तिर्य्यगपवर्त्तिता

গরলের যেমন অচিরেই কবিশাবককে পীড়া দেয়, সেইরূপ এই অনিবার্য্য কামদেব সুকোমলকলেবর মাধবকে অচিরকালমধ্যেই পীড়া দিতেছে কেন ?

(৩৩) অতএব মাধবের এই অবস্থাতে ভগবতী কামন্দকীই আমাদের রক্ষয়িত্রী।

(৩৪) মাধ। (স্বগতঃ) কি আশ্চর্য্য ! (অনুরাগবশতঃ (আমাকে দেখিবার

प्रथमोऽङ्कः ।

[प्रकाशं] वयस्य ! मम हि मन्मथति,—

प्रसरति परिमाथी काऽप्ययं देहदाह
स्थिरयति करणानां याऽकलं प्रमोहः ।
रणरणकविहङ्गं बिभ्रदावर्त्तमानम्,
स्खलति हृदयमन्तस्तन्मयत्वञ्च धत्ते ॥ (३५)

पश्चात् स्थितस्य मम दक्षनासयैवक्रीकृता दृष्टिर्यत्र साइसं वक्तुं वदनं वङ्कीं धारयन्ती सा मदनोद्यानमध्यगोऽयता मालतीं दृश. समयपार्श्वे, पुरस. सम्मुखदेशे, पश्चात् पृष्ठदेशे, अन्तरभ्यन्तरे, बहि. बहिरङ्गेषु च किं वा विशेषनिर्देशेन परित सर्वतः एव विवर्त्तमाना स्पन्दती वियमाना अथवा विवर्त्तमाना एकामपि बहुधा प्रतिभासमाना पश्यामि अवलोकयामि । यत्रैव नेत्रे नयामि, तत्रैव तामवलोकयामीति अयं तत्त्वमेव सुखं जातमित्याशयेनेत्यर्थः । "यो येन भावेनाद्दिष्ट सुखदुःखसमन्वित वा । स तदाहितसंस्कार. सर्वं पश्यति तन्मय" इत्यनेन मालतीसमावेशितचित्तस्य माधवस्य तदानीं तन्मयत्वदर्शनं युक्तमेव । अत्रोद्दीपनविभावानुभावसात्त्विकव्यभिचारिसंसर्गनिबन्धनेति समासोक्तिरलङ्कारः । वसन्ततिलकं वृत्तम् ।

३५ । आत्मन्यनुभूतामवस्थां वयस्याय निवेदयति—प्रसरतीति । परिमाथी परिमथनशीलः परिपीडनस्वभाव इति यावत् । कोऽपि अनिर्वचनीयः अविदितनिमित्त इत्यर्थः । अयं अनुभूयमानः दुःखदाहः शरीरस्थः कामज्वर इति यावत्, प्रसरति सर्वतो व्याप्नोति । प्रमोहः, मालत्यलाभात् खलनिवहेभ्यश्च करणानां इन्द्रियाणां "करणं साधकतमं क्रियायामिन्द्रियेष्वपी"त्यमरः । याऽकलं एतादृशस्वरूपशक्तिं स्थिरयति—आच्छादयति । आवर्त्तमानं कालान्तरेण कार्यमाणं "आवर्त्तनं क्रियायां स्या"दिति हैमः । मम हृदयं रणरणकं सन्तापं "रणरणक उद्वेग" इति हैमः । तस्य विविधं उपचयं विभ्रत दधानं सत् अत्यर्थं स्खलति इतस्ततो भ्रमति । तन्मयत्वं निरन्तरचिन्तया मालतीमयत्वञ्च मम समापद्यति । मालतीमयत्वमित्यादृशनिषेकप्रायं सम्प्रति सञ्जीवनौषधं जीवितेव मनसिजदग्धमनोजस्य जीवन-

---

स्वस्थ) পশ্চাদ্দিকে ঈষৎ বক্রীকৃতদৃষ্টি বিকাসিত মনোজ্ঞ সুবর্ণসরোরুবদনা সেই মালতীকে বামপার্শ্বে, দক্ষিণপার্শ্বে, সম্মুখে, পৃষ্ঠদেশে, অভ্যন্তরে ও বাহিরে (অথবা অধিক আর কি বলিব) সর্ব্বত্রই বিশেষরূপে বর্ত্তমান দেখিতেছি ।

(৩৫) (প্রকাশ্যে) বয়স্য ! সম্প্রতি পরিপীড়নস্বভাব অনির্ব্বচনীয় কামজ্বর আমার সর্ব্বত্র ব্যাপ্ত হইতেছে। মোহ ইন্দ্রিয়গণের স্ব স্ব বিষয়গ্রহণশক্তি

इति निष्क्रान्ताः सर्वे । (३६)

इति वकुलवीथी नाम प्रथमोऽङ्कः । (३७)

धारयमेवाश्रयमभूदित्यर्थः । अर्थैकस्य हृदयस्य ज्वलति यस्य इत्यनेककक्रियाकर्तृत्वाद्दीपकालङ्कारः । तल्लक्षणं यथा दर्पणे—"अप्रस्तुतप्रस्तुतयोर्दीपकन्तु निगद्यते । यत्र क्रान्कर्मणां सकृदनेकासु क्रियासु चैक्यम्" इति । प्रसरति विस्तरति ज्वलतीति वीचि परस्यै पदस्याभिधाय यत्न इत्यात्मनेपदस्याभिधानाद्वक्ष्य अग्रप्रकटनलक्षणो दीप इति गुरिराह "ज्वलति हृदयमेवं तत्प्रयत्नं दधानो"त्येव पाठो युक्तः । मालिनीवृत्तम् ।

(क्वचित् पुस्तके "आवर्तनाय"मित्यत्र "आवर्तिनाय"मिति पाठः, तत्रार्थे च स्वरस्य कामः सतः स्वार्थे कः, "नागो स्वरस्य कामे" इत्युणादिसूत्रेण । तस्य विवक्षितं औत्सुक्यजन्यं विस्तृतं आवर्तिं भ्रान्तत्वं ज्वलतीत्यर्थः कार्यः) अत्रावर्तिनेन व्याधिः, ज्वलतीत्यनेनोद्वेगः, तत्प्रयत्नमित्यनेनौत्सुक्यात्, दुःखदुरवस्थानमपि औत्सुक्यस्य च प्रदर्शितम् ।

३६ । इति एवमभिधाय सर्वे रङ्गपरिवर्तिनः पुरुषाः निष्क्रान्ताः निर्गताः रङ्गभूमेरिति शेषः । नन्वत्र प्रवेशेदानीं निर्गमात् कथं बहुवचनमिति वाच्यं, पूर्वं निष्क्रान्तस्यापि सत्त्वस्य विवक्षिततया बहुत्वसाविरुद्धत्वात् । वस्तुतस्तु सर्वं एवाङ्केषु रङ्गभूमेरभिनेतृत्वद्योतनाय "इति निष्क्रान्ताः सर्वे" इति ग्रन्थकर्तुः कविसमयसिद्धतया नायिकैकत्वविवक्षौचित्यं स्वादिविश्लेषश्चेयम् ।

३७ । इति अङ्कपरिसमाप्तौ, वकुलवीथीनाम तस्यार्थस्य प्रसिद्धः प्रथम आद्यः अङ्कः परिच्छेदः, समाप्त इति शेषः । द्वितीयाद्यङ्केष्वप्येव व्याख्येयम् । वीथी श्रेणी वकुलानां वीथी वकुलवीथी, तस्याः । अत्राङ्के वकुलमालावलयनेनैव प्रधानस्य वकुलमालायाः सम्पादनादाद्यस्य वकुलवीथीति नाम परिकल्पितम् । क्वचित् पुस्तके "वकुलवीथीनामे"त्यशो भाति । अङ्कलक्षणन्तु—"प्रत्यक्षनेतृचरितो रसभावसमुज्ज्वल" इत्यादि "अस्तनिष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्त्यते" इत्यस्मं दर्पणषष्ठपरिच्छेदे द्रष्टव्यं ।

इति काव्यतर्कतीर्थोपनामक-श्रीकृष्णविहारि सर्वभिद्वान्तभट्टाचार्यविरचितायां तत्त्वबोधिनीसमाख्यायां मालतीमाधवव्याख्यायां प्रथमाङ्कविवृतिः समाप्ता ।

আচ্ছাদিত করিতেছে। কামাগ্নিদ্বারা বিপচ্যমান আমার হৃদয় অতিশয় উদ্বেগ ধারণ করিয়া সন্তাপ অনুভব করিতেছে ও তন্ময় হইতেছে।

(৩৬) (এইকথা বলিয়া সকলে নিষ্ক্রান্ত হইল)।

(৩৭) বকুলবীথীনামক প্রথম অঙ্ক সমাপ্ত।

दितीयोऽङ्कः । (१)

ततः प्रविशतस्ते द्वौ । (२)

एका । हला । सङ्गीदसालापरिसरे भवलोइदादुदीआ तुमं* किं मन्तअन्ती आसि ? (क)

दितीया । सहि ! तेण किल माहवणिअमवअस्सेण मअरन्देण सअलोअ्ं ब्ब मअणुज्जाणवअन्ती मअवदीए णिवेदिदो (ख)

(क) हला । सङ्गीतशालापरिसरे भवलोकितादितीया त्वं किं मन्त्रयन्ती आसीः ।

(ख) सखि ! तेन किल माधवनिजवयस्येन मकरन्देन सकलमेव जगदीयानवयन्ती भगवत्यै निवेदितः ।

---

१ । अत्रविष्कम्भे नायकप्रवेशाभावेन "प्रथमेऽङ्के चरित" मिति दर्पणवचनस्य "नाटक-प्रकरणयोरङ्का. आर्या. प्रथमनायका" इति भरतवचनस्य चानुक्त्या यदसङ्गतमिति चेन्न "गृह. पुरोहितोऽमात्यो नायको नायिकापि च । सार्थवाह इति ख्याता वर्ते ते नायका पुनः" रित्यनेन नायिकाया अपि प्रारिप्सावस्तुसाधकत्वस्य सालतीप्रवेशसद्भावेन नायकत्व-सम्भवस्य सम्भवात ।

२ । इदानीमङ्कान्तरमारभमाणः कविरनन्तरङ्कवर्तिनश्चतुरान् आविदूषकान् सर्वेषेव सभ्यान् बोधयितुं प्रवेशकमारचयति—तत इत्यादिना । चेट्यौ दासौ ।

(क) एकेति, सखीरेका चेटीत्यर्थः । हलेति सख्यास्सम्बोधनार्थमनव्ययं । हले इदं हलाशब्दस्य सौत्र चेटीं सखीं वदतीति भाव्यीत्यावत्यः । सङ्गीतशालायाः सङ्गीतसालाया नाट्यगृहस्य परिसरे पर्यन्तभूमौ भवलोकितादितीया भवलोकितान्तरङ्गितीयार्थः । मन्त्रयन्ती भावयन्ती ।

ख । दितीयेति, चेटीत्यर्थः । मदनोद्यानवनानां परस्परसङ्गमेनसकलमानार्थकाहिकः ।

द्वितीय अङ्क ।

दासीद्वयের প্রবেশ ।

(ক) একা । হলা ! সঙ্গীতশালার প্রাঙ্গণভাগে কেবল অবলোকিতার সহিত কি মন্ত্রণা করিতেছিলে ?

(খ) দ্বিতীয়া । সখী, মাধবের প্রিয় বয়স্য সেই মকরন্দ মদনোদ্যানবৃত্তান্ত

---

* "भवदी कामन्दुं" इति पाठभेदः, तदानीं भवदी कामन्दकी किं मन्त्रयन्ती आसीदि-त्यनुवादः करणीयः ।

प्रथमा। तदो किं ? (ग)

द्विती। तदो भट्टिदारिअं दट्ठुकामाए भअवदीए अवलोइदा अणुप्पेसिदा। मएवि ताए कधिदं, जधा लवङ्गिआदुदीआ विवित्ते भट्टिदारिआ वट्टदिसि (घ)।

प्रथ। हला! लवङ्गिआ खु केसरकुसुमाइं अवचिणीमित्ति, मअणुज्जाणादो जेव्व आगदा ता किं सम्पदं सम्पत्ता ? (ङ)

(ग) ततः किम् ?

(घ) ततो भर्तृदारिकां द्रष्टुकामया भगवत्या प्रहसितनिमित्तं अवलोकिता अनुप्रेषिता, मयापि तथ्यं कथितं, यथा लवङ्गिकादितीया विविक्ते भर्तृदारिका वर्तते।

(ङ) हला। लवङ्गिका खलु केसरकुसुमान्यवचिनोमीति, मदनोद्यानादेव आगता, सत् किं सम्प्रतं सम्प्राप्ता।

भगवत्यै कामन्दक्यै निवेदितः प्रतीकारार्थं कथितः। हसनावलोकितानुमानात् हसनमिति शेषः।

(ग) अनन्तरार्थे ऐकोत्तर्यस्य प्रयोगे द्वितीयादि प्रत्येतुं शक्येतेति एकोत्तरपदादीत्यं—प्रथमेति।

(घ) द्वितीयेति। भर्तृदारिकां मालतीं। प्रहसितवार्तां तन्निमित्तं "मालती कुल किङ्करी वर्तते" इत्येतत्परिज्ञानार्थमित्यर्थः। तया अवलोकितायै। विविक्ते विजने "विविक्तो पूतविजना" विश्वप्रकाशः।

(ङ) केसरकुसुमानि बकुलपुष्पाणि, अवचिनोमि चोटयामि, इति हेतौ, आगता आजगामेति शेषः। सम्प्राप्ता आगता।

সবই ভগবতী কামন্দকীর নিকট নিবেদন করিয়াছে (তাহা অবলোকিতার মুখে শুনিতেছেনই)।

(গ) প্রথমা তারপরে ? (ভগবতী কি করিয়াছেন ?)

(ঘ) দ্বিতী। পরে ভর্তৃদারিকার দর্শনের নিমিত্ত সংবাদ জানিবার জন্য ভগবতী অবলোকিতাকে পাঠাইয়াছেন, আমিও তাহাকে বলিয়াছি "কেবল লবঙ্গিকাকে লইয়া ভর্তৃদারিকা (মালতী) নির্জ্জন স্থানে আছেন।"

(ঙ) প্রথ। হলা! লবঙ্গিকাত বকুলফুল চয়ন করিবে বলিয়া মদনোদ্যান হইতে আসিয়াছিল না, তবে কি সে সম্প্রতি আসিয়াছে ?

दिट्ठो । अधदं, तं क्खु, परावट्टन्तीं जेव्व *हत्थे गेण्हिअ, पडिणिअत्तपरिअणा, भट्टिदारिआ उवरिविलिन्दअं समारुढा । (घ)

प्रथ । पुणं तस्स महाणुभावस्स बहुधाए पत्तार्थं विणोदेदि (ङ) ।

दिट्ठो । [निःश्वस्य] कुदो से आसासो ! एदिआ अत्त अविकेसदंसणेण अदिभूमिं खु साए अहिणिवेसो गमिस्सदि । अत्तहु* णन्दणस्स कारणादो महाराओ भट्टिदारिअं पत्थयन्तो अम्हेव्व विसण्णो (च) ।

(घ) अथ किं, सा खलु परावर्त्यमानामेव हस्ते गृहीत्वा, प्रतिनिवृत्तपरिजना, भर्तृदारिका उपरिवितर्दिं समारूढा ।

(ङ) अथ तस्य महानुभावस्य बहुधया आशां विनोदयति ।

(च) दुष्करकः आयासः । इयन्मात्रेण अविशेषदर्शनेनात्मभूमिं खलु सखी प्रतिनिवेशं गमिष्यति । अतएव, नन्दनस्य कारणाद्धि महाराजो भर्तृदारिकां प्रार्थयमानोऽस्माकमेव विषण्णः ।

(घ) अथ ।इतिशब्द आद्यर्थे, परावर्त्यमानामेव मदनोद्यानाद्वाऽन्यत्रैव हस्तेगृहीत्व विस्रब्धमवस्थिते । प्रतिनिवृत्त निवर्त्तित, परिजन परिचारिकाजनः यया सा । उपरिवितर्दिं उपरिवर्त्तिनि वेदिकाप्रकोष्ठे "प्रकोष्ठ प्रकक्ष्या स्त्रियां वेदिकोपरिवेदिके" इत्यमरः ।

(ङ) अथ निश्चिते "अथ निश्चितकर्त्तव्ये" इति विश्वः । तस्य महानुभावस्य आर्यपुत्रस्य, बहुधया बहुप्रकारकेण, अवस्थाकामनालक्षणेन नानारूपेण वहु प्रकारीकरणं च आशायाः सकल्पस्येत्यर्थः ।

(च) किमत्रेति नानाविधमनोरथावलम्बनमूलस्य सन्देहस्य हेतुं दर्शयति प्रियाया प्रार्थनासाधिकस्य एवार निश्चायकत्वेन यथा भावना, आशाया अपि. कुतः बालोल्लापे । अतएव हेतुमाह । एतेनेत्यादिना ।

(घ) दिट्ठो । আসিয়াছে বৈকি ? আসিবামাত্রই তাহার হস্ত ধারণ করিয়া অন্য পরিজনবর্গকে নিষেধ করতঃ ভর্তৃদারিকা উপরিস্থিত বহির্বিতপ্রকোষ্ঠে (যাইবেনাই) আরোহণ করিয়াছেন ।

(ঙ) প্রথম । নিশ্চয় সেই মহানুভব রাজপুত্র কথোপকথনদ্বারাই আত্মবিনোদন করিতেছেন ।

(চ) দিট্ঠো । (নিশ্বাস ত্যাগ করিয়া) ভর্তৃদারিকার আর শান্তি কোথায় ?

---

* "कले एव्वे" इत्यपि. पाठः क्वचित् दृश्यते । कथं अतरेवेति सदृशं ।

प्रथ। किंत्ति ? (झ)।

दिती। पहवदि णिअस्स कण्णआजणस्स महाराओत्ति। ता जाद आमरणं खु दिअअसल्लं मालदीए माहवाणुराओत्ति तक्केमि (ञ)

प्रथ। अवि णाम, भअवदी किंपि एत्थ भअवदीत्तणं दंसइस्सदि (ट)

(झ) किमिति ?

(ञ) "प्रभवति निजस्य कन्यकाजनस्य महाराज" इति। तत्तावन्मात्रमरणं खलु हृदय शल्यं मालत्या माधवानुराग इति तर्कयामि।

(ट) अपि नाम भगवती किमप्यत्र भगवतीत्व दर्शयिष्यति।

सविशेषदर्शनेन मदनोद्याने विशेषतः परस्परसाक्षात्कारेण, अस्या अभिनिवेशः माधवे अनुराग अतिभूमि आधिक्यं प्राप्तवर्धमिति यावत्, अभिधत्ते प्राप्नोति।

झ। किमिति विज्ञप्त इति शेषः।

ञ। प्रभवतीत्यादि। महाराज इदमभिप्रायेण महाराजो विज्ञापित इत्यर्थः। तत्र तत्तावत् सन्दनाय मालतीदानव्याजोद्भूतत्वेन तदवष्टम्भाभावात् मालत्या माधवानुरागः आमरणं मरणपर्यन्तं हृदयशल्यं हृदयविदारकशरावबुध्या ज्ञातमित्यर्थः। (विधेयप्राधान्यविवक्षया अस्यविधेयत्वेन ज्ञातमिति क्रीवनिर्देशः।

ट। अपिनामेति उत्प्रासनायां। भगवती कामन्दकी, अत्र मालतीमाधवनिवारणविषये, किमपि अनिर्वचनीयं भगवतीत्वं माहात्म्यं (भगवतीशब्दस्य संन्यासविशेषवचनात् "संन्यासी तु भवेद्यतिर्भे"दि मनुवचनात्)। मालतीमाधवतत्कथायाः कामन्दक्या माहात्म्ये तैरोभावाद्यत्र राजमन्दनयोश्च मतिः परिवर्तते इत्याशयः।

(एदिके) अन्तकाय एই मदनोद्यानের বিশেষ সাক্ষাৎকারে (তর্ষাধিক্যে) মাধবানুরাগ অতিশয় বৃদ্ধি পাইবে। অন্য দিকে মহারাজ নন্দনের জন্য ভর্তৃদারিকাকে প্রার্থনা করিবেন, অমাত্য মহারাজকে জানাইয়াছেন ?

(ঝ) প্রথ। কি জানাইয়াছেন ?

(ঞ. দ্বিতী)। "মহারাজই নিজ-কন্যকাজনের প্রভু" ইহা (জানাইয়াছেন) সুতরাং মালতীর এই মাধবানুরাগ মরণকালপর্যন্ত হৃদয়শল্যস্বরূপ হইল বলিয়া মনে হয়।

(ট) প্রথ। মহত্ত্ব কবি, মালতীর এই অপাকৃতিনিবারণ বিষয়ে ভগবতী কামন্দকী কোন অনির্বচনীয় মাহাত্ম্য দেখাইবেন।

द्वितीयोऽङ्कः ।

द्वितीयः । अद्य अवलम्बनमलीकम् ! एहि, गच्छाव । (ठ)

(इति परिक्रम्य निष्क्रान्तौ) (७)

प्रवेशकः । (ड)

[ततः प्रविशत्युपविष्टा सोत्कण्ठा मालती लवङ्गिका च] (५)

(ठ) यदि अवलम्बनमलीकम् । एहि गच्छाव ।

ठ । अवलम्बनमलीकम् । अपुरुषालम्बनम् । यस्मादियम् कामन्दकी कामन्दकानि विद्यारूपाणि मन्त्रोपनिषदेवलोकसंबन्धादिभावान् । एहि गच्छाव इति प्रकृतकार्योपक्रमपरामर्शः इव ।

७ । निष्क्रान्तौ इति कैतवादिति शेषः ।

ड । प्रवेशकः इति प्रवेशकः प्रकाशकार्थोपक्षेपकविशेषः । तल्लक्षणं यथा दर्पणे—

"प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः ।
अङ्कद्वयान्तर्निष्पाद्यः शेषं विष्कम्भके यथा ॥

"शेषं विष्कम्भके यथा" इत्यनेन विष्कम्भकलक्षणातिदेशात् तत्रार्थोपक्षेपकयोरपि निदर्शनलक्षणयोरतिदेशार्थं, तथाचात्र प्रवेशकेन इयता ग्रन्थसंदर्भेण मकरन्देन सार्धमवलम्बनादिविटजनसंदर्शनोपायानुपक्षिप्तः । अनयार्थप्रकृत्या सता सह मालत्या विवाहे प्रकरणस्य मालतीमाधवाख्यस्य प्रकरणस्य कामन्दक्या हि विवाहः फलमीप्सितायाः, यतो मकरन्दादेर्वैरिणोऽपनयने च मालतीमाधवाख्यिकायाः प्रवेशस्य मालतीमाधवसंदर्शनोपायः कामन्दक्या आत्मनादेव निदर्शनमित्युपक्षेपत्वम् ।

५ । तत इति । अत्र सोत्कण्ठेति मालत्या एव विशेषणम्, लवङ्गिकाया उत्कण्ठाकारणविरहात् । उपविष्टेति च उभयोरेव विशेषणम् । उपविष्टाया अयं प्रवेशप्रारम्भपर्यन्तोपपत्तिमूलकलक्षणया दर्शकदर्शनविषयत्वलक्षणया विषयालोकनं, ततश्च प्रविशति दर्शकदर्शनविषयीभवतीत्यर्थः, घटादिवदेवेति शेषः ।

(ठ) विदूषकः । सखि ! তোমার এই অবলম্বন অযুক্ত । এস আমরা প্রকৃতানুষ্ঠানে যাই ।

(৩) (দ্বারীকে পরিক্রমণ করিয়া নিষ্ক্রান্ত হইল) ।

(৪) (উপবিষ্টা ও সোৎকণ্ঠা মালতী এবং লবঙ্গিকার প্রবেশ)

मालती। हुं सहि! तदो, तदो (ङ)

लवङ्गिका। तदो तेन महाणुभाएण उवणीदा मे इअं उलमाला (ढ)। [इति मालामर्पयति]।

माल। [गृहीत्वा, सहर्षं निर्वर्ण्य।] सहि! एक्क-पास-ासम-पडिबद्धा खु इअं विरअणा (ण)

(ङ) हुं सखि! ततस्ततः।

(ढ) ततस्तेन महानुभावेनोपनीता मे एषा बकुलमाला।

(ण) सखि! एकपार्श्वविषमप्रतिबद्धा खल्वियं विरचना।

ङ। मालतीति। हुं प्रश्ने। लवङ्गिकया कथितं बकुलमालाप्रार्थनायां इलालमाकर्ण्य प्रसन्नार्थावबोधोत्कण्ठिता त्वरमाणा पृच्छति—"ततस्तत इति"। मौग्ध्या आदरार्थं। ढ। यद्भूतं तत् सत्वरं कथयेत्यर्थः। मोहायितभावोऽयं यदाह—"सुखा कथा प्रियजनस्य मुखेऽपि सर्वोदरस्थितचलत्तनुमध्यभीरुम्। मनसाऽभङ्गमिह मुग्धितमङ्गनानां मोहायितं हितं कविभिः पुराणैः॥"

ढ। लवङ्गिकेति। तेन माधवेन, मे मम हस्ते इति शेषः। उपनीता तुभ्यमुपकल्पितेत्यर्थः।

ण। सखीति। (निर्वर्ण्य सादरं विलोक्य) एकपार्श्वे एकस्मिन् ये विषम विपरीतं ासतया प्रतिबद्धा घटिता, विपरीतसूत्रैः कुसुमैरस्मा एकाग्रो विरचित इत्यर्थः।

(ङ) मालती। সখি! তাহপর তাহপর?

(ঢ) লবঙ্গিকা। তৎপরে সেই মহানুভব আমার হস্তে এই বকুলমালা উপহার দিয়াছেন। (মালা অর্পণ)

(ণ) মাল। (গ্রহণানন্তর হর্ষের সহিত দেখিয়া) সখি! এই মালার বিরচনা একাংশে বিপরীত ভাবে সংঘটিত হইয়াছে।

लव । एत्थ दाव अवसणीअत्तणं तुमं च्चेव अवरज्झसि (त)

माल । कधं विअ ? (थ)

लव । जेण सो मुहो दुव्वा-सामलट्ठो तधा विकत्थीकिदो । (द)

माल । पिअसहि लवङ्गिए ! सव्वधा आसासणसीलासि ।(ध)

(त) अत्र सावदरमणीयत्वे त्वमेवापराध्यसि ।

(थ) कथमिव ?

(द) येन स मुग्धदूर्वाश्यामलाङ्गलता विकत्थीकृत ।

(ध) प्रियसखि लवङ्गिके ! सर्वथा आश्वासनशीलासि ।

त । लवेति । तत्रिमित्तमेव विक्रमरचनेयम् ।

थ । अभिप्रायपरिज्ञानोत्कण्ठिता पृच्छति—कथमिवेति । केन प्रकारेणाहमेतावतीमाश्चर्यरचनावैदग्ध्ये समापराधः सम्भवतीति प्रश्नार्थः ।

द । लवेति । येन हेतुना मुग्धः लङ्घनेनाधीरः, दूर्वाश्यामलाङ्गः दूर्वादलवत् श्यामलकलेवरः, तथा परञ्च विशेषविक्रमया कर्णधारयत्नेन । स साधुः तथा साङ्गम् विकत्थीकृतः कटाक्षनिक्षेपादिना व्याकुलीकृतः, अथवा विकत्थीकृत वर्णक्रियायां विकत्थनम् कृत इत्यर्थः । स्वदोषाज्ञानान्यदोषसम्भावनसन्दर्शनेन विकत्थीकृतत्वेन तस्य साध्वरचनाधायित्वेन वैदग्ध्यं ज्ञातमिति त्वमेव तत्र निमित्तमिति भावः ।

ध । मालेति । आश्वासनं धीरं स्वभावो यस्या सा । सामान्यमिदमेव त्वमेवं कथयसि, न तु वस्तुतस्त्वं साधौ सन्यायुरक्त इत्याशयः ।

(त) लव । এই অবমানীয়তায় তুমিই অপরাধিনী ।

(থ) মাল । কিরূপে ?

(দ) লব । যেহেতু মুগ্ধ সেই দূর্বাশ্যামল কলেবরকে (অসামান্য বীর রূপলাবণ্য দেখাইয়া) ব্যাকুলিত করিয়াছ ।

(ধ) মাল । প্রিয়সখি লবঙ্গিকে ! সর্বপ্রকারে আমাকে আশ্বাস দেওয়া তোমার স্বভাব ।

लव। सहि! का एत्थ आसामणसोलदा? णं भणामि, सोवि पियसहीए मन्द-मारुदउव्वेल्लन्तपफुल्ल पुण्डरीअविब्भमेहिं पढमावद्ध-वउलावली-विरअणावदेस-संजमिद-वलामोडि-विब्भ-मेहिं लोअणेहिं, विजिम्भमाण-विब्भम-त्थिमिद-दीह-पेरन्त-परि-भमणा-विलास-तरुणिद-भ्रूलदा-विड्डिदाणङ्ग-सारङ्ग-विब्भम-विअड्ढं अवलोअअन्तो पच्चक्खोकि-दीसदे व्व (क)

(क) सखि! का अत्र आश्वासनशीलता? वत्स भणामि, सोऽपि प्रियसख्या मन्दमारुतो-द्वेल्लत्प्रफुल्लपुण्डरीकविभ्रमाभ्यां प्रथमावद्धबकुलावलीविरचनाव्यपदेशसंयमितवलनाकारविस्तृताभ्यां लोचनाभ्यां विजृम्भमाणविभ्रमस्तिमितदीर्घपर्यन्तपरिवर्तनाविश्वासताण्डितभ्रूलताविडम्बितानङ्ग-सारङ्गविभ्रमविदग्धम् अवलोकयन् प्रत्यक्षोक्त इव।

म। सखीति। अत्र तदनुरागविषये, का आश्वासनशीलता आश्वासनस्वभावः? नास्तीति शेषः। सदृशं सदृक्षं सत्यमेव, न केवलं तदाश्वासनपरमिति भावः। एतदेव समर्थयति—मन्दमारुतेति। मन्दमारुतेन शीतसुखस्पर्शनेन ईषत्सुप्यमानं प्रफुल्लं विकसितं यत् पुण्डरीकं पद्मं तस्य विभ्रम, सौन्दर्यमिश्राकारविशिष्टा याभ्यां, अथवा तस्य विभ्रमः साहश्यं ययोस्ताभ्यां साधवस्य पुण्डरीकलोचनत्वादित्यर्थः। तथा प्रथमावद्धा प्रथमरचितुमारब्धा या बकुलावली बकुलमाला तस्या विरचनाव्यपदेशेन पुष्पार्थमाकृष्यादाय व संयमिताभ्यां संभृतः कथाद्यर्थं यं प्रापिताभ्यां तथापि बलात्कारेण तदर्थमनङ्गावलीन विस्तृताभ्यां विस्तृतिं गमिताभ्यां लोचनाभ्यां विजृम्भमाणेन वर्धमानेन विभ्रमेण तदर्थजनितहर्षेण स्तिमितौ निश्चलौ दीर्घौ आयतौ यौ पर्यन्तौ कथाक्षदेशौ तयोः परिवर्तनावलोकन-व्यापारेण पुनः सञ्जातया, सैव विलासः विभ्रमः तेन ताण्डविताभ्यां नर्तिताभ्यां भ्रूलताभ्यां, विडम्बितस्य अनुकृतस्य अनङ्गसारङ्गस्य मदनहरिणस्य "सारङ्गं हरिणे कुले" मिति शाश्वतः। विभ्रम ■■ विभ्रमो विलासेन विदग्धं निपुणं यथा स्यात्तथा अवलोकयन् लोकेन प्रत्यक्षम् इव साधवः

(क) लव। তাহার অনুরাগবিষয়ে আদি যে কেবল আশ্বাস দিতেছি, ইহা কিরূপে স্থির করিলে? আদি নিশ্চয় বলিতেছি, প্রিয়সখীও ■ দেখিয়াছে যে, মন্দবায়ুস্পর্শসুখে প্রফুল্ল পুণ্ডরীকসদৃশ প্রথমাবদ্ধ বকুলমালার পুনঃ নির্মাণ-

মাল। [লবঙ্গিকাং পরিষ্বজ্য]। অহো প্রিয়সখি! কিং নস্য দাব মহাসুভাবস্য সাহাবিআ এব্ব মুহুত্তসণিধারণী অণস্স বিপ্পলম্ভহেতুআ বিআরা, আহু জহা পিঅসহী সংভাবেদি? (৫)

---

(৫) অহো প্রিয়সখি। কিং নস্য তাবন্মহানুভাবস্য স্বাভাবিকা এব মুহূর্তসন্নিধারিণী মনসো বিপ্রলম্ভহেতুকা বিকারাঃ, আহোস্বিদ্ যথা প্রিয়সখী সম্ভাবয়তি?

অধিরিঞ্চয়ন্ত্রিয়মাণা লবঙ্গাখ্যৌ তয়োর্ভেদে। তয়োরেব [লবঙ্গাখ্যয়োরেব] ভেদে। [লবঙ্গাখ্যৌ] ইতি ইতিশব্দেন তদনুবাদঃ কৃতঃ। [তয়োরেব লবঙ্গাখ্যয়োরিত্যনেনৈব স্ত্রীত্বস্যাপি সিদ্ধত্বাৎ] লবঙ্গাখ্যয়োরিত্যুক্তে [তয়োরেব লবঙ্গাখ্যয়োরিত্যনেনৈব স্ত্রীত্বস্যাপি সিদ্ধত্বাৎ] লবঙ্গাখ্যয়োরিত্যুক্তে স্ত্রীত্বং নাবগম্যতীতি বিশিষ্টলৌকিকপ্রতিপাদনার্থং তদুক্তম্। দৃষ্টস্বপ্নদর্শনীত্যস্য [দৃষ্টস্বপ্নদর্শনীত্যনেন] দৃষ্টস্বপ্নদর্শিনীত্যর্থস্য [দৃষ্টস্বপ্নদর্শিনীত্যর্থস্য] ন [নাটিতার্থানুসারিণীতি] নাটিতার্থানুসারিণীত্যনেনাপি [নাটিতার্থানুসারিণীত্যনেনাপি] তদর্থস্যাভিধানাৎ স্বাভাবিকী [স্বাভাবিকী] এব [স্বপ্নদর্শনক্রিয়া] স্বপ্নদর্শনম্।

(৬) সাধেতি। পরিষ্বজ্য লবঙ্গীমুপগূহ্য [পরিষ্বজ্য লবঙ্গীমুপগূহ্য] অহো [অহো] ইতি হর্ষে বিস্ময়ে বা, 'আমে'তি স্থলে পাঠান্তরম্ [আমে] ইতি। মুহূর্তসন্নিধারিণী [মুহূর্তসন্নিধারিণী] ন [নাটিতার্থানুসারিণী]। বিপ্রলম্ভহেতুকা [বিপ্রলম্ভহেতুকা] নাটকস্য [নাটকস্য] [নাটিতার্থানুসারিণীত্যনেনাপি] তদর্থস্যাভিধানাৎ স্বাভাবিকী [স্বাভাবিকী] এব [স্বপ্নদর্শনক্রিয়া] স্বপ্নদর্শনম্। বিপ্রলম্ভী লবঙ্গিকা [লবঙ্গী]। যথা [যথাবগম্যতে] [তথানুরাগাদেব তথা নাটক-নির্দেশাদিনা] ন্যূনমিতি সর্বত্র। তথা নাটকনির্দেশাদৌ স্বাভাবিকমনন্যপরাধীনমুপলম্ভনং, আগ, মনুস্মিন্ বিষয়ে তাবদ্ ইতি তদর্থঃ।

আজে সংঘটিত হইলেও তোমার দর্শনতৃষ্ণাবশে বিকৃত নেত্রযুগলদ্বারা সে বর্তমান বিষয় বলতঃ নিশ্চল আহত অপাঙ্গযুগলের পুনঃ সঞ্চালনরূপ বিভ্রমযুক্ত ঔপচারিক অনুকরণশীল কামদেবের ন্যায় বিলাসদ্বারা নিপুণভাবে তোমাকেই দেখিতেছে।

(৭) মাল। (লবঙ্গিকাকে আলিঙ্গন করিয়া) অহো প্রিয়সখি! মুহূর্তমাত্র সন্নিহিত মাদৃশ জনের বহুমান কারণীভূত অক্ষিপাতাদি বিকার কি সেই মহানুভবের স্বাভাবিক, অথবা প্রিয়সখী যেরূপ সম্ভাবনা করিতেছে? (অর্থাৎ আমার প্রতি অনুরাগ বশতঃই সে সেইরূপ কটাক্ষ-নিক্ষেপাদি করিয়াছে?)

लव। (विहस्य सास्यमिव)। तुमम्मि सहावेण क्केव्व तम्मिं अवसरे असङ्गोदअं णच्चिदासि (फ)

माल। [सलज्जं]। हुं, तदो, तदो (ब)

लव। तदो पडिणिअत्तमाण-अत्ताजण-सङ्कुलेन अन्तरिदे तम्मिं जणे, मन्दारिआए घरं उपगदम्मि, ताए खु चित्तफलअं पभादे हत्थोकिदं आसि (भ)

(फ) त्वमपि स्वभावेनैव तस्मिन्नवसरेऽसङ्गीतज्ञ नर्तितासि।

(ब) हुं ततस्ततः।

अत्र श्लोकेऽनुप्रासालङ्कारः, एवं "प्रवृत्ति" "मालती" प्रभृतिभिरिवशब्दैः सदृशीकरणक्रियायाः कर्तृकारकाक्षिप्तत्वात् उपमालङ्कारः। तयोश्च क्रियासमुच्चयः सहभावः, अतिशयोक्तिमात्रेण समुच्चयस्य च तत्सम्बन्धसंसर्गाभ्यां तदवयवत्रिभवसूत्रेषेण। हरिणीवृत्तम्।

(१६) निपातिता कथमेषिता।

(१७) साधितः। अवतीर्य कामन्दकी। प्रवृत्तैव चारब्धुमारब्धैव मालतीति शेषः।

(१८) स्वकीयप्रयत्नस्य विधुरत्वात् सफलां कामन्दकी विधिविधातार प्रार्थयते—विधातेति। विधाता विधिः मनोज्ञाय परस्परानिलषणीयत्वात्मनोहराय विधये मालतीमाधवयोरुद्वाहविधानाय नः; अस्माकं भद्रं विघ्नापसारणपूर्वकं सद्भद्रं वितरतु अर्पयतु। ईदृशः परिणतिं अस्य विवाहस्य परिणामं परस्परानिलषणीयत्वसम्पादनादिना सुमनोहरां विधेयासुः, विदधातु। ततः विनिपातकल्पनायामाह—इतीति। विधुरहृदयत्वं परस्परानि-

---

ও বর্দ্ধমান বিবাহ মহোৎসব শ্রীধারণ করিতেছে এবং শশীরেখার পাণ্ডুবর্ণতাও কৃশতা দ্বারা কামনীয়তা ব্যক্ত করিতেছে।

(১৬) হস্তিনীকে বলাইল কেন ?

(১৭) সাধু। (আনন্দের সহিত) কেন অবতীর্ণ হইয়া তখনই কামন্দকীও নবমালিকার সহিত (মালতী) এদিকেই আসিতেছে ?

(তদনন্তর কামন্দকী মালতী ও নবমালিকার প্রবেশ)

(১৮) কাম। (হর্ষের সহিত অন্যের অশ্রুতভাবে) পরস্পরের অতিসদৃশ নিবন্ধন অতিমনোরম মালতী ও মাধবের বিবাহবিধানে বিধাতা আমাদিগের

कृतार्थीभूयासं प्रियसुहृदपत्योपयमने,
प्रयत्नः कृत्स्नोऽयं फलतु, शिवदायी च भवतु ॥ (१८)

माल। [स्वगतम्] केण उण उवाएण सम्पदं मरणणिव्वाणस्स अन्तरं सम्भावइस्सं ? मरणम्मि मन्दभाअहेआणं अहिमदंत्ति सुदुल्लहं होदि (ङ)।

लव। [स्वगतम्।] अतिकिलाम्मिदा खलु पिअसही एदिणा अणुजलङ्गियजणेण (च)।

(ङ) केन पुनः उपायेन साम्प्रतं मरणनिर्वाणस्यान्तरं सम्भावयिष्ये ? मरणमपि मन्दभागधेयानामभिमतमिति सुदुर्लभं भवति।

(च) अतिक्लान्तिता खलु प्रियसखी एतेन अनुज्ज्वलक्रियजनेन।

भावनमूरिवसुदेवरातसजानयी. मालतीमाधवयोः उपयमने उद्वाहविषये कृतार्थीभूयासम् निर्विघ्नसम्पादनादिना कृतकृत्या भूयासम्। तथा अयं मामकः कृत्स्नः सकलः प्रयत्नः चेष्टा फलतु निष्फलीभावरूपोद्देश्यसम्पादनेन सफली भवतु, शिवदायी आविनि मङ्गलविधायकश्च भवतु। (शिवतातिरिति पाठे तु शिवकर इत्यर्थः "शेषकरीरिष्टवातिः शिवतातिः शिवङ्कर" इत्यमरः "शिवमङ्गात् शिवतरिच्छ कर्त्रे इति तातिप्रत्ययः")। शिवतरिणी इतम्॥

(च) अनेन खलु विवाहं स्थिरीकर्त्तुमेव सम्प्रत्यार्यं देवतागृहे मात्रा प्रेषिता मालती अपरिज्ञातकामन्दकीकौशला सद्यःसन्निपातात् पूर्वमेव मरणमुचितं मन्यमाना वितर्कयति— केनेति। मरणनिर्वाणस्य जीवनविनाशरूपपरमनिर्वृतेः, अन्तरं अवसरं सम्भावयिष्ये प्राप्स्यामि (कार्यार्थकक्रीयादिकभूधातोरिदं रूपम्) मन्दभागधेयानां दुरदृष्टजनानां, सम्भाव मन्दभाग्यजनानां यदयदभिमतं तत्तदेव दुर्लभमिति दुर्भाग्यादा अनादि मरणस्य सम्प्रत्यभिमततेन दुर्लभमस्तिति भावः।

विघ्नविनाशरूप मङ्गलविधान करूँ। देवगण इस विवाहके परिणाम (परस्पर प्रीतिसम्पादनादि द्वारा) सदय रमणीय करूँ। प्रिय सुहृद् भूरिवसुके और देवरातके सन्तान मालती और माधवके विवाहविषयमें आमि कृतकार्य हूँ, एवं आमार [illegible]

(छ) माल। (स्वगत) आमि कोन् उपाये सम्प्रति मृत्युरूप परम सुखेर अवसर प्राप्त हइब ? मन्दभाग्य लोकदिगेर अभिमत मरणओ दुर्लभ हय।

[प्रविश्य पेटकहस्ता प्रतीहारी ।] अमचो अमवदीं विण्णवेदि एदिणा णलिन्दाणुप्पेसिदेण विवाहवेवच्छेण देवदापुरदो अलङ्करिदव्वा मालदित्ति (क)।

काम । युक्तमाह अमात्यः, आह्निकमेतत् स्थानम्, अतो दर्शय । (१८)

प्रती । इदे दाव धवलपट्टं सुअवोलअं, इदं च उत्तरीअं रत्तवत्थाजुअं इमे अ मङ्गलिआ आहरण-सञ्जोआ, अअं च मोलिअङ्गारो. एदं चन्दणं कुसुमाणीडो अ (ख)।

(क) अमात्यो अमवतीं विज्ञापयति, एतेन नरेन्द्रापुरेणितेन विवाहवेषेण च देवतापुरतोऽलङ्कर्तव्या मालती इति ।

(ख) इदं मालतकपट्टाम्बरकौशेयम्, इदमौत्तरीयं रक्तवस्त्रयुगम्, इमे च मङ्गलिका आभरणसञ्जोगाः, अयं च मौलिकङ्गारः, एतत् चन्दनं कुसुमाधीरं च ।

(क) एतेन चतुर्मुखप्रासेन चतुर्मुखविग्रहेण च अधिकरणस्य मालत्याश्च विशेषेण अलिसिद्धे मालिता ।

(ख) पेटकहस्ता मालत्याभरणपात्रहस्ता, (मुक्तापटलकङ्कतेति यत्तेऽपि पाठभेदाः) प्रतिहारी प्रविश्य आहेति शेषः । विवाहवेषेण विवाहोपयुक्तवस्त्रालङ्कारादिना ।

(१८) युक्तमाह—देवतापुरत इत्यादि वक्तुमिदं जगदति, अत्र हेतुमाह—आह्निकमिति, सन्ध्याद्य आह्निकस्थानं अत्र आह्निकानुष्ठानं युक्तमिति भावः । "युक्तमाह्निकमेतत्स्थानम्" इति पाठे तु युक्तं आह्निकं यस्मिन्निति विग्रहः । दर्शयेति नरेन्द्रापुरेणितं वस्त्रालङ्कारादिकमिति शेषः ।

(क) गत । (प्रकाश) अमिवृद्ध मालतीके এই विवाहে मालती अन्यान्य वेशभूषा करिवेन।

(ख) (प्रतिहारी पेटिकाहस्ते प्रवेश करिया बलिल) अमात्य आपनाके जानाইতেছেন, নরেন্দ্রনন্দন কর্তৃক প্রেরিত এই সকল বিবাহোপযুক্ত বস্ত্রালঙ্কারাদি দ্বারা দেবতার সম্মুখেই মালতীকে অলঙ্কৃত করিতে হইবে।

(১৮) কাম । অমাত্য যাহাই বলিয়াছেন, এই স্থানেই মাঙ্গলিক অনুষ্ঠানের উপযুক্ত। অতএব সেই বস্ত্রালঙ্কারাদি আমাকে দেখাও ।

काम। [अपवार्य।] रमणीयं हि वत्सकरन्डम् अवलोकयिष्यति जनः। [प्रकाशं गृहीत्वा।] भवतु ओम् इति उच्यताममात्यः। (२०)

प्रतिहारी। तहा। इति निष्क्रान्ता। (झ)

काम। वत्से लवङ्गिके! प्रविश त्वम् अभ्यन्तरं वत्सया मालत्या सह। (२१)

लव। अध भअवदी उण कहिम्? (ञ)

(झ) तथा।

(ञ) अथ भगवती पुनः क्व?

(ज) प्रतीति। चौलकं स्त्रीणां स्तनादिपिधायकं "कञ्चुकी"ति प्रसिद्धम्, क्षौमं दुकूलमिति पाठः। सर्व्वाङ्गिकाः सर्व्वावयवयोग्याः आभरणानां संयोगो यैस्ते आभरणसंयोगाः अलङ्काराः। अवाभरणशब्दमात्रेणैवाभरणसंयोगेऽपि संयोगपदोपादानेन यत्रामिधानं अलङ्कारसंयोगस्याधिक्यात्प्राधान्यमेवेति मन्तव्यम्। कुसुमावोकः शिरोधारणीयपुष्पमाल्यं।

(२०) काम इति। जनः पुरवासिलोकः वत्सं मकरन्दं रमणीयं एभिर्वस्त्रालङ्कारैर्मालतीरूपधारिणमतिरूपं अवलोकयिष्यति मालतीबुद्ध्या द्रक्ष्यति। मकरन्दस्य मालतीरूपधारित्वाये अवोभविष्यति। वस्त्रालङ्कारादिकं मया गृहीतमितीदम्।

(झ) প্রতি। এই বহুলপট্টবস্ত্রনির্ম্মিত চোলক (স্ত্রীলোকের স্তনাচ্ছাদক সেমিজ) এই রক্তবর্ণ উত্তরীয় বস্ত্র, এই সর্ব্বাঙ্গে ব্যবহারের যোগ্য অলঙ্কারসমূহ, এই মুক্তাহার, এই চন্দনও এই বসন্তকে বাসন্তীর পুষ্পমাল্য।

(২০) অন্তের অজ্ঞতভাবে) পুরবাসিজন এই বস্ত্রালঙ্কারাদি দ্বারা মালতীরূপধারী বৎস মকরন্দকে অতি রমণীয় দেখিবে। (প্রকাশ্যে অলঙ্কারাদি গ্রহণ করিয়া) তাহাই হইবে, "বস্ত্রালঙ্কারাদি আমি গ্রহণ করিলাম" ইহা অমাত্যকে বলিবে।

(ঞ) প্রতি। ("যে আজ্ঞে" বলিয়া প্রতিহারীর প্রস্থান)।

(২১) কাম। বৎসে লবঙ্গিকে! বৎসা মালতীর সহিত তুমি দেবতাগৃহের অভ্যন্তরে প্রবেশ কর।

काम। अहमपि तावद्विविक्ते अलङ्करणरत्नानां प्रायस्तां शास्त्रतः परीक्षिष्ये। [इति निष्क्रान्ता।] (२२)

माल। [स्वगतम्]। कथं, लवङ्किकामात्रपरिवारास्मि संवृत्ता। (ट)

लव। इदं देवदामन्दिरदुवारं ता पविसह्म। [इति प्रविशतः]। (ठ)

मक। वयस्य! इतः स्तम्भान्तरितशरीरौ तिष्ठावः। तथा कुरुतः। (२३)

लव। अहि! अयं अङ्करामो, इमाओ कुसुममालाओ। (ड)

(ट) लवङ्किकामात्रपरिवारास्मि संवृत्ता।

(ठ) एतद्देवतामन्दिरद्वारं, तत् प्रविशावः।

(ड) अहि! अयमङ्कुराः, इमाः कुसुममालाः।

(ल) क कुल, मलिष्यतीति शेषः।

(२२) विविक्ते—जनसम्बाधशून्ये। लवङ्किकया सह विवाहानन्तरं निःसङ्गीभूय देवतायतने माधवकन्दले शास्त्रानुसारेण अलङ्कारस्य परीक्षां कर्तुं कामन्दकी निष्क्रमणमिति मन्तव्यम्।

(ट) लवङ्किकामात्रः परिवारः परिजनः यस्या सा तथाभूतास्मि। सम्प्रति अथविर्दानीं वयोऽनुरूपं शास्त्रोपदेशमनुसरामीति भावः।

(२३) तिष्ठाव इति सम्प्रति मालतीलवङ्किकयोर्विवाहसम्बन्धं श्रोतुं यत्नव इति भावः।

(ड) अङ्कुराः—चन्दनकुङ्कुमादिद्रव्यानुलेपनद्रव्यम्।

(ल) लव। আপনি কোথায় যাইবেন?

(২২) কাম। আমিও নির্জ্জন স্থানে শাস্ত্রানুসারে অলঙ্কাররত্নের প্রশস্ততা পরীক্ষা করিব। (কামন্দকীর প্রস্থান)

(ট) মাল। এই যে একমাত্র লবঙ্গিকাই আমার পরিজন থাকিল?

(ঠ) লব। এই দেবতামন্দিরের দ্বার, অতএব (এস) আমরা প্রবেশ করি। (উভয়ের মন্দিরে প্রবেশ)

(২৩) মাধ। বয়স্য! আমাদের শরীর এই স্তম্ভে অন্তর্হিত করিয়া থাকি। (মাধব ও মকরন্দ স্তম্ভের অন্তরালে থাকিল)

(ড) লব। এই চন্দনকুঙ্কুমাদি অনুলেপন দ্রব্য, এবং এই কুসুমমালা।

माल। तदो किं ? (ढ)

लव। सहि ! इमस्मिं पाणिग्गहणमङ्गलारम्भे, कल्लाणसम्पत्ति-णिमित्तं देवदाओ पूजेहित्ति, अम्बाए अणुप्पे सिदासि (ण)।

माल। (स्वगतम्) किं दाणिं दारुणसमारम्भदेव्वदुव्विलास-परिणामदुःख-णिहद्ध-मानसं पुणो पुणो वि मम्म-च्छेअदुःसहं मन्दभाइणीं दुणीसि। (त)

(ढ) ततः किम् ?

(ण) सखि। अस्मिन् पाणिग्रहणमङ्गलारम्भे, कल्याणसम्पत्तिनिमित्तं देवताः पूजयेति, अम्बया अनुशिष्टासि।

(त) किमिदानीं दारुणसमारम्भदैवदुर्विलासपरिणामदुःखनिर्दग्धमानसां पुनः पुनर्मर्म-च्छेददुःसहां मन्दभागिनीं दुनोषि।

(ढ) ततः किमिति, सखे कृतनिश्चयाया मम किमेभिः फलनिरूपैः।

(ण) कल्याणसम्पत्तिनिमित्तं कुलदेवतार्चनम्। अनुशिष्टासीति, तदेभिर्देवता-सर्चयेति शेषः।

(त) साम्प्रतमिति। दारुणः असह्यनिष्ठुरतादिभीषणः समारम्भः मन्दनेन सह विवाह-व्यापारणं यस्मात् तथाभूतश्च दैवस्य यो दुर्विलासः दुर्व्यापारस्तस्य परिणामेन फलीभूतेन दुःखेन निर्दग्धं अतिसन्तप्तं मानसं चित्तं यस्यास्तथाभूतां, दुःसहः सोढुमशक्यः मर्मच्छेदः पीडा यस्यास्तां मर्मच्छेददुःसहां, (प्राकृते पूर्वनिपातनियमात् दुःसहमर्मच्छेदस्य परनिपातः) मन्दभागिनीं अतिदुर्भगां मां दुनोषि एतदिवाहवार्तोत्कीर्तनेन उपतापयसि।

(ढ) माल। ইহা দ্বারা কি প্রয়োজন ?

(ণ) লব। "এই বিবাহে মঙ্গলপ্রারম্ভে মঙ্গলপ্রাপ্তের জন্য দেবতাদিগকে অর্চ্চনা কর" এই কথা বলিয়া মা তোমাকে পাঠাইয়াছেন। অতএব ইহা দ্বারা দেবতার অর্চ্চনা কর)।

(ত) মাল। (স্বগত) নন্দনের সহিত বিবাহপ্রারম্ভরূপ দারুণ কর্ম্মের উৎপাদক দৈবের দুর্ব্যাপারের পরিণামস্বরূপ দুঃখ দ্বারা যাহার চিত্ত দগ্ধ হইতেছে এবং যাহার যাতনা অতি দুঃসহ, তাদৃশী মন্দভাগিনী আমাকে এখন (আবার) পুনঃ পুনঃ সন্তপ্ত করিতেছ কেন ?

सव। अह किं वत्तुकामासि ? (ग)

माल। किं दाणिं दुल्लहाहिणिवेसिमणोरहविसंवदन्तमाअधेओ जणो मन्देदि। (घ)

मक। सखे! श्रुतम्। (२४)

माध। श्रुतमसम्भोपस हृदयस्य। (२५)

माल। [लवङ्गिकां परिष्वज्य।] परमत्थवहिणि विअसन्ति लवङ्गिए! एसा दाणिं दे विअसन्ती अणाहा, मरिसे वहमाणा

(ग) अथ किं किं वक्तुकामासि ?

(घ) किमिदानीं दुर्लभाभिनिवेशिमनोरथविसंवदनमात्रधेयो जनो मन्दयते।

(ङ) परमार्थसखिनि विकसन्ति लवङ्गिके! एषा इदानीं ते विकसन्ती अनाथा, मरिषे

(ग) पूर्वप्रकरणसूचितोऽयं मकरन्दमकरन्दादिदर्शनेन विषयान्तरमुपाय पृच्छति—अथ किं वक्तुकामासीति।

(घ) किमिदानीमिति। दुर्लभाभिनिवेशिनः साहसमुखस्याप्रलब्धपूर्वस्य मनोरथस्य कारणभूता विसंवदन् वैपरीत्यमापन्नं मालतीयं भाग्यं यस्य सादृशः जनः सज्जनको लोकः किं मन्दयते अवसादयति ? अस्य भावः मनोरथविपरीतं तस्य मरणमेव वरं, यदपि मे दुर्लभमिति किं वक्तव्यमिति भावः।

(ङ) यदि श्रुतमिति, मालतीमनोरथस्य दुर्लभजनार्थित्वं श्रुतं किमिति कातरीकरिष्यन्।

(२५) मालतीमनोरथस्य दुर्लभजनार्थित्वं श्रुतमपि हा दुर्लभजनं सर्वथैवाप्राप्तमेव हृदयाशङ्कीव हेतुरिति मन्यमानम्।

(च) सखीति। हे परमार्थसखिनि! मालतीमनोरथविषयेऽवमानवती अधिनीसखी? अनाथा मरणकरणेन, (स्वयमस्य विलुप्तैश्वर्यमालतेऽपि राजविषयानुरक्तायां हृदयेऽपि

(ग) সখে। তুমি কি বলিতে ইচ্ছা করিতেছ ?

(ঘ) মাল। যাহার ভাগ্য দুর্লভবস্তুপ্রাপ্তি মনোরথের প্রতিকূল সে আর কি বলিবে ?

(২৪) মক। সখে! শুনিলে ?

(২৫) মাধ। শুনিলাম, কিন্তু হৃদয়ের সন্তোষ হইল না।

(ঙ) মাল। পরমার্থসখিনি! প্রিয়সখি লবঙ্গিকে! তোমার এই-

आगअ-णिग्गम-णिरन्तरोवआर-विरूढ--वीसम्भ--सरिसं-परिअणेण तुमं पत्थेदि, जइ दे अहं अणुवट्टणीआ, तदो मं हिअएण धारअन्ती, समग्गसोभग्गलच्छीपरिग्गहेक्कमङ्गलं माहवसिरिणो मुहारविन्दं आणन्दसलिलं अवलोअइस्ससि। इति रोदिति। (ध)

माध। वयस्य मकरन्द!

स्नानस्य जीवकुसुमस्य विकाशनानि,
सन्तर्पणानि सकलेन्द्रियमोहनानि।

वर्तमाना, आगमनिर्गमनिरन्तरोपकारविरूढविश्रम्भसदृशं परिजनेन त्वां प्रार्थयते, यदि ते ऽहमनुवर्तनीया, ततो मां हृदयेन धारयन्ती समग्रसौभाग्यलक्ष्मीपरिग्रहैकमङ्गलं माधवस्यैतत् सुखारविन्दम् आनन्दसलिलमवलोकयिष्यसि।

स्मिन् दातुमुद्युक्तस्य तस्यारचलमेवेति खेदोक्तिरियम्) मरणे वर्तमाना अनवगतिक्षणात् मरणमेव मरणं मन्यमाना। आगमनिर्गमात् आगच्छतः निरन्तरोपकारविश्रम्भस्य अविच्छिन्नोपकारोत्पन्नस्य विश्रम्भस्य त्वां प्रति विश्वासस्य सदृशं अनुरूपं यथा स्यात्तथा परिजनेन आत्मीयेन प्रार्थ्यते यथामाधवस्त्वयं याचते। तादृशहृदयविश्वास विनेहक्प्रार्थनायास्तत्पूरणसम्भावनायाश्चाभावादिति भावः। अनुवर्तनीया अनुगमनीया उपकर्तव्येति यावत्। समग्रस्य समस्तस्य सौभाग्यस्य प्रेमाहृदयस्य लक्ष्म्या. श्रिय. परिग्रह एव एक अद्वितीयं मङ्गलं यत्र तथाभूतं आनन्दसदृशं हर्षहेतुं प्रमुदितत्वेन स्निग्धं माधवस्य: श्रीमाधवस्य (प्राकृतत्वात् पूर्वनिपातानियमेनाप्यत्र श्रीशब्दस्य न पूर्वनिपातः। क्वचित् माधवस्येत्येव पाठः) सुखारविन्दं वदनपद्मं अवलोकयिष्यसि द्रक्ष्यसि। मरणे कृतनिश्चयाया अस्या मायाः किमपि प्रार्थनीयमस्ति, अकार्यं चेत्तदेव त्वयावश्यं सम्पादनीयमिति भावः।

(२८) स्नानस्येति। स्नानस्य माधवीमालतीसम्भावनाविरहेण म्लानिमापन्नस्य जीव एव कुसुमं तस्य विकाशनानि प्रकाशकानि, सन्तर्पणानि सम्यक्तृप्तिजनकानि, सकलानां इन्द्रियाणां

प्रियसखी सम्प्रति अनाथा, मृतप्राय मरणे कृतसङ्कल्पा, अत एव यद्यपि निरन्तरकृत उपकार द्वारा समुत्पन्न विश्वासेन अनुरूप आलिङ्गन करिया प्रार्थना करितेछे ये, यदि तुमि आमार उपकार कर्तव्य मने कर, तबे आमाके हृदये धारण करिया समग्र शुभादृष्टेर परिग्रहरूप मङ्गलयुक्त ओ आनन्दसिक्त माधवेर मुखपद्मके देखाइओ। (मानतोष रोदन)

আনন্দনানি হৃদয়ৈকরসায়নানি,
দিষ্ট্যা ময়াপ্যধিগতানি বচোঽমৃতানি ॥ (২৬)

মাল। অহা তস্স জীবিদপ্পদাইণো জণস্স, অবসিদেত্তি মং সুণিঅ সন্তপ্পমাণস্স, তং তহাবিহং সরীররঅণং ণ পরিচ্চীঅদি, জধা অ পরলোঅগদং পি মং উদ্দিসিঅ সো জণো সংসরণকধামেত্ত-পরিসেসং কালন্তরেবি লোঅজত্তং ণ সিঢিলেদি তহা করেবি। এবং জেব বিঅসহীএ পসাদাদো মালদী কিদত্থা হোদি। (ন)

(ন) যদা যস্য জীবিতপ্রদায়িনী জনস্য বর্ত্ততেতি মাং শ্রুত্বা সন্তপ্যমানস্য, তদাবিধং শরীরত্বং ন পরিত্যজতি, যথা চ মা পরলোকগতামপ্যুদ্দিশ্য স জনঃ সংসরণকথামাত্রপরিশেষাং কালান্তরেঽপি লোকযাত্রাং ন বিশিথিলয়তি, তথা করিষ্যসি, এবমেব বিষমসহীপ্রসাদাৎ মালতী কৃতার্থা ভবতি।

মোহনানি আনন্দজাড্যাপনিনীষকানি, আনন্দনানি মনসাপ্যন্তস্তাপহারকানি, তথা হৃদয়স্য রাগজ্বরাদিমূলস্যৈব একরসায়নানি অদ্বিতীয়ৌষধরূপাণি (যদ্বরাত্মাধিবিদ্ধানি ভবন্তি, তদ্বরসায়নমিতি চরকঃ) বচাংসি সাক্ষাদ্দিষ্ট্যেতানীব বাক্যান্যেব অমৃতানি পীযূষাণি দিষ্ট্যা ভাগ্যেনৈব ময়াপি অধিগতানি প্রাপ্তানি। এতাদৃশবচোঽমৃতসম্পাদনগুণযুক্তাদিরক্ষিতোঽপি পরমসৌভাগ্যবশাদ্দৈবাদিতি বাক্যানি শ্রুত্বা কৃতার্থোঽস্মীতি ভাবঃ।

অত্র প্রসঙ্গাপি অর্থগমনপুনরুক্তাদীনি, পরমস্তন্যবদনয়া মাধবেনাভিহিতত্বাৎ পূর্ব্ববদ্-গুণত্বমেব ভজতে। নিরুক্তপ্রত্যবহারঃ। বসন্ততিলকং বৃত্তম্। অয়মেব শ্লোকঃ কিঞ্চিদ্বি-কলীকৃতঃ, উত্তররামচরিতপ্রথমাঙ্কে কবিনা নিরুক্তপ্রত্যবমর্শেষম্।

(ন) মালেতি। যথা মদিরেক্ষণায়াঃ সর্ব্বমুদযুক্তাদি, তথা মদিরেক্ষণা সীতাপি যদি শরীরং সন্ধারিতবতী তদা রামায়ণমাহ—অবেতি। জীবিতদায়িনি করুণাবরুণালয়ে মাধবেতি, অবসিদেতি

(২৬) আর্য। বচন সকলকে! মালতীপ্রাপ্তি নৈরাশ্যে পরিম্লান-জীবন-রূপ কুসুমের বিকাশক, পরম তৃপ্তিজনক, আনন্দজড়তাপহারক, সন্তপ্ত হৃদয়ের তৃপ্তি-বৃত্তির নিরোধক, পরম আনন্দজনক, ও কামজ্বরসন্তপ্ত হৃদয়ের অদ্বিতীয় ঔষধ এই বাক্যামৃত সৌভাগ্যক্রমেই আমি লাভ করিলাম।

(ন) মাল। আমার জীবনদাতা সেই মাধব আমি মরিয়াছি শুনিয়া যাহাতে সেই অসামান্য রূপলাবণ্যসম্পন্ন তাহার সেই শরীরকে পরিত্যাগ না

मक। हन्त अतिकरुणं वर्त्तते। (२७)

माध। नैराश्यकातरधियो हरिणेक्षणायाः
युक्त्वा निकामकरुणञ्च मनोहरञ्च।
वात्सल्यमोहपरिदेवितमुद्वहामि,
चिन्ताविषादविपदञ्च महोत्सवञ्च॥ (२८)

यच्च यतेति मा युक्त्वा मा स्मृता परिशाधेत्यर्थः, क्वचिद्दृश्यते मा मिलित्वेव पाठः। तथाविधं अनिर्वचनीयदयालुत्वादिसम्पन्नं, परिहीयते परित्यज्यते, तथा करिष्यसीत्यन्वयः। स जनः मम जीवितदायी माधवः, अस्यं परैश्चिन्तन तथा मदिषयकं समालापः तत्प्रभावपरिशेषः भूतमे अवशेषः यस्यालयाभूता परलोकवसता सतामपि मां उद्दिश्य कालान्तरेऽपि वा तथा सत्त्वभावात् मरणस्य बहुदिनविलम्बेऽपि लोकयात्रा सांसारिकत्वं न विघिलम्बति वैरागीव स्वतुं शीलयुङ्क्ते। एवमेव—तथाभूत एव, प्रियसखीप्रसादात्—प्रियसखालम्बनानुग्रहात्। एतेन माधवं प्रति मालत्याः समनीवानुराग प्रकटीकृत इति विभावनीयम्।

(२७) अतिकरुणं निरतिशयशोकं यथा स्यात्तथा वर्त्तते अवतिष्ठते।

(२८) नैराश्यमिति। नैराश्येन मन्दनेन सह विवाहस्य पितुरनुमोदितत्वात् मत्प्राप्त्याशा-विरहेण कातरा अतिदुःखाभिभूता धीर्यस्यास्तथाभूताया. हरिणेक्षणायाः हरिणनयनसदृश्य-नयनायाः मालत्या निकामकरुणं प्राणत्यागानुकूलकालान्तरितिमयशोकं तथा मनोहरं मदिषय-कानुरागोत्कर्षप्रदर्शकत्वात् मम मनोज्ञञ्च वात्सल्येन या प्रति निरतिशयप्रेम्णा (यद्यपि वात्-सल्यशब्दः पुत्रादिविषयकः स्नेहसामान्यवाचकत्वेनापि लक्षणया मालतीविषयकः) यो मोहः चित्त-वैकल्यं, तेन यत् परिदेवितं विलापः, तत् श्रुत्वा चिन्तया एतदुद्धाहनेनभावनया यो विषादः विषयत्वं स एव विषम् विषतिः ताम्, महोत्सवञ्च हृदयमालात्यन्तभावनादिसम्पन्नं मालती मय्येवमनुरक्तेत्यहो मे भाग्यमितिरूपं परमं हर्षञ्च उद्वहामि धारयामि।

करে, এবং আমি পরলোকে গমন করিলে যখন আমার স্মৃতি ও কথাই মাত্র অবশিষ্ট থাকিবে, তখন আমাকে উদ্দেশ করিয়া বহুদিন গত হইলেও যেন সে যাহাতে সংসারযাত্রাকে বিধিত না করে, তাহা করিও। তাহা করিলেই প্রিয়সখীপ্রসাদে কৃতার্থা হইবে।

(২৭) মক। মালতী নিরতিশয় শোকের সহিত বর্ত্তমান আছে।

(২৮) মাধ। আমার প্রাণবিনিময়ার কাতরান্তঃকরণা হরিণেক্ষণা মালতীর অতিশয় কারুণ্যযুক্ত ও মনোহর প্রেমঘটিত চিত্তবৈকল্যপ্রযুক্ত বিলাপ

অব। অহ। পডিহদং দাণিং দে অমঙ্গলং তা অদোবি অধিঅদরং সুণিস্সম্। (ঙ)

মাল। সহি। পিঅং খু তুহাণং মালদীজীবিদং ণ উণ মালদী। (চ)

অব। কিং এবং ভণিদে ভীদি। (ছ)

মাল। [আত্মানং নির্দিশ্য।] জেণ অহজণপচ্চাসাণিবন্ধণীহি বম্ভণস্সিহাণীহি জীআবিঅ ইমং জ্জেব মহাবীভচ্ছারম্ভং

(ঙ) অয়ি প্রতিহতম্ হতাশে তেঽমঙ্গলম্। নাতোঽধিকতরং শ্রোষ্যামি।

(চ) সখি। প্রিয়ং খলু যুষ্মাকং মালতীজীবিতং ন পুনর্মালতী।

(ছ) কিমেবং ভণিতে ভবতি।

(ঝ) যেন অন্যজনপ্রত্যাশানিবন্ধনৈর্ব্রহ্মস্বহরণবিধানৈর্জীবিত্বা ইমমেব মহাবীরভট্টারকমনু-

অব বিষাদার্থকীকৃপূর্ব্বকবহুধাতোর্ধারণার্থে প্রয়োগাদবাচকলক্ষণা। অনাদ্যন্তয়োর্দ্বিত্বপক্ষীতস্বয়োর্"বহুলমাভীক্ষ্ণ্যে"বহুলাভীক্ষ্ণ্যেন ক্রিয়য়া কর্ম্মভূতয়াত্মানমনুভবতীতি এবং দ্বিতীয়তৃতীয়পক্ষীতস্বয়োরিত্যত্র তৃতীয়াগ্রহণাৎ তৃতীয়াগ্রহণে এনয়ীঃ সংজ্ঞাঃ। বহুলমিতিসংজ্ঞাকরণম্।

(ঙ) অমঙ্গলং সংকল্পাধ্যবসায়রূপত্বাদ্বিহিতং প্রতিহতং অবিহিতদৈবতয়া বিনাশিতং ভবেদিতি ভীতঃ।

(চ) এবং ভণিতে—"মালতীজীবিতমেব যুষ্মাকং প্রিয়ং ন পুনর্মালতী"ত্যুক্তে কিং ভবতি? অনেন বাক্যেন কিং প্রতিপাদিতং ভবতীতি সম্বন্ধঃ। মালতী মালতীজীবিতশব্দয়োরভেদাধ্যাসেনৈতদুক্তিরাত্মপরতয়া মালতীজীবিতস্য প্রিয়ত্বে মালত্যা অপ্রিয়ত্বং ব্যাহতমিতি লক্ষণীয়-কক্ষয়া তাৎপর্য্যং সাধনচ্ছলেনেতি ভাবঃ।

শুনিয়া আমি ইহার দুঃখাপনয়নোপায়চিন্তাজনিত বিষাদরূপ বিপত্তি ও পরম আনন্দ ধারণ করিতেছি।

(ঙ) নব। অয়ি সখি! সন্নিহিত দেবতা কর্ত্তৃকই তোমার মরণাধ্যবসায় রূপ অমঙ্গল বিনাশিত হইবে। ইহার অধিক আর শুনিব না।

(চ) মাল। সখি! মালতীর জীবনই তোমাদের প্রিয়, কিন্তু মালতী তোমাদের প্রিয় নহে।

(ছ) তোমার এই কথায় কি তাৎপর্য্য হইল? (বুঝিলাম না)।

अणुभाविदम्हि। सम्पदं उण मम मणोरहो एसो क्केव्व जं तस्स देवस्स परोक्खगुणकित्तणेण अणवरद्धं अप्पाणं परिच्चइस्सं त्ति, ता, इमस्मिं पओअणे पिअसही मे अपरिपन्थिणी होदु। इति पादयोः पतति। (म)

आविताऽस्मि। साम्प्रतं पुनर्मम मनोरथ एष एव यत्, तस्य देवस्य परोक्षगुणकीर्त्तनेन अनपराद्धमात्मानं परित्यक्ष्यामीति। तदस्मिन् प्रयोजने प्रियसखी मे अपरिपन्थिनी भवतु।

(म) (आत्मानं स्वकीयदेह निर्दिश्य अङ्गलिसङ्केनाङ्गुल्या प्रदर्श्य आहेति शेषः) देव हेतुना अन्यप्रत्याशासूचकैः साधवप्राप्त्याशासूचकैः वचनसंविधानैः "सखि! समाश्वसिहि, अवश्यमेव माधवं प्राप्स्यसी"त्यादि महाकवीपन्यासैः जीवयित्वा माधवप्राप्त्याशाविसर्जनेन मदीयं हृतसङ्कल्पं मां मरणाद्वारयित्वा इमामेव महावीरतृद्वारभां नन्दनेन सह विवाहोपक्रमातिगर्हितकर्मणः उपक्रमं सम्पिण्डयन्तीदुःखमिति यावत् अनुभाविताऽस्मि परिबोधिताऽस्मि युष्माभिरिति शेषः। तथाच मालती सुखिनी दुःखिनी वा भवतु, किन्तु जीवतु इत्येव युष्माकमभिप्रायः, मतु मालती अदुःखितैव यथा तथा वा भवतीति युष्माकमभिप्रायः, अतः साधूक्तं "प्रिया खलु" युष्माभ्यं मालत्या जीवितं मतु मालत्या दुःखाभाव इति। एवञ्च मालतीपदस्य दुःखरहितेतरद्वयाभिधायकत्वात् मालतीजीवितपदस्य च उभयेच्छाविषयत्वात् सर्वाक्यार्थो व्याकुल इति भावः। फलितं कथयति—साम्प्रतमित्यादिना। देवस्य माधवस्य, परोक्षगुणकीर्त्तनेन तदसन्निधाने एव तदीयगुणानां वर्णनेन (सन्निधाने गुणवर्णने तु लज्जाकलापराधी भवेदित्याशयः) अनपराद्धं अपराधरहितं (नन्दनेन सह विवाहे तु महानपराधी भवेदित्यपि ध्वन्यते)। "परकीयतेनापराद्ध"मिति पाठे तु परकीयतेन माधवान्वयसम्बन्धिकीर्त्तनेन अपराद्धं अपराधिनमित्यर्थः। तदुद्देश्यकेनैव मे महानपराधः स्यात् अथा तत्सम्पादन इति भावः। अपरिपन्थिनी अविघ्नकारिणी।

(ङ) (निजের দেহ অঙ্গুলি দ্বারা দেখাইয়া) যে হেতু মাধবপ্রাপ্তির প্রত্যাশাসূচক বাক্যবিন্যাস দ্বারা আমাকে জীবিত রাখিয়া নন্দনের সহিত বিবাহোপক্রমরূপ এই অতিগর্হিত অনুষ্ঠান অনুভব করাইতেছ। (অতএব আমি ঠিকই বলিয়াছি, মালতীর জীবনই তোমাদের অভিলষিত, কিন্তু মালতী অর্থাৎ মালতী কিরূপে নির্দুঃখে থাকিবে, তাহা তোমাদের অভিলষিত নহে) সম্প্রতি আমার ইহাই মনোরথ যে পরোক্ষে সেই মহাত্মা মাধবের গুণকীর্তন

মক। সৈষা সীমা স্নেহস্য। (২৯)

নবরিকা। (মাধবং সংজ্ঞয়া সমাহ্বয়তি)। (৩০)

মক। বয়স্য! উপসৃত্য নবরিকায়াঃ স্থানে তিষ্ঠ। (৩১)

মাধ। বয়স্য! পরবানস্মি সাম্প্রতম্। (৩২)

মক। ইয়মেব মে দৌষস্যা প্রকৃতিরভ্যুদয়ানাম্। (৩৩)

মাধবঃ। (তথা নবরিকাস্থানে তিষ্ঠতি)। (৩৪)

মাল। সখি! করেহি অণুজলদাএ পসাদং। (ম)

(ম) সখি। কুরু অনুকূলতয়া প্রসাদম্।

---

(২৯) সীমা—পরাকাষ্ঠা, নৈরীতিকঃ স্নেহঃ ত্বয়ৈবতীতি ভাবঃ।

(৩০) মাধবং—পূর্বসঙ্কেতেন স্ত্রিয়ৌচিত্যসম্পাদনায়াবরোধাৎ। সংজ্ঞয়া—অঙ্গুলী-সঙ্কেতেন।

(৩১) নবরিকায়াঃ স্থানে নবরিকা প্রকাশিকা তত্র।

(৩২) তাদৃশেন অন্যসন্দর্শনযোগ্যেন বা নবরিকাস্থিতবল্লীকদম্বা অদর্শনাৎ পরস্যেদমপেন বা পরাধীনো মালতীস্থানে স্থাতুং পরবানস্মি; ত্বদাজ্ঞয়া স্থাতুং শীলোঽস্মীত্যর্থঃ।

(৩৩) নৈরীতিকস্য অনিষ্টশঙ্কায়া (অনিষ্ট+ঘঞ্‌প্রত্যয়, "অনিষ্টাদ্যৈরীতিকাদ্যৌ" ইত্যনিষ্টশব্দস্য নৈরীতিকঃ) অপ্রাদুর্ভাবাৎ অনিষ্টমিতরজীবনাদিসম্বন্ধানাং ত্বমেব প্রকৃতি-স্বভাবঃ। এতাদৃশস্যাত্মনোঽপ্রকাশে অত্যন্তকল্যাদিসাম্মিকভাবোদয়াৎ পরাধীনস্যাপি মম স্বাধীনত্বমিত্যর্থঃ।

(৩৪) তথা নবং মালতী অস্থাতুং যথা স্থাতব্যমিত্যর্থঃ।

(ম) অনুকূলতয়া সংযোগমভিলাষানুবৃত্ত্যা, প্রসাদং অনুগ্রহং কুরু।

করিয়া অনপরাধী আমাকে পরিত্যাগ করিব। আমার এই বিষয়ে প্রিয়সখী প্রতিকূল হইও না। (এই কথা বলিয়া মালতী নবরিকার পার্শ্বে দাঁড়াইল)

(২৯) মকরন্দ। ইহাই স্নেহের চরম সীমা।

(৩০) (নবরিকা অঙ্গুলীসঙ্কেতে মাধবকে আহ্বান করিল)

(৩১) মকরন্দ। বয়স্য! তুমি যাইয়া নবরিকার স্থানে দাঁড়াও।

(৩৪) (মাধব অতিসন্তর্পণে যাইয়া নবরিকার স্থানে দাঁড়াইল)

(ম) মালতী। সখি! মরণানুরোধরূপ আনুকূল্য করিয়া অনুগ্রহ কর।

माध। सरले! साहसरागं परिहर, रम्भोरु! मुञ्च संरम्भम्।
विरसं विरहायासं, सोढुं तव चित्तमसहं मे॥ (७५)
माल। सहि! अलंघणोओ ज्जेव्व दे मालदीप्पणामो। (य)
माध। (सहर्षं) किं वा भणामि विच्छेददारुणायासकारिणि!
कामं कुरु वरारोहे! देहि मे परिरम्भणम्॥ (७६)

(य) सखि। अवहूनीय एव ते मालतीप्रणामः।

(७५) सहर्षमिव सखिकाभयापनोदनेन सत्वमुद्भावने माधवो निःशङ्कं न स्वमनोगत-सर्वस्वं निवेदयेत् सम्भया वा दूरं गच्छेदिति मत्वा माधवः "तत्सत्यं तद्गमनं दैवीत्यनेनः प्राकृतशब्देन" इति संस्कृतसमेनैव प्राकृतेन सखिकायाः सख्या च सापारथेन शब्देन सखिकाकथनयोग्यमेव स्वयमुच्यमाह—सरले इत्यादिना। हे सरले। ऋजुहृदे! साहसे प्राणत्यागरूपे साहसिकव्यापारे रागं अभिलाषं परिहर परित्यज। तथा हे रम्भोरु! कदली-काण्डसमोरुदेशे! संरम्भं मनोदयोगमपि मुञ्च परिहर। अत्र हेतुमाह—विरस-मित्यादिना। विगतो रसः सामान्यिकानुरागो यस्मात्तादृशं तव विरहायासं विरहदुःखं सोढुं मे मम चित्तं अहृदयं असमर्थं। तथाच मां प्रत्यनुकम्पयापि त्वया मरणवासना मरणोद्योगश्च न कर्तव्य इति भावः।

अत्र पूर्वार्द्धगतवाक्यार्थस्य प्रति परार्द्धगतवाक्यार्थस्य हेतुत्वाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः। नचात्र माधवे सखिकाया. कार्य्या, एतेषां शब्दानां संस्कृतप्राकृतविशेषयोः उपलाम्भेऽपि वाच्यभेदाभावात् न हेत्वनुपपत्तेरिति। आर्य्याजातिः।

(य) सरले इत्यादि वाक्यानां सखिकाभिधानशब्दा सलरत्वस्य सखिकायाः अनभिमतं परिहाय पुनरनुनयति—सखीत्यादिना। अवहूनीयः अवज्ञायोग्यः। तथाच मालती-प्रणामगौरवेण तवानभिमतमपि मां प्रत्यभिमतमिति सम्भरणमनुमोदनीयमिति भावः।

(७६) सहर्षमिति। सखि! इत्यादुक्तया माधवस्तेनापरिज्ञानावगमो हर्षहेतुः। माधवः

(७५) माध। अरि सरले! प्राणत्यागरूप साहसिक व्यापारে অভিলাষ পরিত্যাগ কর। হে রম্ভোরু! মদনের উদ্যমও পরিত্যাগ কর। যে হেতু আমার চিত্ত সংসারবিরাগহেতু তোমার বিরহদুঃখ সহ্য করিতে অসমর্থ।

(য) মাল। মালতীর প্রণাম তোমার সখিরই অবজ্ঞনীয়।

মাল। [সহর্ষম্।] কথং অণুগ্গহীদহ্মি। [সত্যায়।] হৃদয়মালিঙ্গামি। দংসণং উণ বিরসহোএ বাপ্পকোপোড়েণ চিরহং পচ্ছিমং ণ লহামি। ভঅ। [আলিঙ্গ্য সানন্দম্।] সহি! কঠোরকমলগর্ভপক্ষালো অম্হারিসো জ্জেব্ব দে অল্ল ণিব্বাবেদি মং সন্তপ্পমাণং

(২) কথমনুগৃহীতাস্মি। হৃদয়মালিঙ্গামি। দর্শনং পুনঃ বিরসস্য বাষ্পীয়পীড়েন চিরং পশ্চিমং ন লপ্স্যে। ভবতি। কঠোরকমলগর্ভপক্ষালঃ অস্মাদৃশ এব তে অয়ং নির্বাপয়তি মাং সন্তপ্যমানাং বিরসস্য। শরীরস্যেতি। বিষম শীলিবিনিবেশিতাত্মনিমেন বচনেন বিদ্যা-

পূর্ববদেব তদুক্তেরেব মর্দ্দনৈর্থক্যমিত্যাহ—কিং ইতি। আত্মবশে হি বিষয়েঽনায়ত্তায়াং বাচি। বর্ণনানির্বাহনাদিনীত্যর্থঃ। কিন্তু মধ্যাদি মধ্যবিষয়ে কিং বা ব্রবীমি, তস্যাশ্চলনশিলত্বকোমলত্বাভ্যাং তদুপায়া সংবৃত্তা বিশ্বস্তীজনবাচ তত্র ন কিমপি বক্তুমসমীক্ষ্যেত্যর্থঃ। অতএব হে বরারোহে। ইত্যপি। (বরারোহঃ শ্রোণিভারাদীরিতি ধরণিঃ) কাম্ [কুরু ময়া তব আলম্ব্যাপারং অনুমিতঃ। "হে বিশ্বস্তেদানীমায়ত্তায়াং বাচি মধ্যা-ভাবিবিবিধবর্ণনানির্বাহনীয়কঃ কিং ব্রবীমি? তব মধ্যবিষয়ে কিং কথয়ামি? তদুপযোগ্যস্তরলীয়ত্বাত্ কিমপি বক্তুং প্রমদালীবর্গঃ। অতএব বরারোহে! কাম্ যথাভি-লষিতং কুরু" ইতি নবযৌবনোচিতালিঙ্গনাদিকম্। মাধবস্য বীক্ষণীয়ঃ অর্থঃ। অতএব মে মম পরিরম্ভং আলিঙ্গনং ইতি বস্তূপক্রম সমানম্।

অত্র "মাধবং সংস্মরন্ মনসাদৃশতি" ইত্যাদিসন্দর্ভে তদ্দর্শে জনস্য মাধবাদিনাথবুদ্ধা নিসর্গাদবিবশং মাল মর্দনস্থৈর্যং, দর্শনীয় তত্রবস্তু—"অধিবসতি নিবিড়মধিহৃদয়ং" ইতি।

(২) "কাম্ কুরু" ইত্যেব অভিব্যক্তি স্মরণে নবযৌবনায়াঃ 'হৃদয়ং' মনো সানন্দ-

(৩৮) মাধ। (হর্ষের সহিত) হে বিচ্ছেদ দ্বারা তীব্র দুঃখ দানশীলে মালতি! তোমার এই মৃত্যু বিষয়ে আমি কি বলিব? (অতএব অনুচিত ও নিষ্প্রয়োজনীয় বিধায় এ বিষয়ে আমি কিছুই বলিতে চাহিনা) হে সুশ্রোণি! তুমি আমার সহিত কাম ব্যবহার কর, আমাকে আলিঙ্গন দেও। (নবযৌবনার উক্তিদ্বয়ে মালতীবোধ্য অর্থ—"তোমার এই মৃত্যু বিষয়ে আমি আর কি বলিব, তোমার যাহা ইচ্ছা তাহাই তুমি কর। হে বরারোহে! আমার আলিঙ্গন দেও")।

(৩) মাল। (হর্ষের সহিত) তবে কি আমি মদনানুমোদন দ্বারা অনু-

विअसन्तीए सरीरप्फसो। [मास्तम्।] किञ्च, मउलिविणिवेसिदञ्जली मम वअणेण विण्णावेसि तं जणं, जधा, ण मए मन्दभाइणीए, विअसन्तपुण्डरीअलच्छीविलासहारिणो संपूण्णचन्दमण्डलाहिरामस्स मुहस्स दे सच्चन्ददंसणेण सण्णाविदो चिरं महसवो लोअणाणं। सुधामणोरहेहिं च अविरदविअम्भमाण-

---

पत्रिण्यसि तं जनं, यथा, न मया मन्दभागया, विकसत्पुण्डरीकलक्ष्मीविलासहारिणः सम्पूर्णचन्द्रमण्डलाभिरामस्य मुखस्य ते सत्यन्ददर्शनेन सन्नाविताचिरं महोत्सवो लोचनानाम्।

माह—कथमिति। अनुगृहीतापि मापितमरन्दाङ्गीकरणेन कृतार्थयसि। पथिमं मरन्दस्वादनीयत्वेन चरमं प्रियसखाधरस्य दर्शनं अवलोकनं बाष्पोत्पीडेन दुःखातिशयोद्रेकतानुप्रवाहेण निरुद्धं प्रतिरुद्धं न लभ्यते। (एतेनोत्तरायाश्चिबुकस्पर्शोऽपि अथ माधवस्तेन न परिज्ञात इति गङ्गा निराकृता) एवं सपत्निकायामुद्वहापि माधवे कृतानिष्टशङ्कतो अविज्ञाता सतस्ते निमग्नेव सन्तापमसहमनुभवन्ती पुनराह—सद्धीति। कठोरं दारितं यत् कमलं पद्मं तस्य गर्भवत् बीजकोषवत् पद्मस्य सौमाङ्कसुचितः सुन्दरः स्पर्शानुभूतिविशेषरूपः, निर्वापयति शीतलयति। मरन्दे कृतनिश्चया माधवं प्रति चरमाभिप्रेयं कथयितुमाह—विअसेति। तं जनं माधवं (मनसा पतित्वेन कृतनाथामात्मानं च इति शेषः) विकसतां प्रफुल्लानां पुण्डरीकाणां पद्मानां सच्छीविलासं शोभाविलासं हरतीति तथोक्तस्य ततोऽप्यधिक सुन्दरस्येत्यर्थः। सच्चन्ददर्शनेन यथार्थेन तवचन्द्रस्य दर्शनेन लोचनानां

गृहीत हইলাম। (উঠিয়া) এই আমি আলিঙ্গন করিতেছি। ভ্রমপ্রমাদের প্রতিরোধ বশতঃ প্রিয়সখীর চরমদর্শনও পাইতেছি না। (আলিঙ্গন করিয়া আনন্দের সহিত) সখি! পরিণত পদ্মের গর্ভকোষের ন্যায় রোমাঞ্চযুক্ত পূর্ণানুভূত স্পর্শের বিশিষ্টরূপ তোমার শরীর স্পর্শ সন্তাপাবান আমাকে আজ শীতল করিতেছে। (সাক্ষনেত্রে) আরও বলি, মস্তকে অঙ্গুলি নিহিত করিয়া আমার বাক্যানুসারে তাঁহাকে জানাইও যে "বন্ধভাগিনী আমি প্রফুল্ল কমলশোভাবিলাসহারী ও সম্পূর্ণ চন্দ্রমণ্ডলের ন্যায় মনোজ্ঞ তোমার বদনের সুন্দর দর্শন দ্বারা নয়নের মহোৎসব সম্পাদিত করিতে পারি নাই।" অবিচ্ছিন্নরূপে বর্দ্ধমান দুর্দমনীয় কামোদ্বেগের সম্পর্কে যাহার মূলবন্ধন উচ্ছিন্নপ্রায়, তাদৃশ হৃদয়কে দৃঢ় মনোরথ বাঁধাই (এ পর্য্যন্ত) ধারণ করিয়াছি। আমার সেই

दुव्वारुव्वे अव्वईकरुव्वत्तमाणवन्धणं धारिअं हिअअम्। - गमिआ अ वारंवारं सविसेसदूसहारम्भदूमणाइअसहीअणा सरीरसन्दावा, कधंवि अदिवाहिदा चन्दादवमलअमारुदप्पमुहा अणत्थपरम्परा, सम्पदं उण विरासाहिं संवुत्तेसि, तुएवि पिअसहीए सव्वदा सुमरिदव्वासि। एसा अ सिरिमाइवसहअणिआणमणहरा वउलमाला मालदीजीविदणिव्विसेसं पिअसहीए दट्ठव्वा सव्वधा हिअए धारणीएत्ति। (इ)

दुर्धारदोर्देवेन अविरतविजृम्भमाणदुर्वारोदे मन्मथिकरोर्णनाभबन्धनं धारितं हृदयम्। गमिताश्च वारंवारं सविशेषदुःसहारब्धदूनमानसाइअसहीजनाः शरीरसन्तापाः, कथमपि अतिवाहिता, चन्द्रातपमलयमारुतप्रमुखा अनर्थपरम्पराः, सम्प्रतं पुनर्विरसायां संवृत्तेति। त्वयापि प्रियसखी सर्वदा स्मर्तव्यासि। एषा च श्रीमाधवसहचरणिजातमनोहरा वकुलमाला मालतीजीवितनिर्विशेषं प्रियसख्या द्रष्टव्या, सर्वथा हृदये धारणीया इति।

मम नयनानां (बहुवचनं दर्शनबाहुल्यातिशयद्योतनार्थं, क्वचित् "जीवनयो"रित्येव पाठः) मनोरथवः परमानन्दः न सम्पादितः न सम्पादितः। मुधा मनोरथैः "यथा तैल समनिषेक" सुखमनुभविष्यामी"ति प्रत्याभिनिवेशैः, अविरतं अविच्छेदं विजृम्भमाणस्य महोन्मादस्य दुर्धारोदे मदनकामोदेकस्य यो मन्मथिकरः सम्बन्धः तेन हृदयमेतत् ग्रन्थिदृढाय बन्धन सूत्रकल्पो यत्र, तथाभूतं हृदयं धारितं धृतावलम्बं परिरक्षितं। तथाविधमनोरथो यदि नाश्वासयदा साइअजीवितेनैव मम हृदयमुद्मूलितमभविष्यदिति भावः। सविशेषैः सातिशयैः चारुभिः सहकारानुलेपनमलयजलिनीदलशीतलमारुतादिभिरुपचारैः दुर्धमायिताः मनोविकारोदयविनाशहेतुभिर्मिताः कृताः सखीजनाः यैः तथाभूताः शरीरसन्तापाः सम्बन्धिकृताः गमिताः अतिवाहिताः। चन्द्रकिरणादीनां विरहिजनसन्तापकत्वं प्रसिद्धमेव, अत एवात्रापदीपादानं कार्यकम्। अनर्थपरम्पराः अविच्छिन्नदुःखप्रवाहाः, अहमपि अतिकष्टेन

मनोरथसङ्गम সাতিশয় উৎকণ্ঠারাশ্বেপনও শয়নীয় নলিনীপত্রের শৈত্যাদি ব্যাপারে সখীদিগকে অত্যন্ত দুশ্চিন্তিত করিয়াছে, তাহাও অনুভব করিয়াছি। চন্দ্রকিরণ ও মলয় মারুত প্রভৃতি অনর্থকারী বস্তু সকল অতি কষ্টেই (তোমার প্রাপ্তির আশায়) অতিবাহিত করিয়াছি। কিন্তু সম্প্রতি একেবারে নিরাশ হইয়া পড়িয়াছি।" প্রিয় সখীও সর্বদা আমাকে স্মরণ করিও। শ্রীমাধবের

(सकण्ठादपनीय माधवस्य हृदि विन्यस्यन्ती सहसा अपसृत्य साध्वसोत्कम्पं नाटयति।) (३७)

माध। [अपवार्य।] हन्त! (३८)

एकोल्लसत्त्वचि निषिक्त इवावपीड निर्भुग्नपीनकुचकुड्मलयानया मे।
कर्पूरहारहरिचन्दनचन्द्रकान्तनिष्यन्दशैवलमृणालहिमादिवर्गः॥

अतिवाहिताः, सर्वेव मालायया अतिक्रान्ताः। पुनः किन्तु निराशा मन्देन सह विवाहस्य पिता श्रिरीक्षतत्वात् स्वप्नादौ इमामाहि कंदर्पेति विज्ञापयिष्यसीत्यवयः। यौनाधव-सङ्कल्पेव माधवनामोच्चारणमतिमोक्षसमाकुलत्वेन मालिवयादिति मन्तव्यम्। मालती-जीवितनिर्विशेषं मालतीजीवितानुरूपं यथा स्यात्तथा द्रष्टव्या मानहीनतीर्थैरयः।

(३७) अपनीय उन्मोच्य विन्यस्यन्ती वक्षुलमालामर्पयन्ती, सहसा अपसृत्य मालार्पण-काले मलयस्थितीरक्षलाघवानुभवात् पुरुषवुद्धया विज्ञातीयालिङ्गनसुखस्मरणेन कथञ्चित् प्रथमेव या माधवस्तीला च द्रुतं किञ्चिदन्तरं गत्वा (प्रथमालिङ्गनकाले स्वामिन्यर्पितादपि पुरुषादपसरणं लज्जादिप्रयुक्तं स्त्रीणां स्वाभाविकमिति माधवपरिज्ञानेऽपि मालत्यपसरणं न विरुद्धमिति विभावनीयम्) साध्वसोत्कम्पं भयादिजनितवैपथुं नाटयति अभिनयति। नाटयतिर्गत्यर्थे पिबाद्यनुगतपुरुषवैपथ्य सद्भावस्थानं तदाधिक्यादिः सात्त्विकभावोदयश्च साध्वसोत्कम्पहेतुरिति।

कर्पूर सन्दर्भेण सतीव तापप्रशमेः पद्मादयोऽपि नाम नाट्योपचारः। तन्नयधन्तु—"मीक्षाधीरितार्थस्य पद्मादापः स एव तु" इति।

(३८) अत्र "हन्त" शब्दो हर्षद्योतकः।

(३९) एकोल्लस इति। निर्भुग्नौ गाढाश्लिष्टत्वात्तदीयकर्कशत्वशैथिल्यापादनेन किञ्चिदवनतत्वापन्नौ, अत एव पीनौ पीवरतामापन्नौ कुचौ स्तनौ एव कुड्मलौ मुकुलौ

पल्लव-निर्माण-मनोहर एई वकुलमाला मालतीर जीवननिर्विशेषे प्रिय सखीर द्रष्टव्य ओ सर्वदा हृदये धारणीय।

(एই कथा बलिया मालती निजेर कण्ठ हইতে বকুলমালা মাধবের হৃদয়ে বিন্যস্ত করিতে করিতে সহসা অপসৃত হইয়া ভীতিজনিত কম্পের অভিনয় করিতে লাগিল)

(৩৯) মাধ। (অন্যের অলক্ষিতভাবে) অহো গাঢ় আশ্লিষ্টবশে আমার কর্কশ বক্ষের অবপীড়নে যাহার পীন স্তনবুকুলের অগ্রভাগ কিঞ্চিৎ অবনত

माल। [स्वगतम्।] अहो! सर्वहिआए मालदी विप्पलद्धा। (ख)

माध। अयि! सर्वेदनाभावनिर्वेदिनि! परव्यवसानभिन्ने! इयमुपालम्भवेला। (४०)

उद्दानदेहपरिदाहमहाज्वराणि,
सङ्कल्पसङ्गभविनोदितवेदनानि।
त्वत्क्लेशसंविदवलम्बितजीवितानि,
किं वा मयापि न दिनान्यतिवाहितानि? (४१)

(ख) अहो सर्वहितया मालती विप्रलब्धा।

यद्यप्यादानमूलका सकला माहना सर्वकौशा सा स्वाङ्गादिहर्ष के मन सति सर्वेन्द्रिये सर्वपूर्णा-दीनि प्रतिहतानि कादिनाम्नेन सकलविषयादि: परिहृत:, तेनैवं भूते उत्पन्ने एवोक्तम: निर्वेदस्य सन् निर्वेद: दिष्ट इव। अथवा सकलाहर्षोत्पादकत्वात्सकलादिति भाव:।

यत्र निर्वेद इति सकलेन्द्रियोपादानात्, तेन च मालत्या: सर्वेन्द्रियाणि तेन सकलेन इन्द्रियाणि यदुच्यते:। सकलेन्द्रियकालयम्।

(ख) विप्रलब्धा मालत्यादानादि कर्तुं संज्ञाय प्रवर्तिता। यदपि सर्वहितया मालतिं वर्तिव कार्यम्, तथाप्याकाशवदेवेन प्रकारेणोक्तम्।

(४०) अयीति। मालतीव्यवसाय: प्रवृत्तोपायकल्पनाव्यापार:। परव्यवसानेति पराव्यवसाय मन विप्रलब्धे यर्थ:। इयं सा उपालम्भवेला उपालम्भयोग्यकालो विद्यते।

(४१) सर्वेदना इत्यादि—उद्दानेति। उद्दानं उत्कटं देहस्य शरीरस्य परिदाह: कामजन्यताप एव महाज्वरो येषु, सङ्कल्पसङ्गेन मानसिकसम्बन्धेन

दहियाछे, एইরূপ মালতী আমার প্রাণ আলিঙ্গন করিয়া আমার সকলেন্দ্রিয় কর্পূর, মৃণালহার, হরিচন্দন ও চন্দ্রকান্ত মণির নির্যাস, তৈলাক্ত, ঘৃণাপ এবং হিমাদ্রিসমূহ নিম্নীকৃত করিয়া যেন আমার হৃদয়ে নিবিক্ত করিতেছে।

(খ) মাল। (স্বগত) অহো সর্বহিতা কর্তৃক মালতী প্রতারিতা হইয়াছে।

(৪০) মাধ। অয়ি! সর্বেদনাভাবনির্বেদনশীলে! পরব্যবসানভিন্নে! তোমাকে উক্ত সম্ভাষণে তিরস্কার করিতেছি।

लव। सखि! उपालम्भनीयैवोपालब्धासि। (ब)

काल। अहो! सरसरमणीयदा संविधानस्य। (श)

भक। महाभाग! एवमेतत्। (४२)

(ब) सखि! उपालम्भनीयैवोपालब्धासि।

(श) अहो सरसरमणीयता संविधानस्य।

विनोदिता कथंचिद्विचारिता वेदना विरहव्यथा येषु तानि, त्वत्स्नेहसम्भिदा मयि तवानुरागोऽस्तीति बुद्धा (स्नेहोपलब्धिजन्म संविदित्यमरः) अवलम्बितं धृतं जीवितं जीवनं येषु तथाभूतानि दिवसानि किं वा मयापि (न केवलं त्वयैवापेक्षितैः) न अतिवाहितानि नातिक्रान्तानि? अपि तु अतिक्रान्तान्येवेत्यर्थः। तथाच स्ववेदनावनिवेदनानुमितेन त्वयि मद्वेदनासम्भिज्ञानेनास्मदर्थितामिच्छता त्वया निन्द्या मया क्रियत इति भावः।

परस्परानुरागौचित्यसमुत्थेपादित्यम् "आक्षेपो गर्हणाद्यत्तु तथौचित्यं—गर्हणौचित्यसमुत्थेपादाक्षेपः परिकीर्तितः" इति।

"आख्यानं पूर्ववृत्तोक्ति"रिति दर्पणलक्षणकादम्बाख्यानं नाम नाट्यालङ्कारः। एवं परिवादनङ्काख्य इति निरङ्कुशकालङ्कारः। अनुपपत्तौ अर्थापत्तिः, अवलम्बितीवरचयोरनुभवेन यथावदनुभूयेत इति तेषां परस्परनैपेक्ष्यात् संसृष्टिः। अवलम्बितिकालङ्कारस्य।

(ब) उपालम्भनीयैव स्ववेदनानुसारेण मामवेदनाया अननुमानेन तिरस्कारयोग्यैव। तथाच त्वय निन्दाकरणेनास्य कथिद्दोष इति भावः।

(श) संविधानस्य अवलयोर्ललनयोरुपरि विधातृविधानस्य। सरसं सानुरागं अत एव रमणीयं मनोज्ञं तस्य भावस्ता। दूरात्कृतावलोकनस्य कृतसङ्केतस्य स्वगतोक्तिरियम्।

---

(৪১) যে সকল দিনে উৎকট কামজ দেহসন্তাপরূপ মহাজ্বর হইয়াছিল, যাহাতে তোমার মানসিক সঙ্গম দ্বারাই বিরহব্যথা কথঞ্চিৎ নিবারিত করিয়াছি,' এবং "আমার প্রতি তোমার অনুরাগ আছে" এই জ্ঞানবশতঃই যে সকল দিনে জীবন ধারণ করিয়াছি, সে সকল দিন কি আমিও অতিবাহিত করি নাই?

(ব) লব। সখি! তুমি তিরস্কারের উপযুক্তা বলিয়াই তিরস্কৃতা হইয়াছ।

(শ) কাল। অহো—এইস্থানে ইহাদিগের সন্দেহনরূপ বিধাতার বিধান অত্যন্ত সরস ও রমণীয়।

त्वं वत्सेति कथंचन्नवलम्बिताक्षा,
सद्यः जनोऽयमिति दीर्घसमालपेयुः।
आवर्धकङ्कणकरग्रहयप्रसाद-
माप्याद्य नन्दतु चिराय, फलन्तु कामाः॥ (३१)

सख। महाणुभाव! हिअए वि अवट्ठिदस्स गाढसाहसो अत्थ अत्थो, किं दाणिं अरण्णहिए विआरेदि। (४)

(४) महानुभाव! हृदयेऽपि अवस्थितस्य गाढसाहसोऽत्र अर्थः किमिदानीं अरण्यहृते विचारयति।

(३१) महाभाग यदि मालत्याः सम्बोधनं, तदाधवेन उद्दिश्य तत् एवं व्याख्येयम्।

(३२) उत्तरार्धेन वसन्तविलकृत—त्वमिति। हे वत्सलते यत्पूर्वजा अधिवसुरत्रा इति हेतोरेव कथमपि चलितेनैव अवलम्बिताः सत्य विरहदुःखेऽपि विवशाः आशा जीविते येन तथाभूतः, अयं जनः प्रायो हि दिवसान् सद्य दर्शनात् एतावद्दिनानि अदर्शनात्, संवत्सरशतसमयमेव चलितप्राणधारणोऽसीति शेषः। तथाच तत्पूर्वजानामदर्शनेऽपि जीवनधारणदर्शनात् परत्रापि तवैवाल जीवनधारणी सर्वथा वर्तिष्यतीति भावः। अत एव चाधवसङ्गमस्य विरहविनाशकत्वस्य (अतश्च कल्पभूताया मुक्तमालतीलतायाः प्रेक्षिणी) अतस्त्व तवापि मम च एव प्रकाशः अनुग्रहः आशाया प्राप्त सन्तु माधव एतत्सम्बन्धं सम्पादयतु, आवयोः अभीष्टाय चिराय फलन्तु सफलाः सन्तु।

अथ चतुर्थसर्गे मालतीमाधवसर्गे प्रथि तत्रभवतो माधवकामन्दकीप्रभावाद् उभयदर्शनोत्कः। मकरन्दनिजकाङ्क्षन्।

(४) सखे। हृदयेऽपि खलु यदि (हृदयं यदि खलु स्थाने इति हेतोः)

(३२) सखे! महाभाग! तथा माधव याहा बलिताछे, ताहा सत्य।

(३०) "तुमि ईहार प्रति अनुरक्त" एই कारणেই যে কেবল অতিকষ্টে জীবন ধারণ করিয়া (তোমাকে পাওয়ার আশায়) মাধব এতদিন অতিবাহিত করিয়াছে সত্য। অতএব বিবাহসম্বন্ধারী তোমার পাণিগ্রহণরূপ অনুগ্রহ লাভ করিয়া মাধব পরম আনন্দ উপভোগ করুক, আমাদের মনোরথ চিরকালের জন্য সফল হউক।

माल। [स्वगतम्।] हा हदी! हदी हदस्मि, कण्णाअण-विरुद्धं किम्पि एसा उवक्खदि। (स)

प्रविश्य कामन्दकी। पुत्ती! कादरे! किमेतत्?। (४४)

मालती। (कम्पमाना कामन्दकीमालिङ्गति) (४५)

(स) हा! हा धिक्! हा धिक्! हतास्मि, कन्यकाजनविरुद्धं किमपि एषा उपक्षपति।

अप्रतिहतं अप्रतिरुद्धं स्वीकृतमिति यावत्, स्वयंग्रह एव अध्यवसितपूर्वत्वयकृतालिङ्गनसमये स्वयं कृतमेतदौद्यत्योधारणमेव साहसं येन तथाभूतोऽयं जनः माधवी इदानीं करग्रहणे एतत्कर्तृकत्वपाणिग्रहणे किं विचारयति युक्तायुक्तत्वं वितर्कयति? न किमपीत्यर्थः। या स्वयमेव कृतावधीरणमालिङ्गितवती, तस्या माधव्या इदानीमेतत्कर्तृकपाणिग्रहणे न किमपि विचारणीयमस्तीति स्वयमेवायं निःसङ्कल्पया पाणिं ग्रहीष्यतीति भावः।

(स) हा धिक् हा धिगिति विषादे विकल्पः। एषा स्वयङ्करा कन्यकाजनविरुद्धं कुल-कन्याविपक्षं किमपि प्रस्तौति। तथाङ्गीकृतालिङ्गनस्य कन्यकाजनविरुद्धत्वेऽपि स्वयङ्कराधमर्णेनैव कृतत्वात् कथञ्चित् सुखहेतुं, परन्तु प्रायेण पितृप्रभृतयोऽनेनैतदङ्गीकर्तुं न प्रभवन्तीति भावः।

(४४) प्रविश्य कामन्दकीति, पाठेति शेषः। पुत्रीत्यनेन यत्र यत्राप्यपरिचलने प्रदाने च मनाग्यत्नाधिकार इति व्यज्यते। कातरे। पितृभ्यामनुमोदितमिदं कथमङ्गीकुर्या-मिति मङ्गातङ्किनमानसे! एतत्पाणिग्रहणानुमोदनधैर्यं किं कथं करोषीति शेषः। कथञ्चिद्दैवानुकूल्यादुपनतेऽवसरे मनु धैर्यं न युक्तमिति भावः।

(४५) (तथा. माधव्याः शिरसं चौद्यात्प्रदेशं सञ्चरन्त्या उत्तोल्य)।

(स) সব।. মহানুভব! যে মালতী ক্ষণকাল পূর্ব্বেই নিজবক্ষে স্বয়ং ইহার বক্ষোধারণরূপ সাহস স্বীকার করিয়াছে, সে এখন পাণিগ্রহণ বিষয়ে কি বিচার করিবে? (অতএব নিঃশঙ্কভাবে ইনি নিজেই মালতীর পাণিগ্রহণ করিতে পারেন)।

(স) মাল। (স্বগত) হা ধিক্!! হা ধিক্!!! আমি হত হইলাম, (অর্থাৎ আমার সবগই শ্রেয়ঃ) নবমিকা কুলকন্যাকাঞ্চনের বিষবৃক্ষ পিতাদি গুরুজনের অননুমোদিত পাণিগ্রহণের কথা বলিতেছে।

(৪৪) কাম। (প্রবেশ করিয়া) বৎসে! কাতরে! এই পাণিগ্রহণা-নুমোদনে ধৈর্য্যবিলম্ব করিতেছ কেন?

(৪৫) (মালতী কাঁপিতে কাঁপিতে কামন্দকীকে আলিঙ্গন করিল)

काम। (सर्वाभिलक्षम् उपसृत्य) भगवन्!

पुरश्चक्षुर्गच्छादनु मनसोऽनन्यपरता,
तवज्ञानिर्यत्र त्वयि मम भवत्येव च तव।
युवा सोऽयं, प्रेयानिह सुवदने! मुग्ध जहताम्
विधातुर्वैदग्ध्यं विलसतु, सकामोऽस्तु मदनः॥ (४६)

लव। भगवदि! कसणचउद्दसीरअणीमसाणमग्गरुक्खणिक्खित्त-समन्नअसाअणिट्ठाविअचण्डपासअण्डपअण्डदोहण्डसाहसो साहसिओ वहु एसो, अहो मे विम्हअहो उवट्ठिदा। (६)

---

(६) भगवदि! कृष्णचतुर्दशीरजनीश्मशानमार्गवृक्षनिखातसमवसायनिष्ठापितचण्ड-पाशकप्रकण्डदोर्दण्डसाहसः साहसिकः खलु एषः, अहो मे विस्मयो वर्तते इति।

---

(४६) पुर इति। यत्र भगवत्यां त्वयि यत्र च भगवति तव पुरः अग्रतः चक्षुषां नयन-वीतिः, अनु अनन्तरं मनसश्चित्तस्य अनन्यपरता अनन्यविषयता एकाग्रतेति यावत्, ततश्च तद्-ध्यानात् कालान्तरात् कालक्रमशरीरसंगमात् तवमम्। अयं स प्रेयान् तव प्रियतमः युवा माधवः इह अत्र स्थाने उपस्थितः इति शेषः। अत एव हे सुवदने! जहतां कार्याकार्य-विमूढतां मुग्ध परित्यज। जहतां परित्यज्य निःसङ्कोचं इत्यौचेति भावः। तेन च विधातुः विधायकस्य वैदग्ध्यं सुचतुरीनिर्मितपाण्डित्यं विलसतु भवत्यां श्रीमत्यां सर्वेन विकासवताम्। मदनः कामदेव सकामः सुखी: उपभोगसमानेन पूर्णमनोरथः अस्तु भवतु।

अत्रापि चतुर्थचरणे समाजादिसमुदायावयवकचकारादेर्भागस्य गुणवत्त्वात्।

"अनीकमस्त्रसैन्यकक्रियायाः वर्त्मनि स्त्रियः" इति वर्त्मवत्त्ववचनात् भगवति अनीकत्वमारोपः, भगवत्प्रभुतायां चक्षुरागादीनां समनन्यविषयैकक्रियायाः वर्त्मनि मार्गसमुच्चयोक्तिः, "मुख

---

(४६) काम। (मालतीर চিত্রক উদ্ঘাটিত করিয়া) সেই মাধবের তোমাতে ও সেই মাধবে তোমার প্রথমে নেত্রপ্রীতি তৎপরে চিত্তের একাগ্রতা ও তৎপরে শরীরসঙ্গম হইয়াছিল। সেই প্রিয়তম যুবা মাধব এস্থানে উপস্থিত। অতএব হে সুবদনে! তুমি কর্তব্যাকর্তব্য চিন্তা পরিত্যাগ কর। অর্থাৎ নিঃসঙ্কোচে ইহাকে বরণ কর। (পরে জনান্তিকে) বিধাতার নির্মাণপাণ্ডিত্য বিকাশিত হউক ও কামদেব সফলকাম হউক।

मक। [स्वगतम्।] साधु लवङ्गिके! साधु. अवसरे खलु अनुरागोपकारयोर्गरीयसोः उपन्यासः।

माल। हा तात! हा अम्ब! (च)

(च) हा तात! हा अम्ब!

जडतामिति माकार्थस्य चतुर्थचरणप्रतिपाद्यवाक्यार्थस्य प्रति हेतुत्वात् वाक्यार्थहेतुकं काव्यलिङ्गालङ्कार इति तेषां संसृष्टिः। भिन्नपरिच्छेदत्वम्॥

(छ) क्षणचतुर्दश्यीरजन्यां (क्षणचतुर्दशीसम्बन्धिनीं तस्यामेव साहसिककर्मानुष्ठानस्य तत्कालाविच्छिन्नत्वादन्धकारातिशयार्थमिति मन्तव्यम्) श्मशानसञ्चरणेन करालायतनालिकाश्मशानप्रदेशपरिभ्रमणेन निर्व्यूढैः मालतीदानाशयात्सम्पादितः विषमव्यवसायः महान्तं साहसिकं व्यापारं निवारितवान् अतः अतिशयेन दुःसाहसी, अनेन मालत्या माधवस्य निरतिशयानुरागः सूचितः) तथा निषादितं निवारितं चण्डघण्टस्य दारुणनिर्विवेकक्रियानुष्ठायिनः कापालिकापसदाधोरघण्टस्य प्रचण्डदोर्दण्डयोः भीषणबाहुदण्डयोः साहसं मालतीबलिदानात्मकातिसाहसकर्म येन स तादृशः। (अनेन मालत्या जीवनरक्षात्मको महान् उपकार उक्तः) (अनयोर्भिन्नविषयौ-द्यमरविशेषणत्वविवक्षया कर्मधारयः) एष माधवः साहसिकः खलु। अतः अस्य प्रचण्ड-साहसिकत्वादेतोः मे प्रियसखी मालती उत्सङ्गिता अनेन पापिष्ठदृष्टे भयात् रक्ष्यमाणा। प्रचण्डसाहसिकपुरुषात् सर्व्वथैव भयं युक्तमित्याशयः। तथाच श्मशानसेवे साहसप्राय-रक्षानिरपेक्षसाहसिकत्वस्य प्रत्यक्षीकृतत्वया 'अस्य प्रियसखी' अनेन पापिष्ठदृष्टे भयविह्वलता सर्व्वथैव युक्तेति माधवं प्रति सम्बोधिन्याजेन माधवस्य साहसमनुरागमुपकारञ्च आरभ्यमाणा परमचतुरया लवङ्गिकया साहसानुरक्तेनोपकारकेण च माधवेन पापिष्ठदृष्टे विप्रलब्धव्यादरेणापि न कर्त्तव्ये ति मालत्यै निवेदितमिति मन्तव्यम्।

(ज) अवसरे समुचितक्षणे, गरीयसोः अतिमहतोः, उपन्यासः उक्त्यापनम्।

(ছ) মক। ভগবতি! ইনি (একমাত্র মালতীলাভের প্রত্যাশায়) কৃষ্ণ-চতুর্দ্দশী রজনীতে শ্মশানে ভ্রমণ করিয়া মহাবীর বিকটরূপ বিষমব্যাপার সম্পাদিত করিয়াছেন ও প্রচণ্ড পাষণ্ড অঘোরঘণ্টের বাহুদণ্ডের মালতী বলিদানরূপ সাহসিক কর্ম্ম নিবারিত করিয়াছেন; সুতরাং অতিশয় দুঃসাহসী, এই জন্যই (ইহাকে বরণ করিতে) প্রিয়সখী কাঁপিতেছে।

(জ) মক। (স্বগত) সাধু লবঙ্গিকে! সাধু। উপযুক্ত সময়েই তাদৃশ মহদনুরাগ ও উপকারের উপন্যাস করিয়াছ।

काम। वत्स माधव! (४८)

माध। आज्ञापय। (४९)

काम। इयम् अशेषसामन्तमस्तकोत्तंसपरागरञ्जितचरणाङ्गुलेः अमात्यभूरिवसोः एकम् अपत्यरत्नं मालती, भगवता महेश्वरसंयोगरसिकेन वेधसा, मन्मथेन, मया च, तुभ्यं प्रदीयते। [इति रोदिति।](५०)

मक। फलितं हि मन्तर्हि भगवतीपादप्रसादेन। (५१)

(क) हा तात हा वर्म इति, युवयोः सकलत्रिभुवनैकमान्येन कुलकलङ्कापनयनविरुद्धमाचरणं कृत्वा पुनर्मुखं दर्शयिष्यामीति शेषः। तथाच विचारं त्वदनीतेव माधवपार्श्वितरूपस्य सर्वथा स्थिरीकृतेति व्यज्यते।

(५०) कामेति। अशेषाणां निरवशेषाणां सामन्तानां चक्रिणीकृतभूपतीनां ये मस्तकोत्तंसाः शिरोऽवतंसतां प्रतापपुष्पाणीति यावत्, तेषां परागैः रजोभिः रञ्जितौ चरणाङ्गुली यस्य तथाभूतस्य। (एतेनास्याः परमैश्वर्यशालिकन्यात्वं सूचितम्) अपत्यरत्नं अनुकरणीयगुणशालाकल्पत्वात् रत्नमिवापत्यम्। तथाच परमैश्वर्यशालिनीऽपत्यत्वात् शिरीषस्यात्यन्तसुकुमारत्वात् कामाजनकत्वात् सौन्दर्योद्रेकगुणसम्पन्नत्वाच्च ममतोऽपि सालम्बनादरस्यया करणीय इति भावः। भगवतः योगरसिकेन योगसम्भोगशालिनिदेवशालिना वेधसा विधिना (तेनैव प्रथमं सृष्ट्यादौ निर्मितत्वादिति भावः) मन्मथेन कामेन (तेनैव तदनन्तरमनङ्गादुभयोर्निरतिशयासक्तिजनकत्वादिति भावः) मया च (तदनुगुणसौन्दिकप्रयत्नकरणादिति भावः) तुभ्यं प्रदीयते। सम्प्रदानस्य विशेषकरत्वादीनां परिचिन्तनमेव विरतिप्रयत्नात्तस्यमाशिष्या साहस्यात्तीयस्याः कामन्दकाः शोकहेतुः।

(क) मान। हा! तात! हा! मातः। (তোমাদের অগ্রে কুল-কলঙ্ককালনবিরুদ্ধ এইরূপ আচরণ করিয়া কিরূপে মুখ দেখাইব)

(৪৮) কাম। বৎস মাধব!

(৪৯) মাধ। আজ্ঞা করুন।

(৫০) কাম। যাহার চরণাঙ্গুলি সমস্ত অধিকৃত নৃপতিগণের মস্তকালঙ্কার পুষ্পপরাগে রঞ্জিত হয়, তাদৃশ অমাত্য ভূরিবসুর একমাত্র কন্যা মালতীকে প্রথমে বিধাতা তৎপরে কামদেব ও তৎপরে এই আমি তোমায় অর্পণ করিতেছি। (কামন্দকী রোদন করিতে লাগিলেন)

माध। तत्किमिति वाष्पायितं भगवत्या ?। (५२)

काम। [चीवराञ्चलेन नेत्रे परिमृज्य।] विज्ञापयामि कल्याणिनम्। (५३

माध। ननु आज्ञापय। (५४)

काम। परिणतिरमणीयाः प्रीतयस्त्वद्विधानाम्
अहमपि तव मान्या हेतुभिस्तैस्तैश्च।
तदिह सुवदनायां तात! मत्तः परस्तात्-
परिचयकरुणायां सर्व्वथा मा विरंसीः॥ (५५)

---

(५१) तर्हि माधवाय मालत्या दाने निष्पन्ने, कथितं सञ्जावकञ्चुकेन भूतम् (भावे क्तप्रत्ययः)।

(५२) वाष्पायितमिति "वाष्पादिभ्य ऊष्मणि" इत्याख्यत्वाद्वाष्पशब्दाद्भावे क्तप्रत्ययेन निष्पन्नम्। तथाच वाष्पोद्गमनं कृतमित्यर्थः।

(५३) कल्याणिनं पूज्यत्वात्सदं त्वां विज्ञापयामि वाष्पोद्गमनमनिमित्तमिति शेषः।

(५४) परिणतीति। हे तात! पुत्र। (पुत्रे पितरि पूज्ये च तातशब्दः प्रयुज्यते इति शब्दार्णवः)। (पुत्रत्वेन सम्बोधनं वात्सल्यातिशयद्योतनार्थम्) त्वद्विधानां त्वादृशानां नाना-सद्गुणसम्पन्नानां पुरुषाणां प्रीतयः यस्मिन् कस्मिंश्चिदपि अनुरागाः परिणत्या परिपाकेन रमणीयाः मनोहराः क्षमयः एव हृदयानन्दप्रदा इति यावत्, भवन्तीति शेषः। अहमपि तैस्तैश्च तैस्तैश्च तव पित्रा अपरैश्च सद्भाग्यादित्वादिभिः हेतुभिः निमित्तैः मान्या माननीया अनतिक्रमणीयवच-नेति यावत्। तत्तस्मात् मत्तः परस्तात् परवर्त्तिनि समये मयि परोक्षतां गतायामित्यर्थः, इह अस्यां सुवदनायां मालत्यां परिचयः गाढप्रणय एव करुणा कृपा तस्याः सकाशात् मा विरंसीः

---

(५१) मकः। তবে ভগবতীর পদপ্রসাদে আমাদের পক্ষ সফল হইল।

(५२) माधः। তবে ভগবতী অশ্রুমোচন করিতেছেন কেন?

(५३) कामः। (চীবরাঞ্চলে নেত্র মার্জ্জন করিয়া) কুশলাস্পদকে (তোমাকে) জানাইতেছি।

(५४) माधः। আজ্ঞা করুন।

(५५) कामः। হে বৎস! তোমার ন্যায় নানা সদ্গুণসম্পন্ন পুরুষের অনুরাগ পরিণতিতে রমণীয় (অর্থাৎ ক্রমশঃ দৃঢ়) হইয়া থাকে। তোমার

इति पादयोः पतितुमिच्छति। (५६)

माध। [निवारयन्।] अहो! वात्सल्यादतिक्रामति प्रसङ्गः। (५७)

श्राध्यान्वयेति, नयनोत्सवकारिणीति,
निर्व्यूढसौहृदभरेति गुणोज्ज्वलेति।

विरतो भावुः। सर्व्वदैव त्वयाऽहं गाढप्रणयेन भवितव्यमिति भावः। शिरसीति "शाङ्-परिभ्यो रम" इति परस्मैपदम्।

अत्र द्वितीयार्द्धवाक्यार्थं प्रति मयमार्द्धवाक्यार्थहेतुत्वेनोपन्यासात् वाक्यार्थहेतुकं काव्यलिङ्गं सङ्कीर्य्यते। एवं "विद्या ह्यादृतदेवता"मिति स्वरूपात् द्वितीयपादे गाढप्रणयत्वस्य। मालिनीवृत्तम्।

"यद्यात् साधु विधिस्तथा संयमधनानुर्वोः कुरङ्गीदृशः" इत्यादि माकन्दस्वरूपीकरणावदस्यानुरूप इत्यनुसन्धेयम्।

(५६) अनिर्व्वर्णनीयातीवप्रणयातिशयं पादपतनेच्छायां हेतुः।

(५७) निवारयन्निति पादौ किञ्चित् पश्चात्पतन्यं हस्तधारणादिनेत्यादिः। वात्सल्यात् वैशारद्यातिशयात् प्रसङ्गः अनुरोधप्रकारः अतिक्रामति औचित्यमतिक्रम्य वर्त्तते। सर्व्वजनार्त्तोपकारणमात्रे पुनरनुरक्तस्य मम पादधारणोद्योगः सर्व्वथैवानुचित इति भावः।

(५८) श्लोकद्वयं अनुरोधप्रकारीकर्त्तुमाह—श्राध्येति। इयं मालती श्राध्यान्वया श्रमलसंयमा इति हेतोः, नयनयोः शैलयोः उत्सवकारिणी निरुपमसौन्दर्य्यावलम्बिनी इति

पिता ও পতিরই সহাধ্যায়িত্বাদিকরণে আমিও তোমার বরণীয়া। অতএব আমার পরোক্ষেও এই সুবদনা বালতীর প্রতি সর্ব্বপ্রকারে গাঢ়প্রণয়রূপ করুণায় বিরত হইও না।

(५७) (এই কথা বলিয়া পায়ে পড়িতে উদ্যত)

(५७) মাধ। (* নিবারণ করিতে করিতে) আহা! বাৎসল্যবশতঃ অনুরোধপ্রকার ঔচিত্যকে অতিক্রম করিতেছে।

(५८) এই বালতী সুসংযতা, নিরুপম সৌন্দর্য্যবশতঃ নয়নের আনন্দদায়িনী,

---

* ক্বচিৎ পুস্তকে "মদনবতি" ইত্যধিকং প্রযোজ্য মকরন্দ এবায় শ্লোকস্য বক্তৃত্বেন নির্দ্দিষ্টঃ।

एकैकमेव हि वशीकरणं गरीयो
गुणाकर्षमेवमियमित्यय किं ब्रवीमि ? ॥ (५८) *

काम। वत्स माधव। (५९)

माध। आज्ञापय। (६०)

काम। स्वीक्रियतामियम्। (६१)

माध। स्वीकरोमि। (६२)

ऽतो:, निर्व्याजः सम्यक्: स्नेहभरः प्रकर्षातिशयः यस्या तथाभूता इति हेतोः, गुणैः लज्जाशीलत्वादिसद्गुणैः उज्ज्वलता उद्भासिता इति हेतोश्च, अथ गुणार्थं सर्वलोकगौरवान्वितायास्तव एवं ईदृग्वात्सल्यानुग्रहभाजिनी इति हेतोश्च किं ब्रवीमि, अस्याः विषये वयस्य किं प्रकाशयामि, अतःपरमस्य विषये वक्तव्यं नास्तीत्यर्थः। हेतुमि. समर्थयति—एकैकमित्यादिना। हि यस्मात् एकैकमेव निरुक्तलज्जाध्यात्वयत्वादिषु अन्यनिरपेक्षं एकं एक एव गरीयः गुरुतरं अनुग्रहणीयमिति यावत्., वशीकरणं एतद्वशतासम्पादकारणं, तथाच येषामेकैकमेवानुग्रहणीयं तेषां सर्वेषामतिक्रमेण कथमपि न सम्भवतीति भावात्र विषये किमपि वक्तव्यमिति भावः।

अत्र मालत्या प्रथमानुग्रहविषये वक्तव्याभावं प्रति लज्जाध्यात्वयत्वादीनां वक्तव्यं हेतूनामुपन्यासात् समुच्चयः, तृतीयचरणार्थेन पुनरुक्तसमर्थनादर्थान्तरन्यासस्यालङ्कारः। एवमग्रेऽपि समुच्चयार्थकचकारादेरनुपन्यासान्न पुनरुक्तदोषः। तथा "गुणानां कीर्तनं यत्तु तदेव गुणकीर्तनम्"मिति दर्पणलक्षणात् गुणकीर्तनं नाम नाटकम्। वक्ष्यतिलक्षणमस्य।

(६१) इयं मालती स्वीक्रियतां भार्यात्वेनाङ्गीक्रियतां। तथाच "गुरुं प्रदीयते" इत्यनेनैव दानं अनेन च तत्स्वीकरणमनुरोध इति मन्तव्यम्। क्वचित् पुस्तके ५९, ६०, ६१, ६२, संख्याविशिष्टांशो न दृश्यते।

সম্পন্নানুরাগ ও লজ্জা শীলতাদি নানাবিধ গুণে উদ্ভাসিতা, বিশেষতঃ আপনার এরূপ বাৎসল্য ও অনুগ্রহের পাত্রী, অতএব ইহার প্রতি প্রণয়াতিশয় বিষয়ে আমি আর কি বলিব ? কেননা পূর্ব্বোক্ত লজ্জাশীলতাদি এক একটিই গুরুতর বশীকরণের হেতু।

(৫৯) কাম। বৎস মাধব ! (৬০) মাধ। আজ্ঞা করুন।

(৬১) কাম ইহাকে ভার্য্যা করিয়া গ্রহণ কর।

काम। वत्स माधव!

माध। आज्ञापय। (६४)

काम। वत्से मालति! (६५)

सव। आणवेदु भअवदी। (क)

काम। प्रेयो मित्रं बन्धुता वा समग्रा,
सर्वे कामाः श्रेयधिर्जीवितञ्च।
स्त्रीणां भर्त्ता, धर्मदारश्च पुंसाम्
इत्यन्योऽन्यं वत्सयोर्ज्ञातमस्तु ॥ (६६)

(क) आज्ञापयतु भगवती।

(क) माधवसन्निधौ कामन्दकीवाक्यश्रोतरप्रदाने मालत्या लज्जया तूष्णीभावाद्भगवतिकया सङ्कुचितप्रदानमित्यनुसरन्ती।

(६६) प्रेय इति। स्त्रीणां भर्त्ता पतिः तथा पुंसां पुरुषाणां धर्मदारः धर्मपत्नी च प्रेयो मित्रं प्रियतमः सखा, समग्रा सकला बन्धुता बन्धुसमूहश्च (शाकपार्थिवादित्वात् समूहार्थे तल्) सर्वे कामाः मानसाभिलाषाः (कामयन्त इति कामाः कमेरिच् घञ्) तथा श्रेयधिः (निधिर्नौ श्रेयधिरित्यमरः) किं बहुना जीवितं जीवनञ्च, इति इदं वत्सयोः परस्परानुरक्तयोर्भाजनयोर्युवयोः (युवामुद्दिश्य वाक्यमे" इत्येकशेषः, "वर्तमानसामीप्यवचनयोः क्तक्तवतू" इति वर्तमाने क्तः) अन्योन्यं परस्परं ज्ञातं विदितं अस्तु भवतु। तथाच श्रुतः यमुद्दिश्य त्वया माधवेन प्रियतमनिजभावेन सकलबन्धुसमूहेन सर्वेकामनाविषयत्वेन निधित्वेन किं बहुना स्वकीयजीवितरूपेण भाजनत्वेनोक्तोऽसौ, तथा समादरणीया च। त्वया च मालत्या वेन तेनैव भावेन माधवः समाद्रियतां समादरणीयश्चेति भावः।

अत्र परस्परानुरक्तयोरित्यनेन पारस्परिकत्वादन्योऽन्यशब्दः, किञ्च ज्ञातमस्त्वित्यनेन विधिलिङ्मनोरथादिभावेन बहुवः।

(६२) माध। ग्रहण करिलाम।

(६३) काम। वत्स माधव! (६४) माध। आज्ञा करुन।

(६५) काम। वत्से मालति! (क) सव। भगवती आज्ञा करुन।

(६६) काम। स्त्रीलोकेर स्वामी ओ पुरुषेर धर्मपत्नी प्रियतम मित्र, समस्त बन्धुसमूह, समस्त कामनार विषय, परम निधि ओ जीवनस्वरूप। इहा तोमादेर परस्परेर परिज्ञात हউक। अर्थात् इहा येन तोमादेर मने थाके।

मक। अथ किं। (६७)

लव। भगवदि! जधा तुम्हे आणवेध। (ख)

काम। वत्स मकरन्द! त्वमनेनैव वैवाहिकेन मालतीनेपथ्येन प्रसाधितः, परिणायय आत्मानम् [इति पटलकमर्पयति।] (६८)

मक। यदाज्ञापयति भगवती, यावदिदश्चिचजवनिकामन्तर्धाय नेपथ्यं धारयामि। [तथा करोति।] (६९)

(ख) भगवति! यथा यूयं आज्ञापयथ।

"उपदिष्टं मनोज्ञादि वाक्यं आम्नानुसारतः" इति दर्पणलक्षणादवोपदिष्टं नाम नाटकलक्षणम्। आलिनीऽसम्। तल्लक्षणम्—"मा वो गो चेव्वालिनी वेद लोवे" रिति।

"धन्यूखल (गुदन् कुल विषसङ्गोऽति' सपर्यायोगे" इत्यादिसाम्नलक्षणोऽयमनुदात्तो भवति इत्यनुसन्धेयम्।

(६७) लक्ष्मणा सापवस्य तूष्णीम्भावं परिलक्ष्य मकरन्द एव तन्नेपथ्यमङ्गीकरोति, अथ किमिति। भगवत्या यदुक्तं तदनेनाङ्गीकृतमित्यर्थः।

(६८) वैवाहिकेन विवाहसम्बन्धिना विवाहकालये मालतीपरिणयाय तत्प्राप्तयेत्यर्थः, मालतीनेपथ्येन मालतीवेषसम्पादकवस्त्राभरणादिना प्रसाधितः मालतीरूपेण सज्जितः सन्नीतमालतीवेषं इत्यर्थः, आत्मानं परिणायय उद्वाहय, प्रतारयापत्ये नन्दनमिति शेषः, वस्तुतस्तु मालतीवेषेण नन्दनं प्रतार्य मदयन्तिकामिति शेषः। पटलकं परिच्छदं (अथ-पटलं पिटके च परिच्छदे इति मेदिनी) दैवयोगादनुष्ठाने मकरन्दसाहसे तु मदयन्तिकालाभलोभ-एव प्रधानतः कारणमित्यभिप्रायेणैव। "व्याप्ति प्रासङ्गिकं वस्त्रं पताकेत्यभिधीयते" इति लक्षणादिह प्रारब्ध मकरन्दविवाहकर्मणः पताकालाभाऽयम्।

(६९) इतः अस्मात् सन्निहितैकपार्श्वादानीयेति शेषः, चित्रयवनिकां चित्रपटनिर्म्मितां

---

(६७) मक। ईशाके आर वक्तव्य कि अवश्यई स्वीकार्य।

(ख) लव। भगवति! आपनि याहा आज्ञा करिलेन, ताहाई हइबे।

(६८) काम। वत्स मकरन्द! तुमि एই मालतीर वैवाहिक वस्त्रालङ्कार द्वारा मालतीरूपे सज्जित हइया निजेर विवाह सम्पादन कर। (एই कथा बलिया परिच्छद अर्पण करिलेन)।

माध। भगवति! शुभमपि बहुनर्थम् अतिसङ्कटम् इदं वयस्यस्य। (७०)

काम। आः कस्त्वमस्यां चिन्तायाम्?। (७१)

माध। एवं भगवतो एव जानाति (७२)

[प्रविश्य मकरन्दः। विहसन्।] वयस्य! मालती अस्मि।
[सर्वे सकौतुकं पश्यन्ति।] (७३)

विरञ्जरिणौ चलचक्षोव मदयौनो अस्य च मध्ये विलम्बिनौ विषाद सञ्चारिणौ भूलेखे;। अथवा स्रोजनसरिणौ पुरस्तादनवस्तुस्रोजनोचितबन्धपरिहारे शुभाय भवत्वादिति भाव:।

(७०) इदं मालतीवेशेन नन्दनप्रवेशरूपपुरःसरमदयन्तिस्रोपयमनं शुभमपि बहुनर्थं अनेकविघ्नविशिष्टहेतुत्वं "शुभमबहुनर्थं"मिति पाठे तु शुभाभावहेतुविपत्तिसन्निधेः। अतिसङ्कटं अतिदुरवापनीयम्। तथा "अबहुज्ञानं न सुकृतया सङ्गं रोचत इति भाव:।

(७१) अथो इदं बहुनर्थं अतिसङ्कटमतः कर्तव्यं नवेत्यादिरूपायां चिन्तायां तं कः को नैवाधिकारीत्यर्थः। शुभाय भद्रतामद्रत्वयोचित्यवशाच्च भवेत् खलिष्यति विघ्नवत्या विघ्नपातसम्भावनातिरोधानोपायपरिकल्पनायेति भाव:।

(७२) एवं तचिन्तायां सर्वाधिकारी मालतीति सूर्यः। सर्वत्रैव मालतीमिति शेषः। जानातीति, एतादृशबहुज्ञाने दक्षमकरं वा भवेदिति शेषः। तथाच सर्वत्रैव मालतीवेशे सदैव भवतीति भाव:।

(७३) अस्मिन्नेति। "स्त्रीवेशधारिणा पुंसा नाट्ये सर्वं विगूढक"मिति दर्पणकारवचनादेव विगूढकं नाम नाट्यालङ्कारश्च। यथा "कपटं मायया यत्र छद्मसन्दर्शनादिभाजने" इति साहित्यदर्पणात् कपटं नाम नाट्यालङ्कारश्च।

---

(७०) मकः। ভগবতী যাহা আজ্ঞা করিলেন তাহাই হইবে। তবে মন্দির-পার্শ্ব হইতে বস্ত্রনির্ম্মিত তিরস্করিণী আনিয়া তাহা আপনাদের ও আমার মধ্যে বিলম্বিত করিয়া বস্ত্রাদি পরিধান করি। (তাহাই করিল)

(৭০) মাধ। ভগবতি! মালতীবেশে নন্দনকে বঞ্চিত করিয়া মদয়ন্তিকার পাণিগ্রহণ বয়স্যের পক্ষে শুভ হইলেও বহু বিপত্তিসঙ্কুল ও অতি দুঃসাধ্য।

(৭১) কাম। আঃ এ চিন্তা করিবার তুমি কে?

(৭২) মাধ। তাহা ঠিক। শুভ কি অশুভ হইবে তাহা ভগবতীই জানেন।

माध। [मकरन्दं परिष्वज्य, सोपहासम्।] भगवति। कृतपुण्य एव नन्दनो, यः प्रियामीदृशीं मनसा मुहूर्त्तमपि कामयिष्यते। (७४)

काम। वत्सौ मालतीमाधवौ! इतो निर्गत्य कुसुमगहनेन गम्यताम् उद्वाहमङ्गलार्थम् अस्मद्विहारिकायाः पर्यादुद्यानवाटः, सुविहितं च तत्रैव वैवाहिकं द्रव्यजातम् अवलोकितया। भूयश्च (७५)

गाढ़ोत्क्रथकठोरकोरकघनग्रैवेयकोच्चैः कुचै-
ताम्बूलीपटलैः पिनद्धफलितव्यानम्रपूगद्रुमाः।

---

(७४) यः ईदृशीं परमसुन्दरीं प्रियां मनसा "न तु कायेन" मुहूर्त्तमपि "न तु बहुक्षणं" कामयिष्यते कामवासनाविषयीकरिष्यते, स नन्दनः कृतपुण्य एव, पुण्यकर्म्मणा विना ईदृक्सुन्दरप्रियायाः इयं मनसा कामवासनाविषयीकरणमप्यसम्भवमिति भावः। एतेन मकरन्दकृतवैदग्ध्यात्तस्यातीव नैपुण्यं सूचितम्।

पताकास्थानकमिदं द्वितीयं परिकीर्तितम्॥"

(५१) कथासङ्कटसङ्कर्षकमालत्यपहारस्तेन बाधाद्दे प्रधानव्यापारस्यानीप्सार्थे बाधोऽयं निर्दिष्टः। क्वचित् पुस्तके "मालत्यपहारोनामे"त्यत्र एव मासीति।

इति काव्यसर्कतीर्थोपनामक-श्रीकृष्णविद्यारत्नसिद्धान्तमहाचार्यकृतायां सत्त्वबोधिनीसमाख्यायां मालतीमाधवव्याख्यायामष्टमाङ्कविवृतिः समाप्ता।

---

(५०) अर्थ। (चिन्তা করিয়া আত্মগত) আমাদের প্রিয়সখী মালতী ভগবতী কামন্দকীর ভবনেও যাইতে পারে। কিন্তু জীবনধারণ করিয়া আসিবে

नवमोऽङ्कः ।

ततः प्रविशति सौदामिनी । (१)

सौदा । एषास्मि सौदामिनी, भगवतः श्रीपर्वताद्उत्पत्य पद्मावतीमुपाश्रिता, मालतीविरहिणः संश्रुतप्रदेशदर्शनासहिष्णोः स्थानं परित्यज्य, सह सुहृद्वर्गेण इहद्वीपोद्यानलक्षान्तारप्रदेशं परिभ्रमतो साधवस्याधुनान्तिकमुपयामीति । भोस्तद्याहमुत्पतिता, यथा सकल एव गिरिनगरग्रामतरुविदरलक्ष्यतिकरयत्नेन परिक्षिप्यते । (१)

[एवाहिलोक्य ।] साधु साधु । (२)

---

(१) तत इति । सौदामिनी तन्नाम्नी सत्ययोगवला काचित् कामन्दकीशिष्या ।

(२) स्वयमेव स्वपरिचयं ददाति—एषास्मीति, या खलु कामन्दकी परमावश्यकं योगशिक्षामापादिता सा सौदामिन्यस्मीत्यर्थः । तदाह कामन्दकीपरमसुहृदात्मदत्त मालवस्योपजातवैमनस्यं यतिष्यमाणमिति भावः । सिद्धस्थानत्वेन दिव्यात्मकतया श्रीपर्वतस्य भगवत इति विशेषणम् । उत्पत्य योगबलेनाकाशे गत्वेत्यर्थः । पद्मावतीं तदभिधानामधेयां राजधानीं उपाश्रिता प्राप्ता । संश्रुतः मालत्या सह विहरणेन परिचितः यः प्रदेशः तस्य दर्शनासहिष्णोः

कि না এ বিষয়ে আমি শঙ্কিত হইতেছি। কারণ ভ্রাত্রাদিবান্ধব মিত্র ও কলত্রাদি প্রিয়জনের সঙ্গমলনিত সুখ প্রায়শঃই বিঘ্নাধিক্যের ন্যায় চঞ্চল হইয়া থাকে।

(সকলের প্রস্থান)

(৫১) মালতীমাধবের "মালতাপসার"নামক অষ্টম অঙ্ক সমাপ্ত।

---

(১) (তৎপরে (কামন্দকীশিষ্যা) সৌদামিনীর প্রবেশ)

(২) সৌদা। (কামন্দকী যাহাকে পরম আগ্রহের সহিত যোগশিক্ষা দিয়াছিলেন) আমি সেই সৌদামিনী। ভগবৎশ্রীপর্বত হইতে যোগবলে

पद्मावती विमलवारिविशालसिन्धु-
पारासरित्परिकरच्छलतो विभर्त्ति।
उत्तुङ्गसौधसुरमन्दिरगोपुराट्ट-
संघट्टपाटितविमुक्तमिवान्तरीक्षम् ॥ (२)

विन्ध्यवलेयाद्रीपकलया ईषत्प्राचमस्त, स्थानं तत्संस्कृतप्रदेशं, मुहुर्हर्षेण मकरन्दमुखात्मीय-समूहेन, हृद्रोणो नदीविशेषः तया उपलक्षितो यः शैलः पर्वतः तस्य कान्तारो दुर्गमार्गः तदात्मको यः, प्रदेशः स्थानं तं। उपयमिक-मालवीहस्तालम्बेन परिस्खलनाय गच्छन्ति। भो इति विस्मये। तथा तेन प्रकारेण, उत्पतिता ऊर्द्धं उत्थिता, गिरिः पर्वतः नगरं देवतायतनप्रासादापणादिसङ्कुलं वसतिस्थानं, यानः "तथा गुरुजनप्रायः सुखसिद्ध-क्रमीवृत्ता। ये नीपयोगभूमध्यं वसति गाससङ्गिता ॥ "उत्तुङ्गसौधः, सरित् नदी, परखं वनं, तेषां व्यतिकरः समूहः, परिविष्यते सुस्पष्टं विलोक्यते, भवेति शैवः। एतेन परिनिसोच्च-शैलोत्पतनं सूचितम्। पद्मावतीसमुत्कर्षदर्शनजनितहर्षातिशयो ध्वनितः। साधुसाधिति पद्मावतीसमुत्कर्षदर्शनजनितहर्षातिशये विस्मितिः।

(२) पद्मावतीति। पद्मावती नदभिधानेयं नगरी, विमलानि निर्मलानि वारीणि जलानि यत्रीदृशयाभूतयोः विशालयोः विस्तीर्णयोश्च सिन्धुपारासरितोः सिन्धुपारानामकनद्योः व्यतिकरच्छलतः परिवेष्टनरूपसम्पर्कव्याजेन उत्तुङ्गानां उन्नतानां सौधानां राजप्रासादानां सुरमन्दिराणां देवतायतनानां गोपुराणां बहिर्द्वाराणां अट्टानां अट्टालिकानां संघट्टेन पर्वतेन पाटितविमुक्तं यादौ पार्टितं विदारितं पश्चात् विमुक्तं त्यक्तमित्यर्थः (खातानुलिप्तवत् समासः) अन्तरीक्षं गगनमिव विभर्त्ति धारयति। समुन्नतप्रासादादिभिर्विदार्य्य निपातितः गगनमेव नदीद्वयद्वयेन परियतं परिक्षयात इति भावः।

अत्र वाच्या सापह्नवा क्रियोत्प्रेक्षा वाचकाभावः, वस्तुतिरङ्गं द्वयम्।

আকাশমার্গে উঠিয়া পদ্মাবতীনামক এই রাজধানী প্রাপ্ত হইয়াছি। মালতী-বিরহী মাধব মালতীর সহিত বিচরণে পরিচিত স্থানের দর্শনে অসহিষ্ণু হইয়া সেই পরিচিত স্থান পরিত্যাগ করতঃ বৃহদ্রোণীনামক নদীসংস্পৃষ্ট পর্ব্বতের দুর্গম পথপ্রদেশে পরিভ্রমণ করিতেছে (মালতী বৃত্তান্ত দ্বারা শান্ত করিবার জন্য) তাহারই নিকট সম্প্রতি যাইতেছি। অহো!! আমি সেই প্রকার উঠিয়াছি—এ প্রকারে এই সমস্ত পর্ব্বত, নগর, গ্রাম, নদী ও অবধানপূর্ব চক্ষু দ্বারাই স্পষ্টরূপে দেখিতেছি। (পশ্চাদ্দিক অবলোকন করিয়া) সাধু সাধু।

अपिच—सैषा विभाति लवणा सलिलोर्मिपङ्क्ति-
रत्नागमे जलनिधेरमृतादिव यस्याः ।
गौरम्बिकेव प्रियनर्मनखक्षतानां
सेयोपकण्ठविपिनावलयो विभान्ति ॥ (४)

[अन्योऽपवोक्ष्य ।] न खलु भगवत्याः सिन्धोरीरितरसालव-
स्रोतसः । (५)

---

(४) सैषेति । सरिता, स्त्रीरूपता, तरङ्गितकेशत्व, तरङ्गसमूहरूप वस्त्रान्दोलनता या प्रकटिता तया तरङ्गितकेशान्ता सदृशिमाना सती विभातीति विरोधः । परिहारपक्षे सैषा दृश्यमाना इति योजना, जलनिधेः समुद्रात्सकाशात् अमृतादिव यस्याः सिन्धोः सकाशात् रत्नागमे रत्नप्राप्तौ सत्यां, कीदृशीनां ("बहुव्रीही सर्वनाम्नः" इति सूत्रेण कच्-प्रत्ययः) तासां प्रियाः सखीजनसम्बन्धिन्यो नर्मोक्तयो ये नखक्षतचिह्नानि तेषां सादृश्यं बिभ्रति धारयति तादृश्यो विभान्ति ("सदृशैरीक्षा सादृश्यं बिम्बप्रतिमादिषु" इत्यमरेण सादृश्यवाचक कृत्रिमशब्द:) जलस्य सैवात् सम्बन्धिसम्बन्धेन सीकाया सेयमित्यत्र जलसम्बन्धिविपिनावलय, निकटस्थितवनसमूह इव विभान्ति विरोधः ।

अत्र सैषेति सखीजनस्य सम्बन्धिनी या वस्त्रान्दोलनरूपा तरङ्गितकेशत्वरहिता न विद्यते विरोधः परिहारपक्षे सैषा दृश्यमाना इति योजना । सदृशीत्यादि पूर्ववत् ।

(५) अन्यत इति । क पूजार्हा चिरं, एषा दर्शनीयतरङ्गा, अन्यतः सौधवेलावर्त्ये-

---

(८) स्त्रीजनोचित एই সকল কেশতরঙ্গ বস্ত্রান্দোলন বিরহিত কিন্তু এবং সাদা সাদৃশ্য সরিৎসম্বন্ধিনী তরঙ্গিতকেশত্ব সম্পন্ন রত্নপ্রাপ্তির সেবাসন্নিধি বর্ত্তিনী ও অট্টালিকার বর্হিদেশ বিলম্বিত ও নবীনতাযুক্ত আলাপকারী সেন বারণ করিতেছে।

(৫) অপিচ এই লবণনামক সমীপ বিরাজমান আছে, সেই সমীপ তরঙ্গ-সমূহ অত্যন্ত মনোহর, এবং রত্নাকরের অর্থাৎ সোমদেবের প্রিয় নূতন উদয় (কৃপাবিশেষ) আলাপকারী সখীজনের সেবনীয় যাহার সমীপবর্ত্তী বনসমূহ প্রাণবল্লভ-দিগের আনন্দার্থ বিরাজমান।

(৬) (অন্তরিক অবলোকন করিয়া) এই সেই কৃপাবিস্তারকারী অন্যবর্ত্তী সিন্ধু নদীর তরঙ্গসমূহ [সৌধবেলাবর্ত্ত হইতে নিপতন]।

यत्रत्य एष तुमुलो ध्वनिरम्बुगर्भ-
गम्भीरनूतनघनस्तनितप्रचण्डः।
पर्य्यन्तभूधरनिकुञ्जविजृम्भितेन
हैरम्बकण्ठरसितप्रतिमानमेति॥ (६)

एतायन्दनाम्बकर्णसरलपाटलप्रायतरुगहनाः परिणतमालूर-सुरभयोऽरण्यगिरिभूमयः स्मारयन्ति खलु तरुणकदम्बजम्बूवना-वनद्धान्धकारगुहनिकुञ्जगभीरगह्वरोद्दारगोदावरीरवमुखरितविशाल-मेखलाभुवो दक्षिणारण्यभूधरान्। (७)

गाङ्गिन्याः सिन्धोः तद्गामकमध्या, दारितं विपाटितं रसातलं भुवः खरूपं येन तथाभूतः ("रसा विश्वम्भरा स्थिरा" इति "धरःखरूपयोरुद्दीपन" मिति च धरणिः) तटात् शैलतट-प्रदेशात् प्रपातः प्रस्खलनिपतनं।

(६) यत्रत्य इति। यत्रत्यः यत्रतटप्रपातप्रतिताम्बूनि जलानि गर्भे यस्य तथाभूतः अत एव गम्भीरः गभीरशब्दवाची यो नूतनघनः नवीनजलधरः तस्य स्तनितवत् गर्जनवत् प्रचण्डः विशालः एषः आकर्ण्यमानः तुमुलः सङ्कुलः ध्वनिः यत्रः पर्य्यन्तभूधराणां प्रान्तस्थित-शैलानां निकुञ्जेषु लतादिपिहितोदरप्रदेशेषु विजृम्भणेन प्रतिध्वनिरूपाद्गहिर्गमनेन हैरम्बकण्ठ-रसितस्य गजाननकण्ठगर्जितस्य प्रतिमानं साम्यं एति लभते।

अत्र प्रथमार्द्धे समासोक्तिः श्लेषानुप्राणिता, चतुर्थचरणे पुनरर्थौ समासोक्तिश्लेषयोः सङ्कीर्णत्वेन सङ्करः। वसन्ततिलकावृत्तम्।

(७) एता इति। एताः परिदृश्यमानाः, चन्दनार्जुनकर्णसरलपाटलप्रायाः सुरभिचन्दनादिवृक्षाः तरवो यत्र तथाभूतं गहनं वनं यासु तथाभूताः, तथा परिपक्वैः सुपक्वैः फालपूर्णैः विश्वफलैः सुरभयः सुगन्धयुक्ताः अरण्यगिरिभूमयः वनशैलप्रदेशाः, तदुपरि

---

(६) जलपूर্ণতাবশতঃ গম্ভীরধ্বনিযুক্ত নূতন মেঘের গর্জ্জনের ন্যায় যাহার সেই তটপ্রপাতধ্বনিত এই তুমুলধ্বনি প্রান্তস্থিত পর্ব্বতনিকুঞ্জে প্রতিধ্বনি দ্বারা বৃদ্ধিপ্রাপ্ত হইয়া গজাননের কণ্ঠগর্জ্জনের সাদৃশ্যলাভ করিতেছে।

(৭) চন্দন, অর্জ্জুন, সরল ও পাটলনামক বৃক্ষসমূহ বনশালী ও পরিপক্ক বিল্বফলের গন্ধযুক্ত এই পরিদৃশ্যমান অরণ্যপর্ব্বতভূমিসমূহ যাহাদের বিশাল নিতম্বপ্রদেশ নূতন কদম্ব ও জম্বুবনসমূহ অন্ধকারে বিশালবৎ প্রতীয়মান নিকুঞ্জ

अयञ्च मधुमतीसिन्धुसङ्गमेदपावनो भगवान् भवानीपतिः अपौरुषेय-प्रतिष्ठः सुवर्णबिन्दुः इत्याख्यायते। प्रणम्य—(८)।

जय देव भुवनभावन! जय भगवन्नखिलवरद! निगमनिधे!।
जय रुचिरचन्द्रशेखर! जय मदनान्तक! जय जगदादिगुरो! (९)

(सप्रणाममभिनीय)

नवीनेन तदन्यजम्बुवनेन पवनद्वः सूर्यादिकिरणावरीधेन संवृद्धः यः अन्धकारः तेन गुहः विभावलेन प्रतीयमानः निकुञ्जः लतादिपिहितोदरस्थानं यत्र तथाभूते गभीरगह्वरे दुरवगाह-गुहाया उदगारः प्रवाहप्रवेशात् समुत्थितैर्यस्य तथाभूतेन गोदावर्याः तदभिधानसुप्रसिद्धतया दर्शय निनादेन सुखरिताः अन्धायमानाः विशाला विसारिण्यः नैसर्गासुरः निसर्गप्रहृष्टाः यैवा तपोधनान् दक्षिणारण्यभूधरान् दक्षिणप्रदावस्थितवलयवर्तिपर्वतान् आरण्यन्ति। एतत्पर्वत-प्रतिप्रदर्शनेन एतत्तद्वहदक्षिणारण्यपर्वतान् अवलोकयेः।

अत्र सहृदयहृदर्शनेन सहृदयसुखरणात् अरण्यावहारः। तल्लक्षणं यथा दर्पणे—"सहृदयानुभवाहसुखुतिः अरणमुच्यते" इति।

(८) अथेति। मधुमती सिन्धोश्च सङ्गमस्थानं पवित्रं सङ्गमस्थानं पावयति अधिष्ठानेन पूतं करोतीति तथोक्तः, अपौरुषेया पुरुषैरासम्पादिता प्रतिष्ठा यस्य सोऽयं अनादिप्रतिष्ठ इत्यर्थः, अयं भगवान् भवानीपतिः शिवः सुवर्णानां बिन्दवः यत्र, स सुवर्ण-बिन्दुः इति हेतुना आख्यायते अभिधीयते। एतल्लिङ्गोपरि सुवर्णकणानां स्थाने स्थाने विद्यमानत्वात् "सुवर्णबिन्दु"रिति सार्थकनामायं प्रसिद्ध इत्यर्थः।

अत्र भवानीपतिशब्देन भवान्याः पत्यन्तरप्रवीतिकारित्वात् "सुवर्णेऽपि भवानीश" इत्यत्रैव विरुद्धमतिमात्रादोषः।

(९) शिवं स्तौतुमाह—जयेति। हे भुवनभावन! भवदुत्पत्तिहेतो! तथाच भवदुत्पत्तेरपि हेतुत्वात् सर्वा प्रत्यपि दया वितरेत्यभिप्रायः। अखिलानां समस्तभक्तानाम् वरं

युक्त गभीर गुहाय समुत्थित गोदावरी नदीर शब्दे मुखरित, ताहृश दक्षिणारण्य-वर्ती पर्वतसमूह स्मरण करिये तेछे।

(८) मधुमती ओ सिन्धुनदीर सङ्गमस्थानके पवित्रताकारी अनादिप्रतिष्ठ एই भगवान् महादेव "सुवर्णबिन्दु" नामे अभिहित। (नमस्कार करिया)

(९) हे देव! चतुर्दश भुवनोत्पत्ति हेतो! हे भगवन्! हे समस्ताखिलविहितवरदानकारिन्! हे वेदादिशास्त्रनिचयेर आश्रय! हे

अयमभिनवमेघश्यामलोत्तुङ्गमानु-
र्मदमुखरमयूरोन्मुक्तसंसक्तकेकः ।
शकुनिप्रवलनीडानोकहस्निग्धवर्ष्मा,
वितरति सुहृदस्मा पर्वतः प्रीतिमक्ष्णोः ॥ (१०)

अपिच— दधति कुहरभाजां यत्र भल्लूकयूना-
मनुरसितगुरूणि स्तन्यानमध्वक्तानि ।

अभिनवितार्थं ददातीति तथोक्तः । नमाद्यभिप्रायेणा सुक्तिं दातुमर्हतीत्याशयः । शिवमालां वेदादियाज्ञार्थां शिवे । आधारः । तथाच मम याज्ञीयप्रलापेऽपि दीक्षेति भावः । रुचिरः मनोज्ञः चन्द्रः शीतरे चूडायां यस्य तथोक्तः । मदनान्तक । कामविनाशक । तथाच मदादि कामभावं समूलं विनाशयेत्याशयः । आदिगुरुतत्र सृष्ट्यादौ ब्रह्मणोऽप्युपदिष्टत्वादिति भीष्मम् । तथाच नामप्युपदिशेत्याशयः ।

अत्र साभिप्रायविशेषणानां प्रयुक्तत्वात् परिकरालङ्कारः । आर्यावृत्तम् ।

(१०) अयमिति । अभिनवैर्नूतनैः मेघैः, जलधरैः श्यामलः श्यामवर्णः उत्तुङ्गा उन्नताः मानवः एकदेशा यस्य तथाभूतः, मदेन मत्ततया मुखराभिः शब्दं कुर्वतीभिः मयूरीभिः मुक्ताः परित्यक्ताः हृता इति यावत् संसक्ताः सम्मिलिताः केकाः स्वकीयशब्दाः (केका वाणी मयूरस्यै-त्यमरः) यत्र तथाभूतः, तथा शकुनिभिः नानावर्णपक्षिभिः शबलितैः कर्बुरितैः नीडानोकहैः कुलायवृक्षैः स्वावासतरुभिरिति यावत्, स्निग्धं वर्ष शरीरं यस्य तथाभूतः, एवं सहृदो विशालाः श्मानः शिलाः यस्य तथाभूतः, अयं परिदृश्यमानः पर्वतः अक्ष्णोर्नयोः प्रीतिं सुखं वितरति यच्छति । सज्जनोचितधर्मस्तत्रादिति भावः । मालिनीवृत्तम् ।

(११) दधतीति । अत्र पर्वते कुहरभाजां गह्वरवासिनां भल्लूकयूनां युवक-

---

मनोहर चन्द्रचूड ! हे कामविनाशक ! हे जगदादिगुरो ! (मादृशजनेष्व त्तिभाव पूरण करिया) तुमिई जयलाभ कर ।

(१०) (गमनेर अन्तिम करिया) याहार साणु (प्रदेश) नूतन मेघेर न्याय श्यामवर्ण ओ उन्नत, मदमत्त मयूरीगण याहाते थाकिया केकाध्वनि करितेछे, याहार शरीर नानावर्ण पक्षिकर्तृक (पक्षीर निवास वृक्ष द्वारा चित्र) एवं याहार प्रस्तरसमूह अत्यन्त वृहत्, तादृश एই परिदृश्यमान पर्वत नेत्रेर प्रीति-वितरण करितेछे ।

गिरिरकटुकषायः स्तायते शल्लकीना-
मिभदलितविकीर्णग्रन्थिनिष्यन्दगन्धः ॥ (११)

[ऊर्ध्वमवलोक्य ।] कथं मध्याह्नः, तथाहि अत्र सम्प्रति

काश्मर्य्याः कृतमालमुद्गतदलं कोयष्टिकष्टीकते,
तीराश्मन्तकशिञ्चितचुम्बितमुखा धावन्त्यपः पूर्णिकाः ।

मङ्कानां (बलातिरेकेण यौवन एव अनेहौर्बल्यसम्भवात्सूत्कारमयौग इति नापुरुषदोषः) अस्फुटितानि सन्निहीवशब्दाः मङ्कानां स्वाभाविका सूत्कारशब्दा इत्यर्थः, (अस्फुटितं सन्निहीवनिस्वनः) अनुरणितेन प्रतिध्वनिना गुहासु स्थूलानि सन्ति स्थानं इति दधति धारयन्ति । अथा मङ्कलीना गजाधिरूढसादिभिरोषां शीतलस्पर्शः कटुः कटुरसः कषायः सुरभिश्च (कटुतिक्तकषायाश्च शीतेऽपि शल्लकीपत्रेण इति हलायुधः) इभैर्गजैः दलिता खण्डिता विकीर्णा. अतएव विचित्राश्च ये ग्रन्थयः सन्धिप्रदेशाः तेषां निष्यन्दस्य चरित्ररसस्य गन्धः स्वायते इति प्रतीयते, सर्वतः प्रसरतीत्यर्थः । अत्र गन्धे गिरिरकटादिकुमारीव्यतिरेकेण गन्धत्वम् ।

अत्रास्फुटितस्थानं प्रति 'अनुरणितगुहासु हेतुत्वेनोपन्यासात् पदार्थहेतुकं काव्यलिङ्गमलङ्कारः । मालिनीवृत्तम् ।

अत्रच स्त्रीको महावीरचरितोत्तररामचरितयोरभ्यविरुद्धः परिलक्षयति इति सङ्गच्छत कविरत्नेति मन्तव्यम् ।

(१२) काश्मर्य्या इति । कोयष्टिकः (कोका इति प्रसिद्धः) पक्षिविशेषः, काश्मर्य्याः गम्भारीपादपात् (गम्भारी सर्व्वतोभद्रा काश्मरी मधुपर्णिकेत्यमरः) पतद्गतानि अचिरप्रवृत्तानि दलानि पलाशि यस्य तथाभूतं क्षतमालं आरग्वधापरपर्य्यायं द्रुमविशेषं आरग्वधोऽथ व्याघ्रः क्षतमालस्तथार्गल इति हलायुधः) टीकते गच्छति । आतपतप्तच्छायाक्रान्तो यो विरलपत्रो गम्भारीवृक्षं परित्यज्य बहुलसलपत्रावृतं क्षतमालवृक्षं गच्छतीति भावः । तीराश्मन्तकानां

---

(११) এই পর্ব্বতে গহ্বরবাসী ভল্লুক যুবকদিগের সন্নিষ্ঠীবনশব্দ (অর্থাৎ স্বাভাবিক ফুৎকারশব্দ) প্রতিধ্বনি দ্বারা স্থূলতর হইয়া বৃদ্ধিলাভ করিতেছে । এবং শীতল কটু ও সুরভি গজকর্ত্তৃক দলিত ও ইতস্ততঃ বিক্ষিপ্ত শল্লকীর সন্ধিস্থানবিগলিত রসের গন্ধ বৃদ্ধি প্রাপ্ত হইতেছে ।

(১২) (ঊর্দ্ধে অবলোকন করিয়া) এই যে মধ্যাহ্ন কাল উপস্থিত, অতএব সম্প্রতি—

दात्यूहैस्तिनिशस्य कोटरवति स्कन्धे निलीय स्थितम्,
वीरुद्दौड्रकपोतकूजितमनुक्रन्दन्त्यधः कुक्कुभाः ॥ (१२)
तद्भवतु माधवमकरन्दावन्विष्य, यथाप्रस्तुतं साधयामि। (१३)

इति निष्क्रान्ता (षष्ठविष्कम्भकः।) (१४)

तीरस्थितवीरणाली (कालावकेऽस्थिरछायामग्नजलो वीरणोऽपि येति वरिः) त्रिषिषु त्रिषासु (त्रिषिः त्रिषा सप्तमेद इति विश्वः) पूर्णितं सदपवाय संघं सुखं यासां तथाभूताः पूर्णिकाः नासाच्छिद्रौसंज्ञकपक्षिविशेषाः (नासाच्छिद्रात्तु पूर्णिकेति विश्वः) अधो वारिणि शाखासि दीर्घतराः अवलम्बार्थमतिदूरं अवलम्बीये यच्छन्तीत्यर्थः। दात्यूहैः कालकण्ठाख्यपक्षिविशेषैः (दात्यूहः कालकण्ठक इत्यमरः) तिनिशस्य शीसुवृक्षस्य इषविशेषस्य (तिनिशो स्यन्दनोनेमौ रथदारुसिसुवृक्ष इत्यमरः) कोटरवति पक्षिवासोपयुक्तछिद्रयुक्तेति स्कन्धे शाखायां (अथो शाखाऽस्त्री स्कन्धः स्यात्प्रशाखाशाखिनोरित्यमरः) निलीय विश्रम्य कोटरमध्ये लीनेमूर्त्वा स्थितम्। तथा कुक्कुभाः दात्यूहकाकतिपक्षिविशेषाः अधः अधोदिशि अवतिष्ठमानाः वीरद्दौड्रेषु वीरणालीषु ■ कपोतादेर्यां कूजितं शब्दस्तत् एवं अनुक्रन्दन्ति सवासादनुकृत्य शब्दं कुर्वन्ति।

अत्र प्रथमार्द्धे ऋक्षे कालुप्तमाः, चतुर्थपादे इत्यनुप्तमाः, एवं सप्ताक्षरमतिपादनरूपत्वात् प्रति पदमो वारत्रयानुप्रवेशात् वृत्त्यनुप्रासालङ्कार इत्येषां परस्परनैरपेक्ष्येण सङ्करः। शार्दूलविक्रीडितं वृत्तम्।

(१३) प्रस्तुतं प्रस्तावितं अवतिष्ठमानं वर्तमानं तथा प्रस्तुतं परिसमाप्यमाणं माधवाभिलषितमकरन्दनिमित्तं, साधयामि सम्पादयामि।

(१४) विष्कम्भकलक्षणाय "स्यात् परिदेवे"त्यादिना इतिकर्तव्यार्थाय "माधवमकरन्दा-

---

कोटरीक नामक (कोड়া) পক্ষী (পত্রभुक्) শাখাযুক্ত বৃক্ষ হইতে পত্রশাখী আয়গ্রুহ বৃক্ষে যাইতেছে। নাসাচ্ছিদ্রীনামক পক্ষী দীর্ঘতর শিখায় খুব সংলগ্ন করিয়া জলের দিকে যাইতে হইতেছে। কালকণ্ঠক নামক পক্ষী তিনিবৃক্ষের কোটরযুক্ত কাণ্ডে বিলীন হইয়া অবস্থান করিতেছে। এবং কুক্কুভপক্ষী অধোদেশে থাকিয়া সরোবরস্থিত নীড়নিবাসী কপোতাদিগের অব্যক্ত ধ্বনির অনুসরণ করিয়া শব্দ করিতেছে।

(১৩) হউক, তবে এখন মাধব ও মকরন্দের অন্বেষণ করিয়া প্রস্তাবিত কার্য্যের সম্পাদন করি, অর্থাৎ সাধনা করিবার জন্য তাহাদের নিকটেই যাই।

ततः प्रविशति माधवो मकरन्दश्च। (१५)

सकरुणं निश्वस्य।

मक। न यत्र प्रत्याशामनुपतति नो वा रहयति,
प्रविच्छिन्नं चेतः प्रविशति च मोहान्धतमसम्।
अकिञ्चित्कुर्वाणाः पशव इव तस्या वयमहो
विधातुर्वामत्वादिपदि परिवर्त्तामह इमे॥ (१६)

वन्दिये" त्यादिना। भाविकथायत्र च निदर्शनात् सङ्कीर्णत्वं सन्देष्टकादिति मन्तव्यम्।

(१५) न यत्रेति। चेतः चञ्चलं मनः (कर्तृ) यत्र विपदि प्रत्याशां मालतीप्राप्ति-विषयिणीमाशां न अनुपतति न अधिरोहति, अनेकान्वेषणेऽपि तदप्राप्तेरा अध्यवसायादिति भावः। नो वा रहयति मालतीप्राप्तिप्रत्याशां न वा परित्यजति, दुरतिक्रमत्वादस्या दितीऽपि परित्यक्तुमशक्यत्वादिति भावः। (परन्तु) प्रविच्छिन्नं मालतीलाभार्थनातीव चञ्चलं सत् नीह एव किङ्कर्त्तव्यताविमूढतयैव अत्यन्तमतं गाढतरान्धकारं तत् प्रविशति। किङ्कर्त्तव्य-निश्चयधारयितुं न पारयतीत्यर्थः। (अहो इति खेदे) इमे वयं विधातुर्दैवस्य वामत्वात् प्रतिकूलत्वात् पशव इव (आहारनिद्रादिव्यवहारमात्रपरायणत्वादिति भावः) तस्या मालत्याः अकिञ्चित्कुर्वाणाः विपत्प्रतीकारानुरूपं किञ्चिदप्यकुर्वाणा इत्यर्थः, विपदि मालती-सम्बन्धलाभप्रतिरूपविपदी परिवर्त्तामहे तिष्ठामः। तथाच दैवप्रतिकूल्यं नैव मालत्याः किञ्चित कर्तुं वयमलमर्थाः, न तु पुरुषकारविरहादिति भावः।

अत्र चेत इत्येकजनकर्तृकत्वेन अनुपतत्यादीनामनेकक्रियाणामन्वयाद्दीपकालङ्कारः, पशव इवेत्युपमालङ्कारयोः सन्देहसङ्करः परस्परनिरपेक्षयोः संसृष्टिः। विक्रमोर्वश्यम्।

---

(১৪) সৌদামিনীর প্রস্থান। (এই অংশের নাম বিষ্কম্ভক)

(১৫) তৎপরে মাধব ও মকরন্দের প্রবেশ।

(১৬) মক। (সকরুণ নিশ্বাস ফেলিয়া) যে বিপদে আমাদের মন মালতীর প্রত্যাশা অবলম্বনও করিতে পারিতেছে না, একেবারে পরিত্যাগও করিতে পারিতেছে না, পরন্তু অত্যন্ত চঞ্চল হইয়া কিংকর্তব্যবিমূঢ়তারূপ গাঢ় অন্ধকারে প্রবিষ্ট হইতেছে। অহো দৈবপ্রতিকূলতাবশতঃ আমরা পশুর ন্যায় মালতীর কোনই উপকার করিতে না পারিয়া এই বিপদে অবস্থিত আছি।

माध। हा प्रिये मालति! क्वासि, कथमविज्ञाततत्त्वम् अद्भुततमं झटिति पर्य्यवसितासि, ननु अकरुणे! प्रसीद सम्भावय माम्। (१७)

प्रियमाधवे! किमसि मय्यवत्सला
ननु सोऽहमेव यमनन्दयत् पुरा।
अयमुदृष्टदीप्तरमणीयकाकृष्ण-
स्तव मूर्त्तिमानिव महोत्सवः करः॥ (१८)

वयस्य मकरन्द! दुर्लभः पुनर्जगति तावतः स्नेहस्य सम्भवः। (१९)

---

(१७) माधवेति। अविज्ञाततत्त्वं अनधिगतयाथार्थ्यं अतएव अद्भुततमं आश्चर्य्यतमं यथा स्यात्तथा पर्य्यवसितासि विनाशितासि।

(१८) प्रियेति। प्रियः माधवो यस्यास्तथाभूते। मालति! मयि किं किमर्थं अवत्सला स्नेहविरहिता असि। निर्निमित्तं तवेदं स्नेहराहित्यमनौचित्ययुक्तमिति भावः। हन्त स्नेहं आरोपयितुमाह—नन्विति। अहं स एव माधवः, पुरा पूर्व्वं नगरदेवतायतनात् कामन्दकीविहारिकोद्यानमकरन्दकाले इत्यर्थः, आदृष्टदीप्तं सम्यग् विधृतं अमणीयं मनोज्ञं कङ्कणं भूषणविशेषो येन तथाभूतः, मूर्त्तिमान् धृतविग्रहः महोत्सवः आनन्द इव तवायं करः पाणिः यं समनन्दयत् समनीनयत्। तथाचानुमापि दर्शनादेव मम हर्षोत्पादनं सम्भवेदेव त्वया अर्हणीयमिति भावः।

अत्र मूर्त्तिमान् महोत्सव इव कर इति वाचानुपपत्तेरुपचारः। मन्त्रभाषिणी इत्यम्।

अस्य च श्लोकस्य विनोदार्थमविकलसुन्दररामचरितप्रणेतापि परिहसन्त इत्यनुसन्धेयम्।

(१९) तावत इति तादृशपरिमितस्नेह इत्यर्थः।

---

(১৭) মাধব। হা প্রিয়ে! মালতি! তুমি কোথায়? সহসা কিরূপে অবিজ্ঞাত ও আশ্চর্য্যভাবে বিনাশিত হইলে?

(১৮) অয়ি প্রিয়মাধবে! মালতি! তুমি আমার প্রতি স্নেহরহিতা হইলে কেন? মনোহর কঙ্কণধারী মূর্ত্তিমান মহোৎসবপ্রায় তোমার এই পাণি পূর্ব্বে যাহাকে আনন্দিত করিয়াছিল, আমি সেই মাধব।

নরসকুসুমস্বামৈরঙ্গৈরনঙ্গমহাজ্বর-
শ্চিরমবিরতোন্মাথী সোঢ়ঃ প্রতিক্ষণদারুণঃ।
তৃণমিব ততঃ প্রাণান্মোক্তুং মনো বিধৃতং তথা,
কিমপরমতো নির্ব্যূঢ়ং যৎকরার্পণসাহসম্ ॥ (২০)

অপিচ। ময়ি বিগলিতস্নেহাস্মিন্নাদিবাহবিধেঃ পুরা,
বিকলকরণৈর্মর্ম চ্ছেদ্যব্যথাবিধুরৈরিব।

---

(২০) উক্তস্যার্থস্যনিশ্চিতত্ব সমর্থয়িতুমাহ—নরেতি। নরা মাদৃশা নরাস্তে সমধুনি অভিনবানীতি যাবৎ, তানি কুসুমানি পুষ্পাণি তদ্বত্তানৈঃ সুকুমারৈঃ অঙ্গৈঃ শরীরৈঃ, অবিরতোন্মাথী অনবরতোন্মথনকারী প্রতিক্ষণদারুণঃ সর্ব্বদাতিভীষণঃ ন তু সাধারণজ্বরবৎ সবিশ্রাম ইত্যর্থঃ, অনঙ্গমহাজ্বরঃ কামজ্বরমহাসন্তাপঃ চিরং বহুকাল সোঢ়ঃ মদ্বাঞ্ছিতপ্রত্যাশয়া সহ্যঃ কৃতঃ। ততঃ তদনন্তরং তদ্দানেন সহ বিবাহোদয়ৌ যতি মদ্বাঞ্ছিতপ্রত্যাশাতিগমনানন্তরনিশ্চয়ৈঃ, প্রাণান্ তৃণমিব লোকুং পরিত্যক্তুং মনশ্চিত্তং বিধৃতং নিযোজিতম্। মরণং নিশ্চিতমিত্যর্থঃ। ততশ্চ যৎকরার্পণসাহসং যস্যৈব পাণিদানসাহসং নির্ব্যূঢ়ং কৃতকৃত্যার্থা সত্যা বিলম্বাসহিষ্ণুতয়া নির্ব্বাহিতং, অতঃ অপরং ইতোধিকং কিং যেনাতিদর্পেন কথয়তীতি শেষঃ। অপরিলিতস্নেহং বিনা পূর্ব্বোল্লিখিতমপি কৃতকৃত্যার্থা সত্যা কর্তুং ন শক্নোতি ইতি সর্ব্বথৈব জগতি সাহসমেব তস্য সম্বন্ধী দুর্লভ ইতি ভাবঃ।

অস্য মধ্যমপাদে ভ্রান্তিমান্, প্রথমপাদে চ শ্লেষোপমালঙ্কারঃ; লক্ষণয়োঃ পরস্পরনিরপেক্ষয়োরেষ সঙ্করঃ। হরিণীছন্দঃ।

(২১) ময়ীতি। হে বয়স্য! মকরন্দ! অসৌ মালতী বিবাহবিধেঃ পুরা ময়া সহ সম্বন্ধে-

---

(১৯) বয়স্য মকরন্দ। তাদৃশ অপরিমিত স্নেহের সম্ভব জগতে পুনরায় দুর্লভ।

(২০) অভিনব কুসুমের ন্যায় সুকুমার-অঙ্গবিশিষ্টা এই মালতী (আমার প্রাপ্তি প্রত্যাশায়) অবিরত উন্মথনকারী ও সর্ব্বদা অত্যন্ত ভীষণ কামজ্বর বহুকাল সহ করিয়াছিল। তৎপরে আমার প্রাপ্তি প্রত্যাশা তিরোহিত হইলে তৃণের ন্যায় প্রাণ পরিত্যাগ করিতে সঙ্কল্প করিয়াছিল। তৎপরে যে স্বয়ংই পাণিদানরূপ সাহস নির্ব্বাহিত করিয়াছে, ইহা হইতে অধিক স্নেহের নিদর্শন কি বলিব?

अरसि रुदितैः स्नेहाकूतं तथा व्यतनोदसा-
वहमपि यथाभूवं पीड़ातरङ्गितमानसः ॥ (२१)
[सावेगम्।] अहो नु खलु भोः! (२२)
दलति हृदयं गोढ़ोढ़ेगं दिधा तु न भिद्यते,
वहति विकलः कायो मोहं न मुञ्चति चेतनाम्।
ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्,
प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम् ॥ (२३)

विवाहानुष्ठानात् प्राक् नयि विगलितमध्याध्यत्वात् गन्धर्वेण सह विवाहावधारणेन मदवाप्तौ सत्याम्-त्वात् मर्माच्छेदे दयादया हृदयविदारकरत्वपीड़या विधुरैः दुःखितैरिव विकलैः सत्तविषयदानविधुरैः अरसैः इन्द्रियैः उपलक्षिता सती रुदितैः रोदनैः सदा तत्प्रकारं निरतिशयनिर्भरं, स्नेहाकूतं सदियकानुरागाभिप्रायं व्यतनोत् विस्तारितवती, यदा येन स्नेहाकूतेन स्वहमपि पीड़या सदीय-व्यथानुभवजनितक्लेशेनातरङ्गितं स्वच्छं नागतं चित्तं यस्य, तथाभूतः अभूवम् इति तं आरसि विनियोगः। तथाच अयति साहसकेऽस्य सकलः सुहृज्जनः एवेयत् नासि यदाचरसीति भावः।

अत्र द्वितीयचरणे वाच्यानुक्तेर्व्याजस्तुतिः। हरिणीवृत्तम्।

(२१) सावेगमिति, सगद्गदस्वरजनितानिवर्चीकावेदेन सहितं यथा स्यात्तथेत्यर्थः। "अहो नु खलु भोः" इत्येतन्नेपथ्यविधानमूलकमध्यम्।

(२२) दलतीति। गाढ़ः हृद स्नेहः नातवतीत्यिन्नेपथ्यजनितक्लेशः एव यथाकृतं हृदयं दलति विच्छिन्नं भवति, तु किन्तु दिधा न भिद्यते विधाविभक्तं न भवति, तदालेऽपि दुःखावसान-सम्भवादिति भावः। विकलः शरीरविकलः कायः शरीरं मोहं मूर्च्छां वहति लभते, किन्तु चेतना चेतव्यं न मुञ्चति विषयं न जहाति। तदालेऽपि पुनर्दुःखानुभवसम्भवादिति भावः। अन्तर्दाहः विरहजनितान्तरौदग्र्योत्कर्षस्तापः तनूं देहं ज्वलयति सन्तापयति, किन्तु

---

(२१) हे सखे! आरम्भ यदि, आमार सहित गन्धर्वविवाह निष्पन्न हइवार पूर्वे (नवनेर सहित विवाहावधारणेर) आमार प्राप्तिप्रत्याशाय विगलदधैर्यतः मर्माच्छेदेर पीड़ाय दुःखित हइयाई येन स्वय विधुर इन्द्रियविशिष्टा एই मालती योवनद्वारा सेইरूप स्नेहाभिप्राय विस्तार करियाछिल। स्वद्वारा आमिओ तदीय यथानुभवपीड़ाय चञ्चलमना हইयाछिलाम, इहा तोमार स्मरण आछे कि?

(२२) गाढ़ उत्कण्ठाजनी आमार हृदय विच्छिन्न हইतेछे, किन्तु दुইभागे विभक्त हইतेछे ना। अधिदग्धविह्वल शरीर मूर्च्छा लाभ करितेछे, किन्तु एकेबारे

मक०। वयस्य माधव! निरवग्रहं दहति दैवमिव दारुणो विवस्वान्, दयस्व तावत् शरीरावस्था, तत् अस्य पद्मसरसः परिसरे मुहूर्तमास्यताम्। अत्र हि—(२४)

उच्चालबालकमलाकरमाकरन्द-
निष्यन्दसंवलितमांसलगन्धबन्धुः।

मज्जनात् मलीमूतां न करोति, तथालेऽपि दाहाभावेन शीतायै निर्वाणसम्पादनादिति भावः। तथा मर्मच्छेदी हृदयविदारणकारी विधिः दैवं प्रहरति प्रहारं करोति, किन्तु जीवितं जीवनं न क्षणति न विनाशयति, तथालेऽपि दुःखोपशमसम्पादनादिति भावः। तथाच मरणं विना विरहदुःखनिवारणोपायो नास्ति, मरणमपि मे न सम्पद्यत इत्याशयः।

अत्र विच्छित्तिवलीदर्शनादिदृश्यमानदहनप्रहारत्वसमारोपात् मर्मच्छेदीति विधाविशेषत्वं दैवस्य, परित्यागमलीमूतत्वविनाशरूपकार्योत्पादनसामान्यात् चत्वारो विनीलानलहारानिशाश्च मिथो नैरपेक्ष्येण संसृष्टिः। परिणीतम्।

"मनसो दाहमुत्पन्नः शमः नेह इति श्रुत" इति दर्शनात्र विद्यमानस्य विमूर्छनस्मरणम्।

अयञ्च श्लोकः "गाढोद्वेगं विधातुं मे" अत्र "गाढोद्वेगो विधातुं मे" इत्यनावश्यकेन परिवर्तितेऽपि उत्तरत्रानवरितेऽपि दहन इत्यनुषङ्गेण।

(२४) मकेति। देवं पूर्वकर्मार्जितदुरदृष्टमिव दारुणः मर्मच्छिदुरत्वाद्दारुणः विवस्वान् आध्यात्मिकः सूर्यः निरवग्रहं निर्भृतिवर्म यथा स्यात्तथा दहति त्वां सन्तापयति। दयं निजाङ्गं क्षालिसमाक्रान्तं। पद्मसरसः पद्मबहुलसरोवरस्य परिसरे तीरे मुहूर्तं कियत्समयं आस्यतां उपविश्यतां। अत्र देवमिवेति पूर्वोपमालङ्कारः, विशेषणेऽप्यत्र साहचर्यसम्बन्धे शीलतामूर्तेत्यत्र मालतीरूपमादीनः "यशोदर्शनेन शीलता"मिति दण्डिवचनात्।

चैतन्य परित्याग करिते पारितेछे ना। विरहजनिताभ्यन्तर शोकसन्ताप शरीर सन्धारित करितेछे, किन्तु एकेवारे क्षयीभूत करितेछे ना। एवं सदय विनाशनकारी विधि प्रहार करितेछे, किन्तु एकेवारे विनाशित करितेछे ना।

(२४) मक। वयस्य माधव! दैवेर न्याय दारुण सूर्य्य ओ अप्रतिबन्धे (तोमाके) सन्तप्त करितेछे। तोमार शरीरावस्था क्लान्तियुक्त, अतएव एই पद्मबहुल सरोवरेर तीरे किछुकाल उपवेशन कर, एইस्थाने—

त्वां प्रीणयिष्यति पुरःपरिवर्त्तमान-
कल्लोलशीकरतुषारजड़ः समीरः॥ (२५)

इति परिक्रम्योपविशतः। (२६)

मक। [स्वगतम्।] भवतु, एवं तावत् अन्यतः प्रक्षिपामि। [प्रकाशम्।] वयस्य माधव!। (२७)

---

(२५) उपवेशनप्रयोजनमाह—त्वामिति। यदमलानि रविकिरणप्रौढ़ोष्णजलतया सङ्कुचितानि नालानि- येषां सकाशात् ये बालकमलाकराः अविरविकरपतनसमूहाः (बालपो नियोत्पविकासानर्हेषु तु बध्यत इति मेदिनीकारः) तेषां मकरन्दनिर्भरेण मकरन्दसम्बन्धिभरेण रसभरेणेति यावत्, संवलितः विमिश्रितः यो सांसलजलः परिपुष्टसौरभं तेन बन्धुः सिनम्, तथा पुरः अग्रे परिवर्त्तमानाः दोदुल्यमानाः ये कल्लोलाः विगलत्तरोत्तरजलतरङ्गाः तेषां शीकरैः जलैः तुषारवत् हिमवत् जड़ः शीतलः (सुशीतः मिश्रिरो जरः। तुषारः शीतलः शीतो हिमः सदाम्बुसिक्तका इत्यमरः) समीरः पवनः त्वा प्रीणयिष्यति क्लान्तिनिवारणेन प्रीतं करिष्यति।

अत्र उक्तानुप्रासकेकानुप्रासौ शब्दालङ्कारौ, तथा चारोपमाणस्य बन्धुजस्य प्रकृतप्रीतकरणीयप्रयोगितया परिणामालङ्कारः, तुषारजड़शब्दयोरापातमात्रेण शीतलार्थतया शीतलत्वप्रतिभासनात् पर्य्यवसाने तु तुषारवत् हिमवत् जड़ः शीतल इत्यर्थत्वाच्च पुनरुक्तवदाभासालङ्कार इत्यनयोरङ्गाङ्गिभावेन सङ्कर इति संसृष्टिः। परिणामपुनरुक्तवदाभासलक्षणं दर्पणोक्तं यथा—

"विषयाणामयारोपो ग्रहणार्थोपयोगिनि।
परिणामो मतेस्तस्यानुक्तावधिकरणे क्रिया॥"
आपाततो यदर्थस्य शीतस्पर्शावभासनम्।
पुनरुक्तवदाभासं स भिन्नाकारशब्दकः॥" इति।

वक्तव्यमितरत्तत्र।

(२७) मकेति। एवं अनेन प्रकारेण यथाभाववाक्योपन्यासादिनेति यावत्, अन्यतः

---

(२५) ঊষিত মৃণাল ও অচির প্রস্ফুটিত পদ্মসমূহের সুগন্ধপরিমিশ্রিত পরিপুষ্ট গন্ধদ্বারা বন্ধুস্বরূপ ও অগ্রে দোদুল্যমান কল্লোলকণাদ্বারা হিমের ন্যায় শীতল বায়ু তোমাকে প্রীত করিবে।

(২৬) (পরিক্রমণানন্তর উভয়ের উপবেশন)

एतस्मिन्मदकलमल्लिकाख्यपक्ष-
व्याधूतस्फुरदुरुदण्डपुण्डरीकाः।
वाष्पाम्भःपरिपतनोद्गमान्तराले
दृश्यन्तामविरहितश्रियो विभागाः॥ (२८)

माधवः सोदेगमुत्तिष्ठति। (२९)

मकः। कथं प्रतिपत्तिशून्यमुत्थाय अन्यतः प्रस्थितः। [निःस्वस्योत्थाय च।] सखे। प्रसीद। पश्य (३०)

मालतीमतिरिक्तपक्षिणामि, प्रियवयस्यं सञ्चालयामि। मालतीविलापात् कथञ्चित् प्रधानत्वे प्रियवयस्यमन्यमनस्कं करोमीत्यर्थः।

(२८) एतस्मिन्निति। एतस्मिन् सरोवरे मदकलमल्लिकाख्यानां मदनसङ्गविभेदाभा पक्षैः पतनैः, व्याधूतानि कम्पितानि स्फुरन्ति विकसन्ति उरुदण्डानि विशालदण्डानि पुण्डरीकाणि श्वेतपद्मानि येषु तथोक्ताः, अतएव अविरहितश्रियः अपरित्यक्तशोभाः विभागाः प्रदेशाः वाष्पाम्भसां अश्रूणां परिपतनोद्गमश्च, चरणोत्पादयोः अन्तराले मध्ये एकस्य वाष्पाम्भः, परिपतनं अपरस्य चोद्गमः इत्यनयोर्भध्यसमये इत्यर्थः, (एतेनाविद्यामात्रविसर्जनं सूचितम्) दृश्यन्ताम् कथञ्चिद्विनोदनायावलोक्यन्ताम्।

अत्र दण्डपुण्डेति व्यञ्जनालाघनैकया सकृत्साम्येन छेकानुप्रासालङ्कारः। मन्दाक्रान्ता वृत्तम्।

अयमपि श्लोकः "सन्दृष्टाः कुवलयिनो भुवो विभागाः" इति चतुर्थचरणमात्रेण कृतवैषम्य उत्तररामचरितप्रथमाङ्के विस्तरेण व्याख्यातसन्धेयम्।

(२९) सोदेगमिति, मकरन्दोक्तविनोदनोपदेशेन प्रबोधोद्वेगहेतुः।

(३०) कथमिति। प्रतिपत्त्या मदभिहितार्थावबोधेन शून्यं अवधानवशादविरहितं

---

(२७) सखे। হউক, এইপ্রকার প্রিয় বয়স্যকে অন্য বিষয়ে সঞ্চালিত করি। বয়স্য মাধব।

(২৮) এই সরোবরে মদমত্ত-হংসবিশেষের পাখাদ্বারা বিকম্পিত বিকসিত ও বৃহন্মৃণাল শ্বেতপদ্মশালী এবং শোভাদ্বারা অবিরহিত প্রদেশসকল অশ্রুজলের নিপতন ও উদ্গমের মধ্যসময়ে অবলোকন কর।

(২৯) (উদ্বেগের সহিত মাধবের উত্থান)

वानीरप्रसवैर्निकुञ्जसरितामासक्तवासं पयः,
पर्यन्तेषु च यूथिकासुमनसामुज्जृम्भितं जालकैः।
उन्मीलत्कुटजप्रहासिषु गिरेरासम्ब्य सानूनिह,
प्रागृभागेषु शिखण्डिताण्डवविधौ मेघैर्वितानायते ॥ (३१)

यदा स्नात्वा सत्वाय अन्यतः प्रस्तुः अन्यस्मिन् गन्तुमारब्धः। प्रसीद मां प्रति प्रसन्नो भव। सावहित्थं मदुक्तमाकर्ण्यैत्यर्थः।

(३१) वानीरैरिति। इह अस्मिन् स्थाने निकुञ्जैः लतादिपिहितोदरस्थानैः कुञ्जविशाः सरितो नद्यः निकुञ्जसरितः (आकारार्थिबहिरङ्गत्वात्समासः) तासां पयो जलं वानीरप्रसवैः वेतसकुसुमैः (करणभूतैः) आसक्तः संभक्तः वासः सौरभं यस्मिन् तथाभूतं सत् जातं इति शेषः। पर्यन्तेषु च तासां नदीनां तटप्रान्तेषु च यूथिकासुमनसां जालकैः कोरकैः (कोरको जालकं क्लीबे कलिका कोरकः पुमानित्यमरः) उज्जृम्भितं विकसितं (भावे क्तः)। तथा मेघैः उन्मीलत्कुटजानां विकसत्कुटजकुसुमानां प्रहासिषु प्रकृष्टहासयुक्तेषु गिरेरद्रेः प्राग्भागेषु ऊर्ध्वप्रदेशेषु (प्राग्भागेत्यत्र वाऽऽदे तु शिखरेत्यर्थः) सानून् एकदेशान् आलम्ब्य आश्रयीकृत्य शिखण्डिताण्डवविधौ मयूरनृत्यव्यापारे वितानायते उपरिवर्त्तित्वेन चन्द्रातपवदाचर्यते। एतत् सर्वं विरहविनोदनार्थं पश्यन्त्यर्थः।

अत्र काव्यैक्य प्रकृते मेघे प्रकृतयुवकाना छायादिविशिष्टे समारोपे तत्कर्तृत्वानुष्ठाने उपरि वितानारोपस्य चन्द्रातपस्य व्यवहारसमारोपात् समासोक्तिरलङ्कारः, स च वितानायत इति क्यङ् गतोपमया सङ्गीर्यते। शार्दूलविक्रीडितं छन्दः।

---

(৩০) সখে! আমার কথিত বিষয়ে ধ্যান না হইতেই উঠিয়া অন্যত্র গমন করিতে আরম্ভ করিলে কেন? (নিশ্বাস ফেলিয়া ও উঠিয়া) সখে! প্রসন্ন হও, দেখ—

(৩১) এই স্থানে নিকুঞ্জসমন্বিত নদীর জল বেতসপুষ্পের গন্ধযুক্ত হইয়া বর্ত্তমান আছে। নদীর তটপ্রদেশে যূথিকাকুসুমের কলিকাসকল বিকসিত হইয়াছে, এবং মেঘসকল বিকসিত কুটজপুষ্পের প্রকৃষ্ট হাস্যবিশিষ্ট পর্ব্বতের ঊর্দ্ধভাগে সানু অবলম্বন করিয়া ময়ূরদিগের নৃত্যানুষ্ঠানে চন্দ্রাতপের ন্যায় আচরণ করিতেছে।

अपिच।

जृम्भाजर्जरडिम्बडम्बरघनश्रीमत्कदम्बद्रुमा
शैलाभोगभुवो भवन्ति, ककुभः कादम्बिनीश्यामलाः।
उद्यत्कन्दलकान्तकेतकसृतः कच्छाः सरित्स्रोतसा-
माविर्भूतशिलीन्ध्रलोध्रकुसुमश्रेणी वनानां ततिः॥ (३२)

माध। सखे। पश्यामि, किन्तु दुरालोकरमणीयाः सम्पतन्ति अरण्यभूमयः तत्किमेतत्। [सास्रम्] अथवा किमन्यत्। (३३)

---

(३२) जृम्भेति। शैलाभोगभुवः पर्वतप्रान्तवर्त्तिविस्तृतभूमिभागाः जृम्भया विकासेन (जृम्भा विकासजृम्भयोरिति विश्वः) अर्द्धपक्व विगलितदलस्य डिम्बस्य कुसुमगोलकस्य (डिम्बोऽर्द्धेऽपि च गोलके इति धरणिः) डम्बरेण च समारम्भेण (डम्बरोऽस्त्री समारम्भ इति विश्वः) घनश्रीमन्तः निबिडशोभाशालिनः कदम्बद्रुमाः नीपपादपाः यासु तथाभूताः भवन्ति। ककुभः दिशः, कादम्बिन्या मेघमालया (कादम्बिनी मेघमाला कादम्बरी च कथ्यत इति शाश्वतः) श्यामलाः श्यामवर्णाः भवन्ति। सरित् स्रोतसां नदीप्रवाहाणां कच्छाः अनूपसङ्गमभूमयः (जलप्रायमनूपं स्यात् पुंसि कच्छसमानिध इत्यमरः) उद्यद्भिः उत्पद्यमानैः कन्दलैः नवाङ्कुरैः (कन्दलः कलके काण्डे सद्यःप्ररूढसङ्घयोरिति मेदिनीकारः) कान्तान् मनोहरान् केतकान् केतकीवृक्षान् विभ्रति धारयन्तीति तथोक्ताः भवन्ति। तथा वनानां ततिः श्रेणी आविर्भूतैः उद्गतैः, शिलीन्ध्रलोध्रकुसुमैः कदलीपुष्पलोध्रपुष्पैः (शिलीन्ध्रः कदलीपुष्पे कवितिपुटकाख्ययोरिति विश्वः) श्रेणी सङ्घाता भवति। आत्मविनोदनार्थमेतान्यपि सर्वाणि पश्येत्यर्थः।

अत्र वर्षाकालवर्णनोपयुक्तेन प्रस्तुतानां शैलाभोगभूप्रभृतीनामेकसमवलक्रियाभिसम्बन्धा-दुत्प्रेक्षयोत्तिसङ्करः। तस्य च वस्त्वनुप्राणितत्वादङ्गित्वेन सङ्कीर्तिः। माईूलविक्रीडितं वृत्तम्।

(३३) पश्यामीति, तदुक्तानि सर्वाण्येव तवानुरोधादवलोकयामीत्यर्थः। सम्पति

---

(৩২) আবণ দেখ। পর্ব্বতপ্রান্তবর্ত্তী বিস্তৃত ভূমিভাগ বিকাস নিবিড়তর কুসুমগোলোকের সমারম্ভে নিবিড় শোভাশালী কদম্বদ্রুম যুক্ত হইতেছে। দিক্‌সকল মেঘমালায় শ্যামবর্ণ হইতেছে। নদীপ্রবাহের জলপ্রায়প্রদেশ উৎপদ্যমান নবাঙ্কুরে রমণীয় কেতকীবৃক্ষ সকল ধারণ করিতেছে, এবং বনশ্রেণী সমুদ্গত কদলী ও লোধ্রপুষ্পদ্বারা হাস্যযুক্তা হইতেছে।

(৩৩) মাধ। সখে! তোমার কথিত সমস্তই আমি দেখিতেছি। কিন্তু

उत्फुल्लार्जुनसर्जवासितवहत्पौरस्त्यभक्ताऽनिल-
प्रेङ्खोलत्ललितेन्द्रनीलमकलस्निग्धाम्बुदश्रेणयः।
धारासिक्तवसुन्धरासुरभयः प्रावास्त एवाधुना
घर्माम्भोविगमागमव्यतिकरश्रीवाहिनो वासराः ॥ (३४)

मालतीविरहानुभवकाले, दुरालोकाय ताः रमण्योयासे ति तदोक्तेः रमण्यो अपि कामोद्दीपनतया विरहिणो मादृशो दुःखेनावलोकनीया इत्यर्थः। अयमात्मा एतत् चन्द्रालिङ्गनालाभेन-पदार्थानामानन्दिनीदर्शनात्तेनोदाहरणं किम्? किमर्थम्? सर्वेषामिमस्य दिव्यदुष्करसानुचिन्तनेति भावः। अनुपपन्नोऽपि दुःखकरपदार्थानामेतेषां तदीयदुर्भाग्यत एव समीपवर्तित्वाद्दुःखात्मनो दुष्परिहरणीय एवेति मोक्षोदयात् सानमाह—अथवेति। अन्यत् समाधानिकरादपरं किं? किञ्चिदपि नास्तीत्यर्थः।

(३४) तदेव उक्तमेवाह—उत्फुल्लेति। उत्फुल्लैः विकसितैः अर्जुनसर्जैः अर्जुन-कुसुमसालकुसुमैः वासितः सुरभीकृतः अतएव प्रवान् पौरस्त्यः पूर्वदिक्प्रभवः यो भक्ताभिलिषितः (भक्ताभिलिषितेषे खादिति मेदिनीकारः) तदभिलषितः अनिलः भक्तानिल, मलयवायुरित्यर्थः, तस्य प्रेङ्खोलनेन चान्दोलनेन सहिता विद्युता इन्द्रनीलमकलवत् मरकतमणिखण्डवत् स्निग्धा अम्बुदश्रेणीरिव येषु ते तथोक्ताः। धारया वर्षणधारया सिक्ता आर्द्रिता या वसुन्धरा मेदिनी तया सुरभयः सुगन्धाः। तथा घर्माम्भसः ग्रीष्मवर्षयोर्यो विगमागमौ अवसानसमये तयोः, ग्रीष्मविगमस्य चात्र आगमस्य चेत्यर्थः। व्यतिकरस्ये सम्बन्धेन या श्रीः शोभा तां वोढुं शीलं येषां ते तथोक्ताः स एव मालत्या सह विरहवदुःखाभाव ये पूर्वपरिचिन्तितास्त एव वासराः दिवसाः यामाः अस्मिन् मालतीविरहसमये जाताः। तथाचात्परं किं समाधानिकरमिति भावः।

अत्र वर्षत्वरूपविशेषे वक्तव्ये यथा इति सामान्यवचनात् विशेषे सविशेषाज्ज्ञानम्। द्वितीयपादे तुल्योपमालङ्कारः। शार्दूलविक्रीडितं वृत्तम्।

এই বনভূমি বন্দনীয় হইলেও সম্প্রতি আমার দুরবলোকনীয়, অতএব আত্মচিত্তাশ্বাসার্থ এই প্রকারের উদাহরণ কেন? অথবা আমার অশান্তিকর ভিন্ন কি আছে?

(৩৪) যাহাতে বিকসিত অর্জুন এবং সালকুসুমে সুগন্ধীকৃত ও প্রবহমান পূর্বদিকের বায়ু ভক্তানুকূলে মলয়তরঙ্গিণীর ন্যায় মেঘশ্রেণী বিস্তৃত হইতেছে, আর্দ্র ও বর্ষণসিক্ত মেদিনী যাহা সুগন্ধীকৃত এবং গ্রীষ্ম-বিগমের ও

हा प्रिये मालति ! ।

तरुणतमालनीलवटुलोन्नमदम्बुधराः,
शिशिरसमीरणावधुतनूतनवारिकणाः ।
कथमवलोकयेयमधुना हरिहेतिमतीं
मंदकलनीलशष्पकलहेमखराः ककुभः ॥ (३५)

शोकार्तिं नाटयति । (३६)

मया । कोऽप्यतिदारुणो दृष्टविपाकः सम्पति मयस्यस्य । [सास्रम् ।] मया पुनर्वज्रमयेन कोऽपि विनोद आरब्धः ।

---

(३५) तरुणतमालवत् श्रीकण्ठविलम्बवत् नीलाः श्यामवर्णाः, वटुलाः वर्तुलाः उन्नमन्तः उद्गच्छन्तश्च अम्बुधराः मेघाः यासु तथोक्ताः, शिशिरसमीरणैः शीतलपवनैः अवधूताः कम्पिताः नूतनवारिकणाः नवजलबिन्दवः यासु तथोक्ताः, हरिद्धेतिमतीं इन्द्रचापवतीं; यद्वा तरुतमाल-नीलश्यामलाः नवदलसमूहाढ्या यत्रकैः, ककुभः (कस्यं ककुभोऽपि दैति विदः) तुङ्गाः प्रोद्यमानाः; ककुभः दिशः अधुना वर्षाकाले सायंनीलिरदीपनीलकान्तैः अत्र' कैश प्रकारैरिव अवलोकयेयम् मन्ये यम् । समतीवोद्दीपकतया कथमपि द्रष्टुं न शक्नुयामिति भावः ।

अत्रापि चापल्यपरिहारे 'अभिधानान्ते हेतौ'ति सप्तम्यन्तात् । हेतिमत्' नाम इन्द्रम् । "यदि भवती नाम्नो मघवतश्चापलमेतत्" इति वक्ष्यमाणम् ।

एवं "ककुभनीलकुटजे वासरे, इन्द्रगोपकैः । 'शिवजातैः सुखस्पर्शैः प्रावृट्काले प्रदर्शये"दिति विधानानुसारेण वर्षाकालवर्णनादिदं नाम नाट्यलक्षणम् । तथाचोक्तं—"दीपकालस्वरूपेण वर्णनादिदमुच्यत" इति ।

(३६) शोकार्तिं विलपेत्युपक्रमितो पीठो नाटयति शरीरकम्पादिनाभिनयति ।

वर्षा-ऋतुसंगमे सम्पर्कसहित शोकाधारणकारी सेई सकल दिवस (अर्थात् प्रियतमाप्रेमेर सहित विहरण करिबार जन्य मनोहारी सहिरेखित दिवससकल) एই प्रियाविरहकाले परिलक्ष हইতেছে ।

(३५) हा प्रिये मालति ! याहाते तरुण तमालवृक्षेर न्याय नीलवर्ण बहुदेश उन्नत हইতেছে, नूतन नवीन जलकणसम्पन्न मেघ चारिदिके उठিতেছে এবং मयूरকোলাহলে मুখরিত তাদৃশ दिक्सकल सम्प्रति आमि किরূপে अवलोकन करिब ?

(३६) (शोकसहित पीठের অভিনয়)

[निःश्वस्य ।] एवं पर्य्यवसितप्रायेव नो माधवं प्रति प्रत्याशा। [सभयं विलोक्य ।] कथं प्रमुग्ध एव ?। [आकाशे ।] सखि मालति ! किमपरं। निरनुक्रोशासि। (३७)

अपहस्तितबान्धवे त्वया विहितं साहसमस्य दैवया।
तदिहानपराधिनि प्रिये सखि ! कोऽयं करुणोज्झितक्रमः ॥ (३८)

---

(३७) मकेति। कोऽपि अनिर्वचनीयः, अतिदारुणो अतिभीषणः, दशाविपाकः अवस्थापरिणतिः। वज्रमयेन वज्रवत्कठिनहृदयेनेत्यर्थः, वयस्यस्येदमवस्थानमस्मरणादिति भावः। कोऽपि अतीवानुचितः विनोदः शोकनिवारणोपायः। (शोकोद्दीपकपदार्थानामेव शोकनिवारणोपायत्वेन प्रदर्शनादनौचित्यमिति मन्तव्यम्) पर्य्यवसितप्रायेव परिसमाप्तप्रायेव। अतःपरं लोकनिवारणस्याशक्यत्वादिति भावः। प्रमुग्ध एव अचेतन एव। किमपरमिति कथयामीति शेषः, अतःपरं यद्वक्तव्यं तत् सर्व्वमेवावशिष्यतीति भावः। निरनुक्रोशासि यः स्वजीवनतेरपेक्षेण प्रेमातिशयेन त्वा रक्षितवान्, तस्मिन् वयस्ये मदवस्थां समुपस्थितायामप्यनागमनात् सर्व्वथैव निर्दयासि। "तर्ज्जनोद्भर्त्सने क्रोशाद्युक्ति"रिति वचनादत्र "द्रुति"र्नाम विमर्शसन्धेरङ्गम्।

(३८) अपेति। अपगतौ हतः आधिपत्यं येषां ते अपहस्ताः, अपहृताः ज्ञाताः अपहस्तिताः (करोत्यर्थेऽण्णिजन्तादपहस्तशब्दात् कर्म्मणि क्तः) अपहस्तिताः अपनीताबान्धवा आधिपत्यमूढाः ज्ञाताः बान्धवाः पितृव्यादयो यया तथाभूते ! सखि ! मालति ! त्वया अस्य माधवस्य दैवया प्राक्तिवासनया साहसं विहितं स्वयमेवानार्य्यत्वात् साहसमनुष्ठितम्। तदस्मात् अनपराधिनि अपराधशून्ये अत एवास्मिन् प्रिये माधवे करुणया दयया उज्झितः विरहितः अयं अस्मिन्नासन्न-

---

(৩৭) মকরন্দ। সম্প্রতি বয়স্য মাধবের অবস্থাপরিণাম অনির্ব্বচনীয় ও অতিভীষণ। (অশ্রু বিসর্জ্জন করিতে করিতে) বজ্রের ন্যায় কঠিন হৃদয় আমি আবার অনুচিত শোক নিবারণের উপায় অবলম্বন করিয়াছি। (নিশ্বাস ত্যাগ করিয়া) মাধবের প্রতি আমাদের প্রত্যাশা এই প্রকারে পরিসমাপ্তপ্রায়। (ভয়ের সহিত অবলোকন করিয়া) একি একেবারে অচেতনই যে হইয়াছে। (ঊর্দ্ধে অবলোকন করিয়া) সখি! মালতি! আর কি বলিব? তুমি অত্যন্ত নির্দ্দয়া হইয়াছ।

(৩৮) সখি মালতি! তুমি ইহারই প্রাণিলোভে পিতৃব্যাদি বান্ধবগণের

कथमद्यापि नोच्छ्वसिति, हन्त सुप्तितोऽपि दैवेन। (३८)
मातर्मांतर्दलति हृदयं, ध्वंसते देहबन्धः.
शून्यं मन्ये जगदविरतध्वान्तमन्तर्ज्वलामि।
सीदन्मे तमसि विधुरो मज्जतीवान्तरात्मा,
विश्वङ्मोहः स्फुरयति. कथं मन्दभाग्यः करोमि ॥ (४०)

यद्यपि मकरन्दोऽपि दर्शनमात्रेणैव मम च अवस्थाटङ्कः कोटङ्कः। तथैवैतावतीयोग इति भावः।

मकरन्दस्यापि दर्शनं विनापि यत्कार्यनिर्देशव्यवहारोत्पादनौद्धत्यात् कारणात्कार्यानुद्धवाच्च कथमुच्छ्वसितीत्युक्तम्। तद्भावश्च यदा दर्शयति—

विनापि दर्शनं हेतुं कार्योत्पत्तिं यदुच्यते।
उद्धातुद्धतिनिमित्तात् सा विना परिदेवितैः ॥ इति।

सुन्दरीवचनम्।

(३८) कथमिति। कथमपि कृच्छ्रादपि, नोच्छ्वसिति चेतनो न भवति, सुप्तितोऽपि मकरन्दमात्रदर्शनमात्रव्यवहारेण मोहितोऽपि।

(४०) मम तावत् विधुरः कामन्दकीं दूतीमवस्थापयति—मातर्मांतरिति, विधुरे विवशः। मम हृदयं दलति विदीर्णं भवति। तथैव मकरन्दे हृदयस्थादर्शनेनेति शेषः। देहबन्धः शरीरसन्धिः ध्वंसते शुष्यति। जगत् भुवनं शून्यं मद्विरहितमिव मन्ये अनुमिमे। तथा अविरतं निरन्तरं ध्वान्तं अज्ञानं अन्तर्मध्ये ज्वलामि दग्धो भवामि। विधुरः मम तावत् आत्मा चेतनः 'चेतसादात्मजात्मानः' इत्यमरः इति वचनात् मज्जतीव विदीर्यत इव। तथा मोहः चक्षुषं विश्वङ् सर्वतः स्फुरयति इन्द्रियशून्यं करोति। तस्मात् मन्दभाग्यः अहं कथं किं करोमि। अत्रापि मदीयकारुण्यावस्थानिवेदितुं न शक्नोमीति भावः।

আবিষ্ট হয় কিন্তু বহু আয়াসেও কিছু বলিতে পারিতেছি না। তবে এখন এই অনঙ্গদাসী স্ত্রীর সাহায্যে করুণাদ্রচিত্ত এই রাজপুত্র কিরূপ?

(৩৯) কেন এখনও মরিতেছে না? আহা দৈব আমার সর্বস্ব হরণ করিয়াছে।

(৪০) মাতঃ! কামন্দকি! (মাধবের এই অবস্থা বর্ণন) আমার হৃদয় বিদীর্ণ হইতেছে, শরীরবিধি শিথিলতর হইতেছে। এই জগৎ যেন শূন্য

कष्टं भोः कष्टम्। (४१)

बन्धुताहृदयकौमुदीमहो, मालतीनयनपूर्णचन्द्रमाः।
सोऽयमद्य मकरन्दनन्दनो, जीवलोकतिलकः प्रलीयते॥ (४२)

हा वयस्य माधव!

गात्रेषु चन्दनरसो हृदि तारहेन्दु-
रानन्द एव हृदये, मम यस्त्वमासीः।

अत्र यूयं मन्ये इत्यभावोत्प्रेक्षा, मन्यतीवास्मरामेति वाच्यक्रियोत्प्रेक्षा, तथा "मन्दभाग्यः किं करोमी"ति वाक्यार्थं प्रति पूर्ववर्तिवाक्यार्थानां हेतुत्वात् वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कार इत्येतेषामङ्गाङ्गिभावेन सङ्करः। मन्दाक्रान्ताछन्दम्।

अयमपि श्लोकः "हा हा देवि! स्फुटति हृदयं सं'सते देहबन्धः" इति प्रथमवरीत्य ज्ञातवैधव्य उत्तररामचरितद्वितीयाङ्के परिदेवयात इत्यनुसन्धेयम्।

(४१) कष्टं दुःखं "भोः" इति तदातिदुःखद्योतकमव्ययम्। विषादे एव द्विरुक्तिः।

(४२) बन्धुतेति। बन्धुताया बन्धुसमूहस्य (वामजनेत्रादिना समूहार्थे तल्) हृदये मनसि कौमुदीमहः समतीव प्रीतिजनकत्वात् प्रीत्युत्सवस्वरूपः, मालतीनयनयोः पूर्णचन्द्रमा समतीवाह्लादकरत्वात् पूर्णिमाचन्द्रस्वरूपः, मकरन्दस्य मम नन्दनः आनन्दवर्द्धनः तथा जीवलोकस्य संसारिसमूहस्य तिलकः मूर्धन्यविशेषस्वरूपः अयं मत्पुरोवर्ती स सौजन्यादिभिः प्रसिद्धः माधवः अद्य प्रलीयते प्रियतमाविरहदुःखेन म्रियते। अहो अतःपरं किं विषादकारणमिति भावः।

अत्र निरङ्गमालाख्यमेकालङ्कारः। एवं "यः सामान्यगुणैरेकः सतुल्यानतियत्नी सत" इति लक्षणादगुणातियत्नी नाम माध्यलक्षणम्। वंशस्थछन्दम्।

मनে करিতেছি। অবিশ্রান্ত সন্তাপের মধ্যে বদ্ধ হইতেছি। ব্যাকুল অন্তরাত্মা অতিশয় অবসন্ন হইয়া যেন গাঢ় অন্ধকারে নিমজ্জিত হইতেছে, অতএব মন্দভাগ্য আমি কি করিব?

(৪১) অহো কষ্ট অহো কষ্ট!!!

(৪২) বান্ধবগণের হৃদয়ের জ্যোৎস্নার উৎসবস্বরূপ, মালতী নয়নের পূর্ণচন্দ্রস্বরূপ, জীবলোকের তিলকস্বরূপ, ও মকরন্দের (আমার) আনন্দবর্দ্ধন এই পুরোবর্ত্তী সর্ব্বজনপ্রসিদ্ধ মাধব (প্রিয়তমাবিরহে) বিলীন হইতেছে।

तत्रां निकामकमनीयमकारुड एव
कालेन जीवितमिवोदरता हृतोऽसि ॥ (४३)

सूत्रम्। (४४)

अकरुण ! वितर क्षितोज्ज्वलां दृगमतिदारुण ! देहि मे गिरम् ।
सुहृदरमनुरक्षचेतसं प्रियमकरन्द कथं न मन्यसे ॥ (४५)

---

(४३) सा वदन्ती। हा वदन्त माधव ! यत्तं (परित्यक्तवान्) मम गात्रेषु चन्दनरसं नयनयोश्चन्द्रोपलरूपं सायौ. (चन्दनेव शीतलस्पर्शत्वादिति भावः) तथा (चन्द्रोपलेत्यादि भावः) हृदि मम नयने चारविन्दुः सरसचन्द्रोपलचन्द्रः सायौ (सरसत्वाह्लादजनकत्वादिति भावः) तथा (परिचिन्त्यमानः) हृदये मनोनयनयोश्चानन्द एवासीः (न हि यदाश्रितमानन्दं इति सूत्रार्थं एव शब्दः, अत एव वर्तिष्यसे विषयाह्लादीवः) तं यदानुरूपं निकामकमनीयं मनसोऽपि रमणीयं जीवितमिव मम जीवनमिव स्थितं त्वां अकारुण्य एव अदयता अकरुणा कालेन मृत्युना हृतोऽसि अहमपि विनाशितोऽसि। माधवविरहितस्य मृतिरिव एव ममापि मरणस्यावश्यम्भावादिति भावः।

अथापि नाशाहपकाशकारः, जीवितमिवेत्युपमा चेदनयोः परस्परनैरपेक्ष्यात् संसृष्टिः। प्रथमार्धे वसन्तवर्णनीतक्रमकारस्यानभिधानादनुक्रमवदादीवः। वसन्ततिलकावृत्तम्।

(४४) सूत्रयतीति माधवकलेवरमिति शेषः।

(४५) अकरुणेति। हे अकरुण ! इदमिति विशेषेऽपि कार्यकारणयोरभिन्नत्वात्। क्षितेन दैवबलेन शुभ्रतया जीवनदायां इयं दृष्टिं वितर अर्पय, पूर्ववत् क्षितपूर्वत्वं लाभतीति दृष्टिविशेषं इह दर्शयेः। हे अतिदारुण ! अवसरप्रदाने मम जीवनदायत्वेनाभिमतायां अवधारणादतिक्रूरोऽसीभावः, क्षितोज्ज्वलां वितरं अतिदारुणं मे गिरं देहि। पूर्ववदेव मया सार्धं क्षितपूर्वाभिलाषं विधेहीत्यर्थः। हे प्रियमकरन्द ! (प्रियः मकरन्दः यस्य

---

(४३) हा वदन्त माधव ! যে তুমি আমার গাত্রে চন্দনরসস্বরূপ, নয়নে শারদচন্দ্রস্বরূপ ও হৃদয়ে সর্ব্বদাই আনন্দস্বরূপ ছিলে, পরমরমণীয় আমার জীবনতুল্য সেই তোমাকে হরণ করিয়া কৃতান্ত আমাকেও বিনাশিত করিয়াছে।

(৪৪) (মাধবের শরীর স্পর্শ করিতে করিতে)

(৪৫) হে অকরুণ ! দৈবৎ শুভ্রশোভিত দৃষ্টি নিক্ষেপ কর। হে অতি

मक। [सोच्छ्वासम्।] अयमचिरधौतराजपट्टरुचिरमांसल-च्छविर्नवजलधरः तोयशीकरासारेण मे वयस्यं जीवयति, दिष्ट्या जगदुच्छ्वसितं तावत्। (४६)

माध। तत्कथमत्र विपिने प्रियावार्त्ताहरं करोमि। [विलोक्य।] साधु, साधु। (४७)

तथाभूत।) सहचरं सखायं मां कथं चिरमये अनुरक्तचेतसं त्वां प्रति समसौहार्दानुरागयुक्त-मानसं न मन्यसे साक्षीकरोषि? तदङ्गीकारे नेत्रनीलपक्षविस्तरपक्षुत्तराग्रदानेन सम्मदे-दिति भावः।

अपरवक्त्रं छन्दः। तल्लक्षणम्—"अयुजिननरसाद्गुरुः समे तदपरवक्त्रमिदं न जीअरा"दिति।

(४६) सोच्छ्वासमिति, उच्छ्वासेन माधवस'ज्ञालाभदर्शनजनितानन्दोदयेन सह यथा स्यात्तथेत्यर्थः। अचिरधौतः सद्यः परिष्कृतः यो राजपट्टः श्यामवर्णमणिविशेषः तद्वदुचिरा रमणीया मांसला परिपुष्टा च छविः कान्तिर्यस्य तथाभूतः नवजलधरः, नूतनमेघः तोय-शीकरासारेण अत्युल्बणधारासम्पातेन, जीवयति पैवन्यमापादितवान्, (अतीतक्षणीये वर्त्तमाना) दिष्ट्या मदीयसौभाग्येन, जगत् भुवनं उच्छ्वसितं माधवस'ज्ञालाभेनोच्छ्वासं प्राप्तं। अन्यथा माधवेन सहैव जगत एवोच्छ्वासविरोधः स्यादिति भावः।

(४७) तत् कथं—केन प्रकारेण, प्रियाया भाजनायाः, वार्त्ताहरं दूतं करोमि। बहु-क्षणातिपातात् प्रियायाः सकाशे सम्प्रति तत्कुशलवार्त्तायै यथाभावप्रश्नं किञ्चित्किञ्चित् विपिने तदुपयुक्तसौकर्याभावात् कथं प्रेषयामीति भावः। विलोक्येति मेघमित्यादिः। तस्यैव दौत्यं मनसि कृत्वावदेत्याह—साध्वसाधित्रि।

माधव। আমার হাস্যবিমিশ্রিত প্রতিবচন প্রদান কর। হে প্রিয় মকরন্দ! আমাকে অনুরক্তচিত্ত মনে করিতেছ না কেন?

(মাধবের সংজ্ঞালাভ)

(৪৬) মক। (আনন্দোদ্রেকের সহিত) অচিরপরিষ্কৃত রাজপট্টকের (নীলবর্ণ মণিবিশেষের) ন্যায় মনোহর ও পরিপুষ্ট কান্তিশালী এই নূতন [মেঘ জলবিন্দুধারাসম্পাত দ্বারা আমার প্রিয় বয়স্যকে জীবিত করিয়াছে। আমার সৌভাগ্যক্রমেই জগৎ আনন্দিত হইল।

फलभरपरिणामश्यामजम्बूनिकुञ्ज-
स्खलनतनुतरङ्गानुत्तरेण स्वनन्तीम् ।
उपचितघनमाल-प्रौढ़तापिच्छनीलः,
यदयि शिखरमट्टे नूतनस्तोयवाहः ॥ (४८)

सादरमुद्दिश्य उद्भटः प्रहर्षितः। (४९)

ह्रादिक्लीव्य ! प्रियसहचरीं विद्युदालिङ्गति त्वाम् ?
आहोस्विन्नूतप्रणयसुभगाद्यातका वा भजन्ते ? ।

---

(४८) यदीति। एवमस्य स्त्रीलम्बूरसबहुल परिणामेन परिपक्वतया श्यामायां स्खलनशीलं स्खलनं प्रति उद्भटाया यो निर्झरः प्रवाहस्तस्मात् एव खण्डेन प्रवेगेन दत्तः कल्लोलोद्गारो यस्यां तां नदीं उपरि एव खण्डा उत्तरङ्गविशिष्टां यद्यपि (“यद्यपि एवोपरिवर्ती प्रवेगोत्तरङ्गखण्डोत्तरङ्गः, एवमवधार्यैव च क्रियते सौकर्यात् यद्यपि-शिखरं विशेषेण।) उपचितो वर्षोत्सवादरेण यदा यावान् संजितो यत्नतया ये प्रौढ़तापिच्छाः प्रवृद्धतमालादिवृक्षाः तद्वत् श्यामः सौन्दर्यशाली नवः; यद्वा: पर्वतस्य शिखरं यां यदति यावयते। स्वार्थे णिच् तेन यद्यति यावयतीत्यर्थः।

एष तुहीनाद्रिवाट। आह्लादीत्यम्।

(४९) हादयन्निति, आह्लादीत्यनेनैवाभ्यासस्वरसदर्शनहेतुः। उद्भटः कवीनां भटः।

(५०) ह्लादिक्लीव्येति। हे क्लीव्य! स्त्रीस्वभावत्वेन क्लीव! प्रियसहचरीं विद्युत् सौदामिनीं त्वां आलिङ्गति किं (किम् वाक्यालंकारे उपसर्गः) उपर्यवेव दत्तं वैदिकु-लमिश्रयालोचयति। यद्वा नायकौ त्वां परित्यज्यान्यत्र यदा यदा विद्युदपि त्वां परित्यज्य यदा

---

(४१) साधु। अहो এখন কি প্রকার এই বিপিনে শ্রিয়তমার নিকটে দূত প্রেরণ করি ? মেঘ অবলোকন করিয়া) সাধু সাধু।

(४४) फलभरपरिणामश्यामजम्बूनिकुञ्जस्खलनतनुतरङ्गानुत्तरेण स्वनन्तीम् ইত্যাদি নিবিড় জম্বুবৃক্ষাবৃত স্থানে নিপতন হেতুক অত্যন্তবেগ নবীন উদ্ভব শিলা অনুরূপ বৃষ্টিধারা পরিপূর্ণ উচ্চ ও অবাগ-মৃত্তিকার ন্যায় নীলবর্ণ নূতন মেঘ পর্বতের শিখর অবলম্বন করিতেছে।

(४१) (সাদর উদ্দিষ্ট ও উদ্ভটের কবিত্বশক্তি হইল)

(४८), হে ক্লীব্য স্ত্রীস্বভাবত্বেন। প্রিয় সহচরী বিদ্যুৎ তোমাকে আলিঙ্গন করে কি ? চাতকগণ অভিনবপ্রণয় প্রীতিযুক্ত প্রেমাস্পদ হইয়া তোমার ভজনা

पौरस्त्यो वा सुखयति मरुत् साधु संवाहनाभिः ?
विष्वग्विभ्रत्सुरपतिधनुर्लक्ष्म लक्ष्मीं तनोति ॥ (५०)

[आकर्ण्य।] अये! प्रतिरवभरितकन्दरानन्दितोत्कण्ठनील-कलकेकानुबन्धिना मन्द्रध्वनिना, माननुमन्यते, यावदर्यये। वत् जोन्मूत! (५१)

थाशयः। विरहिजनदेव प्रथमं प्रियाश्लिङ्गनविषयकः प्रश्नः। तथाचैवेन समतीव प्रियाश्लिङ्गन-ङ्गा जन्यते। चाशिर्भूतेन चमत्कारोत्पादकेन प्रश्नेन प्रीत्या मुमुक्षाः मरुन्नाम्याः चातका वा। मजले ऊषरे क्षचित्? किं? मरुन्दी यदा वा विहाय स्वामिनाधिष्ठितेऽपि यत्र-ाथा चातका अपि वा विहाय यत्रा वैचाशयः। एतेन समतीव मरुन्दसन्निधानेच्छा, ाभुखवर्तिनोऽपि मरुन्दशादर्शनेनोन्मादावस्था च व्यज्यते। पौरस्त्याः पूर्वदिग्भवः (वर्षाकाले र्वत एव वायोः प्रायश बहुत्वात् पौरस्त्या इति स्वरूपविशेषणम्) मरुत् पवनो वा संवाहनाभिः सम्यक् प्रेरणाभिः (चरणपदनहेलादिभिरिव) साधु सम्यक् यथा स्यात्तथा सुखयति क्षचित्? आनन्दितं करोति किं? यथा करेणुः सम्यक् गां विहायान्यत्र भ्रमति, तथा वायुरपि तां परित्यज्य गतो वैचाशयः। एतेन मरुन्दशद्वलगन्धवाहानेच्छापि व्यज्यते। विष्वक् सर्वतः, लक्ष्मीं श्रियं विभ्रत् धारयत् नानावर्णरञ्जितत्वेनातीव मनोहरमित्यर्थः, सुरपतिधनुरिन्द्रधनुः लक्ष्म चिह्नं तनोति विस्तारयति क्षचित् किम्? यथा समासमरणादिकालिदानीं-मयं वै श्रियं तिष्ठति, यथा तवायामरचनमिन्द्रधनुर्विभयं तिष्ठति वैचाशयः। एतेन चामरचक्रवालमण्डपेऽपि सुखात् धन्यादावस्थलेन नानाविधेच्छाया एव सम्भव इति विभावनीयम्।

अत्र मेघविद्युतोर्वालङ्गनकार्ययोः च नायकनायिकाव्यवहारसमारोपात् मरुन्मरुत्-कार्ययोः च चातके यथेच्छव्यवहारसमारोपात् संवाहनरूपकार्ये च पवने मन्दव्यवहारसमारोपात् विष्विग्विभारूपकार्ये चेन्द्रधनुषि भृत्यव्यवहारसमारोपाच्च चातुः समासोक्त्यलङ्कारः, सुखयतीति क्रियायाश्च मन्दव्यवहारे पवनेन परस्परैरयेक्यात् संसृष्टिः। मन्दा-क्रान्ता वृत्तम्।

(५१) आकर्ण्येति। प्रतिरवभरितासु गर्जनप्रतिध्वनिपूर्णासु कन्दरासु मुदासु (अवस्थितान

करके? पूर्वदिग्भव वायु मरुत् परिचालना द्वारा तोमाके सुखी क. कि? एवं सर्वतोभावे श्रीयारी इन्द्रस्व तोमार सौन्दर्यचिह्न विस्ता करके कि?

दैवात् पश्चेऽंगति विचरदिह्या मत्प्रियां चेत्
आश्वास्यादौ वदनु कथमेसोंघवीयानवस्थाम् ।
आयातन्तुं च कथयतात्वन्तमुच्छेदनीयः,
प्राप्तप्राणं क्षयमपि करोत्यायताघाः स एकः ॥ (५२)

निर्वेदः) आनन्दितात्मा मेदस्वाहरणेनैव सहजालोहितां जातरूप जनुकलाम् उद्गतहर्षोद्गमां श्रीदर्शनात् मदनाग्रा कदलेका मदनरेकाक्षरं वदतु 'मनुजं' श्रीरं आदौ दत्त्व तदानीतेन मदं च मदीयेन मुद्रुतेन हृं इति शब्देन सां जनुजरदे मदीयहृदिवसनमीक्षत्व स्वात्मिन्द्रियं कदलिनु मदनमनुजं दहति। यावदन्यदेवं दयालुतिरस्कारादेवमेव श्रीरं कर्तुं प्रार्थये। स्वात्मिन्द्रियकामनाय नैवं करोतु इत्युपदिशति—भवतु श्रीमुत ! इति।

(५२) कर्तव्यं निर्देशति—दैवादित्यादिना। हे नैव ! इच्छया स्वात्मिकामनुसारेण जगति विचरन् परिभ्रमन् दैवात् मदीयदर्शनादृष्टवशात् (दैवादित्यनेन दृश्यं भाग्यं वा द्योतयति मदेति शब्देन दृष्टिः) चेत् यदि मनुजिया मनुष्यावस्थया नाम्नी मदेः, मत् यदा आदौ प्रथमं आत्मन मदीयानरदशालोहिता या स्वात्मिका तदनु यत् पश्चात् मांसरीयं मांसरस मत्त इमां अवस्था तादृशैवोदरतामनीय श्रीदर्शनेन इमा अवस्थां। (मदीयात्मिकनुद्धा मांसरीयादिति कदलं प्रकृत्या स्वकीयमांसपरित्यागार्थमिति मन्यते) आश्वास्यादिनेदं मांसरया अवस्थितमाह—आश्वास्येति। कथयता मदीयावस्थां विज्ञापयता त्वया आयातन्तुं मनुष्यादिस्वभावं दूरं अदलं यथा स्यात्तथा न छेदनीयः "मदीयानरणदशालुप-स्थिते"ति श्रीदर्शनेन मोदकर्तव्यतोक्तः। कुत इत्यत आह—आयेति। आयताघाः विस्तृत-श्रीवनाशाः सन्तो मांसरया एक. केवलः स आयातन्तु. कदलपि व्यतिरेकेण मांसरायं श्रीवित-रक्षणं करोति। तदीयविच्छेदेन मदीयश्रीवनाशे इयमांसरायाश्रीवने मनुष्यादिस्वभाव-कालात् कैव पूर्वं श्रीदर्शं जनयतीति भावः।

---

(५१) (प्रत्यक्षं दृष्ट्वा) अहो !! प्रतिक्षणनिपूर्ण सहावस्थित आत्मन्दित ও ঈষৎস্থিত মনুষ্যকাণের মন্ত্রীর কেবলমাত্রানুরাগী 'হং' ইত্যাকার শব্দ দ্বারা আমার পূর্বস্থিতি স্মরণ করিয়া দেখ আমাকে নিজের মাংস ভক্ষণ করিবার অনুমতি দিতেছে। অতএব ইহাই প্রার্থনা করি। ভগবন্! বাসিষ্ঠ!

(৫২) তুমি স্বেচ্ছায় জগতে বিচরণ করিতে করিতে যদি দৈবাৎ আমার প্রিয়তমাকে দেখ, তবে প্রথমে আমার অবস্থাদি বৃত্তান্ত দ্বারা তাহাকে আশ্বাস

[सहर्षम् ।] अहो ! प्रचलितः, तदन्यत्रा सञ्चर मिषरिक्षामति । (५३)

मक० । [सोद्वेगम् ।] कथमिदानीमुन्मादोपरागो माधवेन्दु-मास्कन्दति, हा तात ! हा अम्ब ! भगवति ! परित्रायस्व, परित्रायस्व । पश्य माधवावस्थाम् । (५४)

अत्र हतीयचरणोक्तकार्यस्य चतुर्थचरणोक्तकारणेन समर्थनादर्थान्तरन्यासोऽलङ्कारः । मन्दाक्रान्ता छन्दः ।

एतत्प्रस्तावसितीयाङ्कस्यानुरूपश्लोकाद्यौ यथा मेघदूते—

"धात्रावश्यः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यःपाति प्रणयिहृदयं विप्रयोगे रुणद्धि ॥"

(५३) सहर्षमिति । एतत्प्रस्तावनानन्तरमेव मेघस्य सञ्चरणदर्शनेन "सदीयदीयं सर्वं-मेवाय' प्रचलती"ति परिकल्पनमेवास्य हर्षहेतुर्बोध्यः । प्रचलित इति मालत्यै तदवस्थां ज्ञापयितु-मिति शेषः । तस्मात् प्रार्थितकार्यस्य सम्पादनादिति यावत्, अन्यत्र सञ्चरसि, इतोऽन्यत्र स्थाने गच्छसि । (परिक्षामति अन्यत्र गमनाय शाटविशेषं करोति) ।

(५४) मकरन्दः । उन्मादः विरहजनितोन्मादावस्था एव उपरागः राहुग्रासः माधव एव इन्दुबन्धुः तं आस्कन्दति अभिभवति । अन्यथा अचेतनं मेघमुद्दिश्यैवं दीर्घप्रार्थनाऽसङ्गतादिति भावः । विषमज्वाले पित्रोः सम्बोधनम् स्वाभाविकमिति तत्सम्बोधनम् । विषमप्रकोपाय भगवतीति समधिगतमाहात्म्यायाः कामन्दक्याः सम्बोधनम् । परित्रायस्व परित्रायस्वेति त्रिवारं, मालतीति शेषः, क्वचित् "मा" इत्यपि पाठः । माधवं ग्रहतिथिं विधाय मां परिरक्षेत्यर्थः । अत्रोन्मादे राहुग्रासारोपादेव माधवे चन्द्रत्वारोप इत्यङ्गिपदघटितपरम्परितरूपकालङ्कारः ।

युक्त करिया उत्पन्न माधवेर (आमार) एই विरहावस्था वलिও । किन्तु वलिते वलिते आवार प्राप्तिप्रत्याशारूप सूत्र एकवारे उच्छेदित करिও ना । कारण केवल सেই प्राप्तिप्रत्याशासूत्रই अतिकष्टে তাহার जीवन रक्षा करितेछे ।

(५३) (हर्षের সহিত) অহো ! ! মালতীকে আমার অবস্থা জানাইবার জন্য যাইতেছে, অতএব আমি অন্যত্র গমন করি । (পরিভ্রমণ)

(५४) মকর । (উদ্বেগের সহিত) কেন সম্প্রতি উন্মাদরূপ রাহুগ্রাস মাধব-

माध। धिक् प्रमादः। (५५)

नवेषु लोध्रप्रसवेषु कान्तिर्मृगः कुरङ्गीषु गतं गजेषु।
लतासु नम्रत्वमिति प्रमथ्य, व्यक्तं विभक्ता विधिने प्रिया मे॥ (५६)

हा प्रिये मालति! [इति मूर्च्छति।] (५७)

---

(५५) माधेति। निर्वेदविस्मार एवात्र धिक्शब्दः। प्रमादः अनवधानता, अज्ञानमिति यावत्। अज्ञानमनवधाने इति यथानामधारयेण मालतीविभागसंस्कारादिति भावः।

(५६) अनवधानतायाः फलं दर्शयति—नवेष्विति। नवेषु अचिरविकसितेषु लोध्रप्रसवेषु लोध्रस्य कुसुमेषु कान्तिः यस्या लोध्रं इवास्या इति शेषः। कुरङ्गीषु चपलासु दृष्टिः, तस्या चपलायाश्चोत्कलनानि दृष्टय इति शेषः। गजेषु दन्तिषु यत् यस्या मन्थरगमनं, तथा लतासु लोध्रत्वं नम्रत्वं तस्या अवनमनसमावत्वं इत्यर्थ इति शेषः। इति हेतोः विधिने अस्मिन् वने प्रमथ्य सङ्कल्प्य मे मम प्रिया मालती व्यक्तं स्पष्टं यथा स्यात्तथा विभक्ता लोध्रप्रसवादिभिर्विभज्य लोता। अन्यथा लोध्रप्रसवादिषु तत्कान्त्यादेर्दुर्लभत्वादिति भावः।

अत्र इत्यर्थ इत्यादि क्रियापदद्वारा लोध्रप्रसवादिभिर्विधिं यदुपदस्य व्याख्यानेऽपि न न्यूनपदत्वदोषः, एतादृशस्थले क्रियापदस्यैतत्पदव्याख्यानस्य सुधियामनुद्देश्यत्वादिति समाधेयम्।

अत्र प्रायोवादावष्टम्भेन मालतीविभागसंस्कारादिषु मालतीत्वावच्छेदकधर्मस्य सत्त्वात् साहचर्याभावेन न विशेषणाक्षेपः, परन्तु व्यक्तमित्यस्योपरि चात्मनस्तत्तत्क्रियाव्याप्तियोग्यत्वाक्षेपः इति। उपेन्द्रवज्रे हि जतौ तगौ गुरू। सहरदेवोपजातिरियम्।

(५७) उक्तविलापपरिकल्पनेन मालत्या मरणावधारणादिति भावः—"हा प्रिये मालती"ति। इति उक्त्वा च, मूर्च्छति मूर्च्छां प्राप्नोति। उक्तरूपेण मरणावधारणमेव मूर्च्छायामपि हेतुः।

रूप चक्रके अन्तर्भूत करिতেছে? হা পিতঃ! হা মাতঃ! ভগবতি কাদম্বরি! আমাকে রক্ষা কর, রক্ষা কর। মাধবের অবস্থা নিরীক্ষণ কর।

(৫৫) মাধব। আমাদিগকে ধিক্। আমাদের কি অনবধানতা।

(৫৬) নূতন লোধ্রকুসুমে প্রিয়তমার কান্তি, হরিণীতে প্রিয়তমার চঞ্চল অবলোকন, হস্তীতে প্রিয়তমার মন্থর গমন ও লতাতে প্রিয়তমার নম্রত্ব পরিদৃষ্ট হইতেছে। অতএব মনে হয়, ইহারাই আমার প্রিয়তমাকে এই অরণ্য আনিয়া বিভাগ করিয়া নিয়াছে।

(৫৭) হা প্রিয়ে! মালতি! (এই কথা বলিয়া মাধবের মূর্চ্ছা।)

मक। सुहृदि गुणनिवासे प्रेयसि प्राणनाथे
कथमिव सहपांसुक्रीडनप्रौढ़सख्ये।
प्रियजनविरहाधिव्याधिखेदं दधाने,
हृतहृदय! विदीर्य्य त्वं हिया न प्रयासि? (५८)

माध। [आत्मस्वोत्थाय।] सुलभानुकारः खलु जगति वेधसो निर्माणसविवेयः, भवतु एवं तावत्। [उच्चैः।] अयमहं भोः, प्रक्षिप्य भूधारस्त्रवारिणः सत्वान् विज्ञापयामि मुहूर्त्तमवधानदानेन मामनुगृह्णन्तु भवन्तः। (५९)

---

(५८) सुहृदीति। गुणनिवासे विद्याविनयादिसर्व्वसद्गुणाश्रये प्रेयसि प्रेयाणां श्रेष्ठे प्राणनाथे प्राणानां नियन्तरि (येन विना प्राणधारणमेवाशक्यं तथाभूते इति भावः) तथा सह, पांसुक्रीडनात् मिलित्वा धूलिखेलनात् बाल्येऽत्यादिकर्त्तः, प्रौढं हृदयावेग सञ्जातं सख्यं बन्धुता यस्मिन् तथाभूते सुहृदि मित्रे यस्मिन् नायके प्रियजनस्य प्रियतमाया मालत्या विरहेण विश्लेषेण य आधिः मानसी व्यथा (पुंस्याधिर्मानसीव्यथेत्यमरः) स एव व्याधिः रोगः तस्य खेदं दुःखमितिः दधाने धारयति सति हे हृतहृदय! कृतस्मितचित्त! त्वं हिया विदीर्य्य स्वयमिव (हृदयशब्दो वाक्यालङ्कारे) त्रियमेव न प्रयासि न गच्छसि। ईदृशमवस्थायां मां विहाय तव गमनमेव सर्व्वथानुचितमिति भावः।

अत्र माधवीयबन्धुतायां चतुरनीचरतिप्रतिपादनाभिप्रायेण विशेषणानां मधुरत्वात् परिकरालङ्कारः। मालिनीवृत्तम्॥

(५९) मालेति। मालत्या प्रियतमायाः सदृशमेव सदृशैरेवतः मालतं सञ्जा। वेधसः ब्रह्मणः निर्म्माणसविवेयः सृष्टिकर्त्तुः सुलभः सदृशः मालतः सामं येन तादृशः, विधिनिर्म्मितस्यानुकारनिर्म्माणस्य सहजं प्रायः एव इत्यत्र हृदयं। तथाच सौभ-

---

(৫৮) সখে। বিদ্যাবিনয়াদিসদ্‌গুণের আশ্রয় প্রিয়শ্রেষ্ঠ প্রাণের মিত্র) ও মিলিত হইয়া ধূলিখেলা হইতে দৃঢ় সৌহার্দ্দশালী মিত্র মাধব প্রিয়জনের (মালতীর) বিরহরূপিণ মনোব্যথারূপ ব্যাধির অতিশয় যাতনানুভব করিয়াও হে কুৎসিতচিত্ত! তুমি লজ্জাবিদীর্ণ হইয়া যাইতেছ না কেন?

(৫৯) মাধ। (আশ্বস্ত হইয়া উঠিয়া) বিধাতার নির্ম্মাণপ্রণালী প্রায়শঃই সুলভসাদৃশ্য। সুতরাং সৌকুমার্য্যসৌন্দর্য্যান্বিতে মালতীর সাদৃশ্যই

भवद्भिः सर्वाङ्गप्रकृतिरमणीया कुलवधूः ;
रिहस्थैर्दृष्टा, वा विदितमयवाच्याः किमभवत् ।
वयोऽवस्थां तस्या शृणुत, सुहृदो ! यत्र मदनः,
प्रगल्भव्यापारश्चरति हृदि मुग्धत्व वपुषि ॥ (६०)

कुसुमसाम्यादिषु मालतीकान्तादीनां साहश्यादेव मे मालतीविशेषबुद्धी जाते इति भावः। नैवम्, एवं तावद्भवतु, नाम कुसुमकान्त्यादिषु मालतीकान्त्यादिसाहश्यमेव भवतु, तथापि सा जीवस्त्रियः। उच्चैरिति कथयतीति शेषः। भूधरारण्यचारिणः शैलकान्तारविहारिणः सत्त्वान् प्राणिनः। भवद्वाक्यदानेन महच्चलाकर्मणे चित्तसन्निवेशवितरणेन।

(६०) विज्ञापनीयं कथयति—भवद्भिरिति। एकस्थैः एतत्पर्वततलावस्थितैः (अनेन विप्रकर्षेण सत्त्वानां मालतीदर्शनज्ञानयोर्योग्यता सूचिता) भवद्भिः सर्वैः सर्वाङ्गेषु यदवयवेषु प्रकृत्या स्वभावेन रमणीया रम्या (मलयाद्रिसम्पादितसौन्दर्येणेत्यर्थः) कुलवधूः कापि कुलललना (वारनारीसुलभभावभङ्ग्यादिदोषरहितेत्यर्थः) दृष्टा वा? "चाक्षुषप्रत्यक्षविषयीकृता किम्? अथवा न दृष्टा चेत्तदा, तस्याः कुलवध्वाः किमप्यवत् लोकं अरण्यं अन्यं नाम-धरणं वा किं वर्त्म सत् विदितं? ग्रामाधिकवचनादि परित्यज्य, सत्त्व इत्यनेन लौकिकी वयोवस्था इत्याकाङ्क्षायामाह—वय इति। मे सुहृदः। मदीयवाक्यश्रवणविज्ञापनया सञ्जात-सौहार्दाः भूधरारण्यचारिणः प्राणिनः। तस्या मदङ्गिप्राप्तिविषयीभूतायाः कुलवध्वाः वयोवस्थां शृणुत। यत्र यस्यां वयोवस्थायां मदनः कामः प्रगल्भव्यापारः प्रौढोद्योगः सन् हृदि मनसि चरति, वपुषि शरीरे च मुग्धः हावभावप्रकाशादिना चेष्टोद्भवः सन् चरति। एनेन तस्याः प्रथमयौवनावस्था सूचितेति मन्तव्यम्।

"भवद्भिरेवंभाक्यैः पूर्वार्धार्थं वदं भवत"मिति वचनादेव पूर्वार्धानां नाम्नोऽवचनम्। एवं यच्छब्दश्रवणवाक्यगतत्वेन तच्छब्दापेक्षाविरहात् वाक्यगतविधेयाविमर्शदोषः। मिश्रविधीकृतम्।

হইবে। (উচ্চৈঃস্বরে) এই আমি প্রণিপাত করিয়া পর্ব্বতারণ্যচারী প্রাণী-দিগকে জানাইতেছি যে, আপনারা মুহূর্ত্তকাল আমার বাক্যশ্রবণে মনোযোগ দিয়া আমাকে অনুগৃহীত করুন।

(৬০) এই পর্ব্বতারণ্যাবস্থিত আপনারা সর্ব্বাঙ্গে স্বভাবরমণীয় কোনও এক কুলবধূ দেখিয়াছেন কি? অথবা তাহার কি হইয়াছে, তাহা জানিয়াছেন কি? হে সুহৃদ্‌গণ! তাহার বয়োবস্থা শ্রবণ করুন। যে বয়োবস্থায় কাম

कष्टं भो ! कष्टम् । (६१)

केकाभिर्नीलकण्ठस्तिरयति वचनं ताण्डवाटुक्किखण्डः,
कान्तामन्तःप्रमोदामभिसरति मदभ्रान्तनारङ्गकोरः ।
गोलाङ्गूलः कपोलं कुरयति रजसा कौसुमेन प्रियायाः,
किं याचे तत्र यत्र ध्रुवमनवसरग्रस्त एवार्थिभावः ॥ (६२)

---

(६१) भो इति विषादद्योतकमव्ययं, कष्टं दुःखं, तथैवातिशये द्विरुक्तिः । सर्वैस्तदाकाङ्क्षावशेनैव दुःखहेतुः ।

(६२) सच्चानानवसरविमर्दमिदमाह—केकाभिरिति । नीलकण्ठो मयूरः ताण्डवाटुक्तत्पदाहेतोः खण्डिखण्डः उद्दीप्तवर्हभारः सन् केकाभिः स्वजातिपक्षिष्टैः शब्दैः वचनं मदुक्तं वाक्यं तिरयति आच्छादयति । तथाच दीर्घतरेण स्वशब्देनाभिभवात्मकवाक्यं न प्रयोजयति । मदेन कामजनितया वाक्यं धूर्णिते सारे तारके यस्य तादृशचकोरः चकोरजातिः चन्द्रविशेषः अन्तःप्रमोदं अन्तःकरणोपचितहर्षं वाक्यं स्वभार्यां चकोरीं अभिसरति अभिगच्छति । तथाच मदाघूर्णितया भार्यापि मदाक्यं प्रयोजयतीति भावः । तथा गौरिव लाङ्गूलं यस्य स गोलाङ्गूलः प्लवङ्गः (प्लवङ्गकौसुमरजसगोलाङ्गूलसंज्ञौ इत्यमरमालायां) कौसुमेन पुष्पसम्बन्धिना रजसा परागेण प्रियायाः स्वभार्यायाः कपोलं कुरयति चित्रयति । सुतरामयमपि तन्मनस्कतया मम वचनं नाकर्णयतीति भावः । अतएव किं कथं याचे एतेषां मध्ये प्रियमङ्गलाभङ्गसंवादार्थमर्थये । मदवश एवात्मनस्तैरभिप्रायवशादिति भावः । तथाच अर्थिभावः मम याचकत्वं यत्र यत्र अर्थात् सर्वत्र ध्रुवं निश्चितं अनवसरग्रस्त एव अनवकाशाक्रान्त एव । सर्वेषामेव स्वस्वाभिलषितसाधनव्यग्रत्वात् कुत्रापि मत्प्रार्थनावकाशो नास्तीति भावः ।

अत्र इत्यनुप्रासश्छेकानुप्रासो शब्दालङ्कारः, सामान्येन विशेषसमर्थनरूपार्थान्तरन्यासश्चार्थालङ्कार इत्येषां निरपेक्षाणां संसृष्टिः । अनुष्टुवृत्तम् ।

"ईप्सितार्थप्रतीघातः प्रतिषेध इतीष्यते" इति साहित्यादर्श प्रतिषेधो नाम विमर्शसन्धेरङ्गम् ।

प्रौढ़ोद्योग हइया हृदये ओ मनोहर हइया शरीरे विचरण करे ।

(६१) आहा कष्ट, आहा कष्ट !!

(६२) मयूरगण उद्धत नृत्यवशतः दर्शनार्थ ऊर्द्धोत्थित करिया केकाशब्द द्वारा आमार वाक्यके आच्छादित करितेछे । मदघूर्णितताराक चकोर पत्नी

অয়ঞ্চ—দন্তচ্ছটারুণিমরঞ্জিতকান্তদন্ত-
মুদ্বম্য চুম্বতি বলীবদনঃ প্রিয়ায়াঃ।
কাম্পিল্লক-প্রসবপাটলগণ্ডপালি-
পাকারুণস্ফুটিতদাড়িমকান্তি বক্ত্রম্ ॥ (৫২)

এষঃ প্রিয়তমাস্কন্ধবিশ্রান্তকরো রোহিণালোকহস্কন্ধবিশ্রান্ত-
স্কন্ধরঃ করী। কথমবাপ্যনবসরঃ। (৫৪)

---

(৫২) দন্তেতি। অয়ঞ্চ বলীবদনঃ বামঃ দন্তচ্ছটয়ঃ দীপ্তাবল্যঃ অন্তরিতা আন্তরেণ রক্তবর্ণেনেতি যাবৎ, রঞ্জিতা রক্তীকৃতা কান্তা মনোরমাঃ দন্তা দশনা যস্য তথাভূতঃ, কাম্পিল্ল এব কাম্পিল্লকঃ (স্বার্থে কঃ) রোচনী (যথা রোচনীতি খ্যাতঃ) কাম্পিল্লঃ কর্কশ-মন্দী রক্তাঙ্গী রোচনীত্যপীত্যমরঃ) তস্য প্রসবস্য পুষ্পস্য পাটলী মধ্যপাণ্ডী কপোলশালী যস্য তথাভূতঃ, তথা পাকেন পক্কতারূপপরিণামেন আরুণং রক্তবর্ণং স্ফুটিতং দীপ্তোদ্ভাসেন বিদারিতম্ যদ্দাড়িমং তদ্বদকান্তিঃ যস্য তথাভূতং প্রিয়ায়াঃ কান্তায়াঃ বক্ত্রং মুখং উন্নম্য উত্তোল্য চুম্বতি। তথাহ্যস্য সম্ভাষেঽপি মদীয়যাচ্ঞাবসরো নাস্তীতি ভাবঃ।

অত্র দন্তানুরাগস্য কান্তানুরাগী সুহৃদ্যোগো ব্যঞ্জকঃ ইতি হেতো পরম্পরসৈরপেক্ষ্যাৎ সংসৃষ্টিঃ। মন্দাক্রান্তাবৃত্তম্ ॥

(৫৩) এষ ইতি। প্রিয়তমায়াঃ স্বকান্তায়াঃ করিণ্যাঃ স্কন্ধে বিশ্রান্তঃ নিষণ্ণতয়াবস্থিতঃ করঃ শুণ্ডো যস্য তথাভূতঃ, তথা রোহিণালোকস্য বটপাদপস্য স্কন্ধে প্রকাণ্ডদেশে বিশ্রান্তা অবস্থিতা স্কন্ধরা গ্রীবা যস্য তথাভূতঃ, এষ করী হস্তী বর্ততে ইতি শেষঃ। তথাচ নির্বৃতেন-

---

হর্ষিতান্তঃকরণা কান্তার অভিগমন করিতেছে। বানর পুষ্পপরাগ দ্বারা প্রিয়ার কপোল চিত্রিত করিতেছে। অতএব কিরূপে যাচ্ঞা করিব? নিশ্চয় সর্বত্রই আমার যাচকত্ব অনবসরগ্রস্ত।

(৫৩) এই আর একটি বানর ওষ্ঠ ও অধরের রক্তিমা দ্বারা যাহার মনোহর দন্ত অন্তরঞ্জিত। যাহার কপোলপ্রাপ্ত কাম্পিল্লকুসুমের ন্যায় পাটলবর্ণ এবং যাহার কান্তি পক্কতারূপ ও বিদারিভেদ দাড়িমফলের তুল্য, প্রিয়তমার তাদৃশ বদন উত্তোলিত করিয়া চুম্বন করিতেছে।

(৫৪) যাহার শুণ্ড প্রিয়তমার স্কন্ধে নিশ্চলরূপে অবস্থিত ও যাহার গ্রীবা

कण्डूकुट्मलितेक्षणां सहचरीं दन्तस्य कोट्या लिखन्।
पर्य्यायच्युतिकीर्णकर्णपवनैराक्षादिभिर्वीजयन्।
जग्धार्द्रैर्नवशल्लकीकिसलयैरस्याः स्थितिं कल्पयन्,
धन्यो वन्यमतङ्गजः परिचयप्रागल्भ्यमभ्यस्यति॥ (६५)

(अन्यतो विलोक्य) अयमपि।

नान्तर्वर्त्तयति ध्वनत्सु जलदेष्वामन्द्रमुद्गर्जितम्,
नास्वाद्यात् सरसः करोति कवलान् आवर्जितैः शैवलैः।

मध्यदेशे इत्यर्थः। विशेषतो विवक्षाह—कण्डूतीति। अत्रापि कण्डूतिः परिच्छेदि अनवरतं मदप्रार्थनाया अनवकाशः।

(६५) अनवसरमेव खलदेशितुमाह—जग्धेति। अयं अन्यमतङ्गजः आरण्यहस्ती, दन्तस्य कोट्या अग्रभागेन, कण्डूः। कण्डूयनेन कुट्मलिते मुकुलिते निमीलिते इति यावत्, ईषत्ये नयने यया तथाभूतां सहचरीं प्रियतमां करिणीं लिखन् मुहुर्मुहुः कण्डूयन्, आक्षादिभिः आनन्दलक्षणैः पर्य्यायेण क्रमेण व्यतिकीर्णयोः परिवर्त्तिनोः कर्णयोः पवनैः मरुद्भिः वीजयन् वीजितां सम्पादयन्, तथा जग्धार्द्रैः खादनसिक्तार्द्रैः नवैः मृदुभिः यत्नकोलां मत्तहस्यवयविशेषरूपां किसलयैः पल्लवैः कृत्वा स्थितिं इति अवस्थानमिति यावत्, कल्पयन् सम्पादयन् परिचयस्य प्रणयस्य प्रागल्भ्यं उत्कर्षं अभ्यस्यति पुनः पुनर्विदधाति। तथाहि कालानुरोधिनिर्वितालःकरणस्यास्य सकाशे कथमपि मम प्रार्थनावसरो लप्स्यते इति भावः।

अत्र लक्षणोद्धिरवहारः। आर्द्रवृत्तिकीर्तितं इदम्।

(६६) नान्तरिति। कालस्य सहजनिसर्गस्य या व्यक्तिः स्थितिः अवस्थितिरिति यावत्, तया यो

वर्तमानकाल প্রকাশ করেন তাদৃশ এই হস্তী বর্তমান (সুতরাং ইহাকেই আশ্রয় করি) এ কি এই হস্তীর নিকটও আমার প্রার্থনার অবকাশ নাই।

(৬৫) পরম সৌভাগ্যশালী এই বনহস্তী কণ্ডূয়ননিমীলিতনয়না সহচরীকে দন্তের অগ্রভাগ দ্বারা ঈষৎ কণ্ডূয়ন করিতে করিতে পর্য্যায়ক্রমে বিক্ষিপ্তকর্ণের আহ্লাদজনক বায়ুদ্বারা বীজিত করিতে করিতে ও অর্দ্রভুক্ত শল্লকীপল্লব দ্বারা প্রিয়তমার আসন সম্পাদন করিতে করিতে প্রণয়ের উৎকর্ষ অভ্যাস করিতেছে।

दानज्यानिविषादमूकमधुपश्यासङ्गदीनाननो,
नूनं प्राणसमावियोगविधुरस्तम्बेरमस्तप्स्यति ॥ (६६)

अलमनेनायासितेन अन्यतः सञ्चरामि। [विलोक्य।] एष सानन्दसहचरीसमाकर्ण्यमानमधुरगम्भीरकण्ठगर्जितध्वनिः अपरो मत्तमातङ्गयूथपालः, प्रत्यग्रविकसितकदम्बसङ्घातसुरभिशीतलामोद-

---

विषादः दुःखं तेन मूकाना अत्यै रहितानां मधुपानां भ्रमराणां आसङ्गेन भारिसदोत्पाद-प्रलापया तत्कृतेन सङ्सर्गेण च दीनं मलिनं आननं यस्य तथाभूतः, अयन्तु स्तम्बेरमः करी, जलदेषु वारिदेषु ध्वनत्सु गर्जत्सु सत्सु अलसन्मन्थे आनन्दं निरतिशयगम्भीरं सहगर्जिता उद्गर्जनं न कुर्वन्निति समयान्तर इव न करोति। तथा पासन्नात् निकटवर्तिनः सरसः सरोवरात् आवर्जितैः आहृतैः शैवलैः, शैवालैः अवलात् बलात् न करोति। अत एव नूनं सह प्राणसमायाः प्राणप्रतिमायाः हस्तिन्याः वियोगेन विरहेण विधुरः विधेः सन् स्तापमनुभवति। प्रियतमाविरोगेन विनेदृक्विषयवैमुख्यमासम्भव इति भावः।

अत्र काव्यलिङ्गक्रियोत्प्रेक्षाशब्दार्थयोः सङ्करः। आर्याविलोडितं छन्दः।

(६७) अलमिति। आयासितेन मालतीवार्तामिश्रीदवेजितेन कामादरिचिन्तना-क्रान्तमानसा विरहिणः विषयान्तरमन्त्रौषेणेव अपनेतुमिति भावः। सानन्दया सुरतसम्भावनया सहचर्या सहचर्या स्वकान्तया करिण्या समाकर्ण्यमानः मधुरः गम्भीरश्च कण्ठगर्जितः तन्निर्घोषः तथाभूतः, मत्तमातङ्गयूथपालः मत्तहस्तिसमूहस्य प्रभुः, प्रत्यग्रविकसितानां अचिरप्रस्फुटितानां कदम्बानां नीपपुष्पानां सङ्घातस्य समूहस्य सुरभिः शीतलामोदेन सगन्धि-शीतलगन्धेन सहितं यथा स्यात्तथा समन्वितः युक्तः यो मासलरसपोलाभ्यां स्थूलगण्डाभ्यां निष्यन्दैः सहजलधरैः निष्यन्दितसदृशजलनिर्झरैः, तैन कर्दमितौ सञ्जातपङ्कौ अत एव

---

(६६) (अन्य दिके अवलोकन करिया) अहहा एই अप्राप्ति प्रयुक्त दुःखে निःशब्द भ्रमरगणের সংসর্গে মলিনবদন এই হস্তী যেমে গর্জন করিলে ও তন্মধ্যে গম্ভীর উদ্‌গর্জন করিতেছে না ও নিকটবর্তী সরোবর হইতে আনীত শৈবালদ্বারা গ্রাস করিতেছে না, অতএব আমার মনে হয়, প্রাণপ্রতিম প্রিয়তমার বিরহে ক্ষীণ হইয়াই সন্তাপ ভোগ করিতেছে।

(৬৭) ইহাকে আয়াসিতকরা বৃথা। অন্যদিকে লক্ষ্য করি। (অবলোকন করিয়া) যাহার মধুর ও গম্ভীর কণ্ঠগর্জিত ধ্বনি হর্ষযুক্তা সহচরী প্রবণ করিতেছে, এবং যাহার গণ্ডদেশ অচির-প্রস্ফুটিত কদম্বপুষ্পসমূহের

बहुलसंवलितमांसलकपोलनिष्यन्द-कर्दमितकषायकण्ठः, समुद्दलित-कमलिनीखण्डविप्रकीर्णपर्णकमलकेसरमृणालकन्दकोमलाङ्कुरमाहरन्, अनवरतप्रवृत्तकमनीयकर्णतालताण्डव-प्रबल-जर्जरितजलतरङ्गविसर-नीहारं सप्तच्छदकुररसारसं सरोऽवगाह्य, विहरति। भवतु एव-माभाषे। महाभाग! नागपते! श्राद्धयौवनः खल्वसि, कान्तानु-वृत्तिचातुर्यमपि अस्ति भवतः। [सापवादम्।] (६०)

कषायौ सुरभी (सुरभी च कषायः स्यादिति मेदिनी) करटौ मत्तदेशौ यस्य तथाभूतः, समुद्दलिताया समुन्मूलिताया कमलिन्याः पद्मजातायाः, खण्डे छेदने विप्रकीर्णानि विविधं पातनवस्थितानि पर्णानि दलानि यस्य तथाभूतस्य कमलस्य पद्मस्य केसरस्य तथाभूतस्य कन्दस्य मृणालस्य तन्तवयोर्यं (मृणालतन्तूनां देयमवयवम्) आहरन् भक्षयन्-नादरतः। अनवरतं अविरामं यथा स्यात्तथा प्रवृत्तं सत्पन्नं कमनीयं मनोहरं यत् कर्णतालताण्डवं तालवृक्षनृत्तमेव (तालो वीतक्रियामाने मध्यमाङ्गुलिसञ्चित इत्यमरमाला) तेन प्रबलाः उच्छलिताः जर्जरिताः चूर्णीकृताश्च ये जलतरङ्गास्तेभ्यः विसता विसृताः विसृत-त्वेन निपतिता इति यावत्, नीहाराः नीहारवत्स्वच्छबिन्दवो यत्र तथाभूतं, तथा सप्तच्छदा सप्त-पर्णादेव भीताः कुरराः सारसाश्च पक्षिविशेषाः यत्र तथाभूतं सरः सरोवरं विहरति सञ्चरं विहरति। स्वस्यात्तिशयोक्तमाशापयोग्यं स्वमभिप्रेत्याह—भवतीति। एवं यथोक्तमाचरणं आभाषे आशापयामि। श्राद्धं क्रियाविरहविरहात् प्रवृत्तं यौवनं यस्य तादृशः। एतेन आशयो-विरहादाकस्मो यौवनस्य श्राद्धत्वं ध्वनितम्। कान्तायाः भार्यायाः अनुवृत्तिचातुर्यमपि अनुसरण-नैपुण्यमपि। सापवादमिति। अपवादेन अनुवृत्तेरन्वेकस्वरूपदोषदर्शनेन सहितं यथा स्यात्तथेत्यर्थः।

মনোজ্ঞ শৈত্যগন্ধ দ্বারা বহুলরূপে সংযোজিত স্থূল গণ্ডস্থল হইতে যে জল দ্বারা কর্দমাক্ত হইতেছে, তাদৃশ এই মত্তহস্তিযূথপতি, সমুন্মূলিত পদ্মিনীর খণ্ডন কালে যাহার অঙ্গসমূহ ইতস্ততঃ বিক্ষেপবশে ব্যবস্থিত হইয়াছে, তাদৃশ পদ্মের কেসর মৃণাল কন্দমূল ও কমলাঙ্কুর ভক্ষণার্থ আহরণ করিতে করিতে যাহাতে অবিশ্রান্তরূপে সমুৎপন্ন মনোহর তালনৃত্য কর্তৃক উদ্ভূত বৃহৎ বৃহৎ দ্বারা সঞ্চলিত ও চূর্ণীকৃত জলতরঙ্গ হইতে বিসৃতরূপে নীহারের ন্যায় জলবিন্দু পরিবেষ্টিত হয় এবং যাহাতে কুরর ও সারস পক্ষিগণ এই রীতি ভয়ে সঞ্চরণ করে, তাদৃশ সরোবরে বিহার

লীলোৎখাতমৃণালকাণ্ডকবলক্ষেদেষু সম্পাদিতাঃ,
পুষ্যৎপুষ্করবাসিতস্য পয়সো গণ্ডূষসংক্রান্তয়ঃ।
সেকঃ শীকরিণা করেণ বিহিতঃ কামং বিরামে পুন-
র্নৈদাঘোদনরাজবারণমুখে নালিনীপত্রাতপত্রং ধৃতম্ ॥ (৫৮)

---

(৫৮) অথৈকস্যং দর্শয়িতুমাহ—লীলেতি। লীলয়া যদৃচ্ছয়া উৎখাতা: উদ্ধৃতা যে মৃণালকাণ্ডা: বিসলতাস্তেষাং কবলায় গ্রাসায় (করিষু) ক্ষেদেষু ক্ষয়েষু করিণীবদনবিবরা-বলিষ্টেষিষয়ে, পুষ্যদ্ভি: বিকসদ্ভি পুষ্করৈ: পদ্মৈ: বাসিতস্য সুরভিতস্য পয়স: জলস্য গণ্ডূষানাং সংক্রান্তয়: নিষেকা: সম্পাদিতা, অনুষ্ঠিতা:। করিণীকবলিতমৃণালখণ্ডেষু নিজ-বদনপূরিতং জলং মদস্রাবিণ্যা: করেণ শুণ্ডাদণ্ডেন সেক: করিণীশরীরোপরি সেচনং কামং যথাস্যাত্তথা বিহিত: সম্পাদিত:। পুন: কিন্তু বিরামে সেকবিরামে সেকাৎ প্রথমাৎ কারণাৎ কমলাত্ত সঙ্কুচিতং মরতমিতি যাবৎ, তাদৃশং যৎ নলিনীপত্রং পদ্মপত্রং তদেব আতপত্রং ছত্রং ন ধৃতং, আতপনিবারণায় শুণ্ডাদণ্ডেন করিণী-শরীরোপরি নোন্নীলিতমিত্যর্থ:। "তথাচালেনৈবাতপত্রীভাবলাভেন আতপানুপপত্তেরত্রৈকস্যং ভাবমিতি ভাব:।

অত্র মালতীকিরণদ্বারা নলিনীপত্রাতপত্রমিতি নিরঙ্গরূপকেণ বর্ণ্যতে। হেত্বনুপ্রাণ-নাদনুপ্রাণো ন শব্দালঙ্কারাবিতি সমুদায়ে সংসৃষ্টি:। আর্দ্রবিক্রীড়িতং ছন্দ:।

অনুষ্ঠেয়ত্বে তৈলস্য যদিদমেবস্বভাবত্বেন ক্রমবৈশম্যোঽপমপি দৌত্য ভরতরামচরিতভট্টারাদিভি ক্রমস্য দর্শনমুপযুজ্যতে।

করিতেছে। হউক এইরূপ আলাপ করি, হে ভাগ্যবানি নাগপতে! তুমি ধন্যযৌবন হইয়াছ। তোমার কান্তানুবৃত্তি চাতুর্য্যও আছে। (দোষ প্রদর্শনের গর্হিত)

(৫৮) যদৃচ্ছাক্রমে উৎপাটিত মৃণালকাণ্ডের কবলিত খণ্ডে বিকসিত পদ্ম সুবাসিত জলের গণ্ডূষ নিক্ষেপ সম্পাদিত হইয়াছে। জলকণাযুক্ত শুণ্ডাদণ্ড-দ্বারা করিণীর গাত্রোপরি সেকও পর্য্যাপ্তরূপে বিহিত হইয়াছে। কিন্তু সেই সেকের বিশ্রামকালে স্বেদকণা: আতপ নিবারণের জন্য অবলম্বনীয় নলিনীদলরূপ ছত্র শুণ্ডাদ্বারা করিণীর গাত্রোপরি বিহিত হয় নাই।

कथमवधीरणानीरसं व्रजति। हन्त मूढ़ एवास्मिन् वनेचरे वयस्यमकरन्दोचितं व्यवहरामि, हा वयस्य! (६९)

धिगुच्छ्वसितवैश्वसं मम यदित्थमेकाकिनो,
धिगेव रमणीयतां त्वदनुभावभावाहते।
त्वया सह न यस्तया च दिवसः स विध्वंसताम्
प्रमोदमुगतर्षिकां, धिगपरत्र या जायते॥ (७०)

---

(६९) कथमिति। अवधीरणया सहचरं प्रत्येव भावानर्थक्यप्रावण्यया नीरसं निष्प्रणयं यथा स्यात्तथा व्रजति गच्छति, स मकरन्दसहचरमूढ इति शेषः। अवमानित इवाह हन्तेति—अत एवास्य खादनं नाम विरसं सम्भेरञ्जम्। तदुक्तं दर्पणेऽपि यथा—"...तदाहुस्तादृशं पुनः। वाक्यार्थानुपमानादेः सदृशं खलु यद्भवे"दिति।

(७०) धिगिति। एकाकिनो मम इत्थमेवम्प्रकारं यत् उच्छ्वसितवैश्वसं जीवनरूपं दुःखं तत् धिक्। मालतीमकरन्दयोरमयोर्विरहावस्थायामपि यज्जीवामि तदतीव दुरदृष्टफलमिति भावः। तथा एकाकिनो मम इदमादिनः सुखसाधनसामग्र्यादिभ्योऽनीप्सितोत्पादिनः रमणीयवस्तुनश्चात् पुष्पसमादिमनोहरपदार्थसाक्षात्करणादि च धिगेव। यो दिवसः त्वया मकरन्देन तया मालत्या च सह न पुनर्योर्विरहदशायां यो दिवस उत्पन्न इत्यर्थः, स विध्वंसतां विनश्यतु। साहचर्यदिवसस्य मम बलवतीव दुःखातिपातनीयत्वादिति भावः। प्रमोदः आनन्द एव मरुतर्षिका मरुदृषे मिथ्याभूतत्वात् मरीचिकाऽपि धिक्। या प्रमोदमरुतर्षिका अपरत्र पुनर्व्यवधानमन्यं पदार्थं आयते उत्पद्यते। तां मालतीदर्शनसुखस्य मे यः प्रमोद उत्पद्यते स एव यथार्थः, इतरस्तु प्रमोदाभास इति भावः।

---

(६९) একি কেন অবজ্ঞায় নিষ্প্রণয় ভাবে যাইতেছে? অহো!! মূঢ় এই মকরন্দের ও বস্তুতঃ মকরন্দের উপযুক্ত ব্যবহার করিতেছে, হা প্রিয়বয়স্য মকরন্দ!!

(৭০) একাকি আমার এই প্রকারে জীবনরূপ দুঃখে ধিক্। এবং একাকি আমার নিষ্ফলোৎপাদি রমণীয় বস্তুর অনুভবেও ধিক্। যেই দিন তোমার ও মালতীর বিরহ অবস্থায় উৎপন্ন আমার সেই দিন বিনষ্ট হউক। আমার সেই প্রমোদমরিচিকায়ও ধিক্, যাহা তোমাদের অতিরিক্ত বিষয়-রমণে জন্মিয়া থাকে।

मक। अये! उन्मादमोहान्तरितोऽपि सम्प्रति अयं मां प्रति अप्रतिकूलः, यतः कुतश्चिदाच्छकात् प्रबुद्ध एवास्य सहजस्नेहसंस्कारः। तत् असन्निहितमेव मां मन्यते। [पुरः स्थित्वा] एष पार्श्वचर एव ते मकरन्दो मन्दभाग्यः। (७१)

माध। प्रियवयस्य! समाश्वस, परिष्वजस्व मां, प्रियान्तु मालतीं प्रति निराशः परिम्लानोऽस्मि। [इति मूर्च्छति]। (७२)

मक। एवं सम्भावयामि जीवितेश्वरम्। [विलोक्य सकरुणम्।]

अत एकस्यैव विद्यशब्दस्य पुनःपुनरुपादानादनवीनत्वदोषः। एवं 'जीवनस्य रमणीय' इत्यादावनुप्रासाभाव विद्यात' इति एकाक्षिकरणपदार्थस्य हेतुत्वात् पदार्थहेतुकं काव्यलिङ्गम्, अमीलितमात्रेति निरङ्कुशत्वमयकथनात्तदेवं परस्परनिरपेक्षात् संसृष्टिः। एवं ध्वनन्। अनया द्वितीयपरमाणुसंयोगेन अणुमात्रेऽपि अतिमहदोषः अदृश्यः स्वरूपविनाशके तदोषस्यानङ्गीकारादिति हृदयम्। तदेवमन्यदप्यनुसन्धेयम्।

(७१) अयेति। उन्मादात् कामोन्मादात् यो मोहः तेन अपरिहतोऽपि अभिभूतोऽपि, अयं माधवः, अप्रतिकूलः अविमनीतबुद्धिः। सहजस्नेहसंस्कारः आत्मन्यविच्छेदेनाविर्भवितो भावना, कुतश्चित् अनिर्वचनीयात् स्वप्नकात् अकीलकात् प्रबुद्ध एव उत्थित एव माधवेन विषयवस्तुतिरूपेण एवेति भावः। तस्मात् उन्मादजनितमोहात्। मन्दभाग्यः हतभागधेयः, लब्धोपदेशावस्थामप्राप्तोऽस्मीत्यादिति भावः।

(७२) माधेति। समाश्वस दर्शनप्रदानादिना स्वस्थो भव।

(७३) मकेति। सम्भावयामि आलिङ्गनप्रदानादिना पश्ये, जीवितेश्वरम् अमलीव

---

(७१) मकरन्द। অহো মাধব কামোন্মাদজনিত মোহে অভিভূত হইয়াও প্রতি অপ্রতিকূল। সহজ স্নেহ সংস্কার অনির্বচনীয় উদ্বোধক বশতঃ উন্মেষিতই থাকে। অতএব আমাকে অসন্নিহিত মনে করিতেছে। (সম্মুখে থাকিয়া) মন্দভাগ্য এই মকরন্দ তোমার পার্শ্বেই বিচরণ করিতেছে।

(৭২) মাধব। প্রিয় বয়স্য! দর্শনপ্রদানাদিদ্বারা আমাকে রক্ষা কর। প্রিয়া মালতীর প্রতি নিরাশ হইয়া আমি নিতান্ত পরিশ্রান্ত হইয়াছি। (মূর্ছা)

(৭৩) মকরন্দ। এইক্ষণে আলিঙ্গন প্রদানাদি দ্বারা জীবননিরপেক্ষা মাধবকে

हा कष्ट! आविर्भूतमत्परिष्वङ्गोत्कण्ठ एव निश्चेतनः संवृत्तः, तत्-किमिदानीमाशाव्यसनेन। सर्वथैव मे नास्ति वयस्य इति परिच्छेदो युक्तः (७३)। हा वयस्य!।

यत्स्नेहसंभ्वरवता हृदयेन नित्य-
मावद्धवेपथु विनापि निमित्तयोगात्।
त्वद्व्यापदो गणयतो भयसंभवानि
तत्सर्वमेकपद एव मम प्रयातम्॥ (७४)

सेवास्यदत्वाज्जीवनरक्षितारम्। आविर्भूता सञ्जाता मत्परिष्वङ्गस्य ममालिङ्गनस्य उत्कण्ठा औत्सुक्यं यस्य तथाभूत एव सन् निश्चेतनः चैतन्यरहितः मूर्च्छां प्राप्त इति यावत्, तत्तस्मात् इदानीं जीवितायां "यस्य जीवनं न नश्यती"ति ध्वन्याशाया व्यसनेन आसक्त्या किम्। कृत इत्याकाङ्क्षायामाह—सर्वथेति। परिच्छेदः निर्णयः। पुनःपुनरेवं मूर्च्छालाभात् तन्निवारणोपायभूतस्य मत्सतीलालनस्य वामत्वादिति भावः।

"कार्यान्तरोपगमनं विरोधमिति कृत्वा"मिति वचनादत्र विरोधनं नाम विनष्टसम्भेदम्। एवं जीवितेत्यत्रापि सेवास्यदत्वेन जीवनरक्षितृत्ववाचकत्वादवाचकत्वदोषः।

(७४) यदिति। सेवास्यंभ्वरवता -वात्सल्यनिबन्धनसन्तापशालिना हृदयेन मदीय-चित्तेन निमित्तयोगादिनापि विपत्तिकारणसम्पर्कादिनापि नित्यं सर्वदा त्वयि आपदो गणयता "सेवाः पापमाशङ्कत" इति न्यायात् तन्निवर्त्तनचिन्तादीः भावयता सता आवद्धवेपथु विधृत-कम्पम् यथा स्यात्तथा यत् भयं भयभावि भयभूतं शङ्कितमिति यावत्, मम तत्सर्वं भयं एकपद एव तत्क्षण एव तवाभावक्षण एवेति यावत् (तत्सर्वमेकपदे मूर्च्छे इति हलायुधः) प्रयातं विनष्टम्। तवाभावे पुनस्तद्विषयकभयासम्भवादिति भावः।

अत्र भयनिमित्ताभावेऽपि भयोत्पादाद्विभावनालङ्कारः। वसन्ततिलकावृत्तम्।

इच्छा करि। (निरीक्षण करिया करुणार सहित) हा!! आमार आविर्भूत उत्कण्ठा आविर्भूत हওয়ার পরেই প্রিয়বয়স্য অচৈতন্য হইয়াছে, তবে আর এখন ইহার জীবনাশা বাসনে ফল কি? আমার বয়স্য নাই এইরূপ নির্ণয়ই সর্ব-প্রকারে যুক্ত। হা বয়স্য!!

(৭৪) বাৎসল্য নিবন্ধন সন্তাপশালি আমার চিত্ত বিপত্তি কারণ সম্পর্ক ব্যতিরেকেও সর্ব্বদা তোমার বিপদ চিন্তা করিতে করিতে সকম্পে যে ভয়

সখে! বরং তাবন্ত এবাতিক্রান্তা মুহূর্ত্তাঃ. তথাবিধমপি ভবন্তং যেষু চেতয়মানমনুভূতবানস্মি, ইদানীং তু—(৩৫)

ভারঃ, কায়ো, জীবিতং বজ্রকীলং
কাষ্ঠাঃ শূন্যা নিষ্ফলানীন্দ্রিয়াণি।
কষ্টঃ কালো মাং প্রতি ত্বৎপ্রয়াণে,
ধ্বান্তালোকঃ সর্ব্বতো জীবলোকঃ॥ (৩৬)

---

(৩৫) সখে ইতি। অতিক্রান্তাঃ অতীতাঃ তাবন্তঃ মুহূর্ত্তাঃ দিবাপঞ্চদশভাগৈকভাগাত্মকাঃ কালাঃ বরং বর্ত্তমানকালাপেক্ষয়া মনাক্‌প্রিয়াঃ অনুভূতবানস্মি ইতি শেষঃ। (মনাগিষ্টে বরং যত্তু কথিদাহ তদব্যয়মিতি আখ্যাতঃ) যেষু মুহূর্ত্তেষু ভবন্তং তথাবিধমপি মালতীবিরহৌৎসুক্য-তুল্যমপি চেতয়মানং চেতনবন্তং ("বিত্ত সচেতন" ইতি ধীরাদিত্বাত্ণিচ্যপি বিত্তধাতোঃ আর্দ্ধধাতুকম্) অনুভূতবান্ সাক্ষাদুপলব্ধবানস্মি।

(৩৬) ভার ইতি। ত্বৎপ্রয়াণে ভূলোকাদস্য প্রস্থানে সতি পরলোকগমনে ইতি যাবৎ, মাং প্রতি মায়ঃ শরীরং ভারঃ বোঢ়ুমশক্যঃ ইব সর্ব্বথা প্রতীয়মানোঽভূদিতি শেষঃ। তথাচ ইহযাগ এব সম্মতি ময়া কর্ত্তব্য ইতি ভাবঃ। জীবিতং জীবনং বজ্রকীলং বজ্রো বজ্রময়ঃ কীল. শঙ্কুঃ যস্মিন্ তথাভূতং বজ্রময়শঙ্কুং আশ্রিত্য সদৃঢ়মিতিশেষঃ যাবৎ। কথমন্যথা ঈদৃশদুঃখবিয়োগদর্শনেঽপি জীবনং ন বহির্নিষ্ক্রামতীতি ভাবঃ। কাষ্ঠাঃ দিশঃ শূন্যাঃ পদার্থৈর্বিরহিতা এব। ন্যূনাধিকত্বাদিতি ভাবঃ। ইন্দ্রিয়াণি নয়নাদীনি নিষ্ফলানি প্রয়োজনরহিতানীব। ত্বদ্বিয়োগাগ্নি-দগ্ধেন ত্বদ্বিষয়গ্রহণাসামর্থ্যাদিতি ভাবঃ। কালঃ বর্ত্তমানসময়ঃ কষ্টঃ কষ্টপ্রদঃ। অনুপলব্ধত্বাদভাবেন কীদৃশত্বং ত্বদ্বিয়োগাদিতি ভাবঃ। তথা জীবলোকঃ সর্ব্বমুভুবনং ধ্বান্তালোকঃ ধ্বান্তঃ নির্ব্বাণং তমঃ আলোকঃ প্রকাশঃ যস্মিন্ তাদৃশঃ তথা, তমসাবরণময় ইবেতি যাবৎ। আলীঢ়ভূতস্য তমসাবরণাদিতি ভাবঃ।

অনুভব করিতেছিল, আমার সেই সমস্ত ভয় পরক্ষণেই (তোমার অভাব ক্ষণেই) বিনষ্ট হইয়াছে।

(৩৫) সখে! আমার সেই সকল অতিক্রান্ত মুহূর্ত্ত ও বর্ত্তমান সময় অপেক্ষা শ্রেয় ছিল, সেই সকল মুহূর্ত্তে মালতীর বিরহে উৎসুক তুল্য হইলেও তোমাকে সচেতন দেখিয়াছি। সম্প্রতি—

(৩৬) তোমার পরলোকে গমনে আমার যেন শরীর দুর্ব্বহ, জীবন

[विचिन्त्य] तत्किं नु खलु माधवास्तमयसाक्षिणा मया भवितव्यमिति जीवामि ? भवतु अमुष्मादेव गिरिशिखरात् पाटलावत्यां निपत्य, माधवस्य मरणाग्रेसरो भवामि। [सकरुणं निर्वर्त्य आलोक्य च।] कष्टं ! भोः कष्टम् ! (७७)

तदेतदसितोत्पलद्युतिगरोरमस्मिन्नभू-
दमातिदृढपीडनैरपि न दृप्तिरालिङ्गनैः।

अत्र यथा प्रतीयमानोत्प्रेक्षायाः परस्परनैरपेक्ष्यात् संसृष्टिः। मालिनीवृत्तम्।

(७७) विचिन्त्येति। मया माधवस्य चरमसयः साक्षिणा द्रष्टा भवितव्यम्, इतःपरमपि जीवनधारणेऽवश्यमेव माधवमरणं मया द्रष्टव्यमित्यर्थः, इति हेतोः किन्नु खलु किमर्थं भोः जीवामि प्राणान् धारयामि ? नात्परं वयमपि जीवनधारणं मया कर्तव्यमित्यर्थः। कर्तव्यमवधारयति—भवत्विति। पाटलावत्यां एतद्गिरिनिझरवाहिन्यां पाटलावतीनामनद्यां मरणाग्रेसरः मरणविषये अग्रवर्ती भवामि। माधवमरणदर्शनात् प्रागेवाहं जीवनं त्यक्ष्यामीत्यर्थः। सकरुणं सशोकं निवर्त्य शेषदर्शनार्थं मरणाय गमनात् विनिवर्त्य आलोक्य माधवस्य शरीरं दृष्ट्वा।

(७८) तदेतदिति। असितोत्पलस्य नीलपद्मस्य द्युतिरिव द्युतिर्यस्य तादृशं एतदुज्ज्वलं तत्प्रसिद्धं शरीरं माधवस्य दृष्टः। धराविलुण्ठितं दृश्यत इति शेषः। अस्मिन् शरीरे अतिदृढपीडनैरपि सम्यक्गाढैरपि आलिङ्गनैः 'सम इति आलिङ्गनवासनानिवृत्तिर्न अभूत्। पुरा माधवीविरहात् पूर्वं उल्लसितः सौन्दर्यातिशयदर्शनेनोत्फुल्लितः विस्मयः आश्चर्यं यत्

वज्रमय शतधा দেহ সঙ্ঘটিত, দিক্ সকল শূন্য, ইন্দ্রিয় সকল নিষ্ফল, বর্ত্তমান সময় কষ্টপ্রদ ও জীবলোক অন্ধকারময় প্রতীয়মান হইতেছে।

(৭৭) (চিন্তা করিয়া) (অতঃপর জীবনধারণ করিলে) আমাকে মাধবাস্তমিতির সাক্ষী হইতে হইবে। অতএব আর কি জন্য জীবনধারণ করিব ? হউক্, তবে এই পর্ব্বতশিখর হইতে পাটলাবতী নামক নদীতে নিপতিত হইয়া মরণ বিষয়ে মাধবের অগ্রবর্ত্তী হই। (শোকের সহিত নিবৃত্ত হইয়া ও মাধবের শরীর অবলোকন করিয়া) অহো কি কষ্ট !!

(৭৮) নীলোৎপলসমানদ্যুতি" এই সেই মাধবের শরীর ধরাবিলুণ্ঠিত। এই শরীরে অতি গাঢ় আলিঙ্গন দ্বারাও আমার আলিঙ্গন বাসনার নিবৃত্তি

यदुल्लसितविस्मया वत निपीतवत्यः पुरा,
नवप्रणयविभ्रमाकुलितमालतीदृष्टयः ॥ (७८)

आश्चर्यम् एतस्यां तनौ अचरमे वयसि सावत्तो गुणसमाहारस्य सन्निवेशः, कथमिवाभूत्। सखे माधव! । (७९)

आपूर्णश्च कलाभिरिन्दुरमलो यातश्च राहोर्मुखम्,
सञ्जातश्च घनाघनो जलधरः शीर्णश्च वायोर्जवात्।

तथाभूताः नवप्रणयविभ्रमाकुलितमालतीदृष्टयः नवीनप्रेमजनितविलासव्याप्ताः मालत्या दृष्टिपाताः यत्र यैर्दृष्टिपातैः यत्, मालती यत्प्रवीरं निर्निमेषं दृष्टवतीत्यर्थः।

अत्र स्वकीयनवाढालिङ्गनकृतप्रेमानुरागमालतीदृष्टिपातकृतस्य च आश्चर्यस्य संसृष्टिरेव "आश्चर्यं मदमादानमितिलक्षणादादानं नाम विस्मयसम्बे रङ्गम्।

तथाच्यात्र चानुक्तसमप्रधानरसयोः मालतीविलासवीक्षणरूपालम्बनविभावत्वात् रसवदलङ्कारः, स च श्लिष्टोत्पन्नसन्देहोति सृष्टोपमालङ्कारेण सङ्कीर्णः। पृथ्वी छन्दः।

(७९) आश्चर्यमिति। एतस्यां मालतीनायां तनौ शरीरे, अचरमे अनवसाने, सावत्तः अपरिच्छिन्नस्य गुणसमाहारस्य दयादिगुणसमूहस्य।

(८०) आपूर्ण इति। कलाभिः निर्मलः इन्दुः चन्द्रः "कलाभिः षोडशभागैः आपूर्णः सम्पूर्णश्च राहोर्मिथुनस्यस्य मुखं यातः प्राप्तः। अत्र चकारेण "आलिङ्गनयोरक्षं। तथाच कलापरिपूर्णता काल एव राहुमुखं प्राप्त इत्यर्थः। एवमुत्तरत्रापि द्रष्टव्यम्। जलधरो मेघः, घनाघनः वर्षुकः (वर्षुकाद्यो घनाघना इत्यमरः) सञ्जातश्च वायोः पवनस्य जवात् वेगात् शीर्णः इतस्ततो विच्छिन्नत्वात् क्षयं प्राप्तश्च। दुर्जनः सहकारादिवेष्टतः फलैर्युक्तः फलयुक्तः ("फलिनश्चूतपनसः सुफल्यो"रिति रभसः, सुजनिर्याचनादिश्च) निर्मूलः समग्रश्च. दात्रेण वनरक्षिणा ("दात्रं

হইত না। এবং পূর্ব্বে আশ্চর্য্যান্বিত ও নূতন প্রণয়জনিত বিলাসব্যাপ্ত মালতীর দৃষ্টিপাত যেই শরীর পান করিয়াছে। (অর্থাৎ নূতন প্রণয়বশে আশ্চর্য্য নির্নিমেষনেত্রে মালতী যে শরীর অবলোকন করিয়াছে।

(৭৯) আশ্চর্য্য এই যে এই মাধবশরীরে অপরিণত বয়সেই দয়াদি তাবদ্-গুণসমূহের সন্নিবেশ কি প্রকারে হইল? সখে! মাধব!

(৮০) নির্দ্দল চন্দ্র কলা পূর্ণ হইয়া তৎকালেই রাহুর বদন প্রাপ্ত হয় (রাহুগ্রাসে নিপতিত হয়) মেঘ বর্দ্ধনশীল হইয়া তৎকালেই বায়ুবেগে বিশীর্ণ

निर्वृत्तस्य फलेयहिर्द्रुनवरो दग्धस्य दावाग्निना,
त्वं चूड़ामणितां गतस्य जगतः प्राप्तस्य सत्योर्वशम्॥ (८०)

*[विचिन्त्य।] तत्परिष्वजे अहं तावदेवंगतमपि वयस्यं, अर्थितयानेन सम्प्रत्येवायमर्थः। [परिष्वज्य।] हा वयस्य! विमलविद्यानिधे गुणगुरो! मालतीस्वयंग्रहजीवितेश्वर! हा सौन्दर्यविनिर्जितरतिरमणच्छाय! हा कामिनीहृदयमन्मथ! हा बान्धव-

---

दावी "वनारुहवन्धी" (अमरः) दग्धः, भस्मीभूतस्य। तथा त्वं जगतः चूड़ामणितां गुणगौरवेण शिरोरत्नतां सर्वमान्यतामिति यावत्, गतः प्राप्तः, सत्योर्वशस्य वशं अधीनतां प्राप्तः अधिगतश्च।

यथा इन्दुः षोडशकलाभिः सम्पूर्णः सन्नेव अवसरभावेन जगतश्चकोरानन्दमपूरयन् राहुणा ग्रस्यते, यथा वा जगधरो वर्षकमङ्गल एवावृष्ट्यभावेन धरतापमनिवारयन् वायुवेगेनेतस्ततो विक्षिप्यते, यथाच वा सहकारादिवैकल्पः फलयुक्तः सन्नेव फुल्लाम्रतेन जगतीतिमनुत्पादयन् दावानलेन दह्यते, तथा त्वमपि दयादिगुणगौरवेण जगतः प्राणांश्च लभमान एव दैवयोगादस्माकमाशामपूरयन् यमवशमगाः इतः किमहो दुःखदैवमिदमसहनीयमिति सरलार्थः सामान्यौ।

अत्र हृदालिङ्गियासमुच्चयालङ्कारयोरङ्गाङ्गिभावेन सङ्करः। मार्दूलविक्रीडितं छन्दः।

(८१) तदिति। एवं गतमपि दैवदशापन्नमपि प्राणी सत्योर्वशंगतमपीति यावत्, प्रियवयस्यं माधवं परिष्वजे आलिङ्गामि। कथमेवंगतमप्यालिङ्गसीत्याकाङ्क्षायामाह—अर्थितयेति, अनेन माधवेन, अयमेव मदालिङ्गनरूप एव अर्थः अर्थितः "प्रियवयस्य! सम्प्रत्यय परिष्वजस्व मा"मिति वाक्येन प्रार्थितः। यद्यादीदृशदशापन्नेऽपरिक्षालिङ्गनप्रदानं मयाऽवश्यं कर्तव्यमिति भावः। विमलविद्यानिधे! विमलानां विद्यानामाश्रय! गुणगुरो! गुणैर्दयादाक्षिण्यादिभिः प्रियकरत्वरूप! मालत्याः स्वयंग्राहं विवाहनवेक्षया आत्मनैव ग्रहणेन

हय। आम्र প্রভৃতি তরুবর ফলাদি সম্পন্ন হইয়া তৎকালেই দাবাগ্নি দ্বারা দগ্ধ হয়। এবং তুমিও গুণগৌরবে জগতের চূড়ামণিতা প্রাপ্ত হইয়া তৎকালেই যমের অধীনতা প্রাপ্ত হইলে।

(৮১) (চিন্তা করিয়া) তবে ঈদৃশদশাপন্ন প্রিয়বয়স্যকেও আমি আলিঙ্গন করি। যে হেতু সম্প্রতিই প্রিয় বয়স্য আমার আলিঙ্গনরূপ অর্থ প্রার্থনা করিয়াছিল। (আলিঙ্গন করিয়া) হে বয়স্য বিমলবিদ্যার

पयोनिधिशरच्चन्द्र ! हा कामन्दकीमकरन्दानन्दनमुखचन्द्र ! माधव ! अयमत्र ते जन्मनि अपश्चिमः पश्चिमावस्थां प्रापितो मकरन्दबाहु-परिष्वङ्गः। स एष मकरन्दो मुहूर्त्तमपि जीवतीति मैवं मंस्थाः। (८१)

आजन्मनः सहनिवासतया सखैव
मातुः पयोधरपयोऽपि समं निषीय।
त्वं पुण्डरीकमुख ! बन्धुतया निरस्त-
मेको निवापसलिलं पितृसौख्ययुक्तम्॥ (८२)

जीवितेश्वरः प्राणनाथः तत्सम्बोधनम्। सौन्दर्य्येण विनिर्जिता पराभूता रतिरमणस्य कामदेवस्य काया कविर्येन तथाभूत। कामिनीहृदयानां मन्मथ। अनङ्गरूपः। तद्दुन्मादकरीति यावत्। वाल्यात्. पितृदेवः एव पयोनिधिरः शारदश्चन्द्रः शरच्चन्द्रः तद्वदाह्लादजनकत्वात् शरच्चन्द्रसदृश। कामन्दकीमकरन्दयोः आनन्दन आनन्दजनकः मुखचन्द्रः वदनेन्दुर्यस्य तथाभूत, अत्र जन्मनि अयं मया दीयमानः अपश्चिमः इतःपरमपि मातृसम्बन्धित्वेनावस्थानाद्यश्चरमोऽपि मकरन्दस्य मम बाहुपरिष्वङ्गः आलिङ्गनं पश्चिमतां चरमतां प्रापितः नीतः। दैवहतकेनेति शेषः। जीवतीति त्वा विनेत्यादिः। एवं मंस्थाः एवं मनसि न कुर्याः। स्वरहितं मत्सखमपि जीवन्तं न मन्यमपि स्थास्यतीति भावः।

(८२) आजन्मन् इति। हे पुण्डरीकमुख। हे सौम्यपद्मसदृशमुखारविन्द। आजन्मनः जन्मन आरभ्य सहनिवासितया एकत्रावस्थानेन हेतुना सखैव समं सार्द्धं मातुः पयोधरपयोऽपि जननीस्तनदुग्धमपि निषीय पीत्वा त्वं, एकः एकाकी बन्धुतया पित्रादिसम्बन्धसमूहेन निरस्तं निक्षिप्तं मदनमिति यावत्, निवापसलिलं तर्पणजलं (पिण्डदानं निवापः स्यादित्यमरः) पितृणि

आत्रेय। हे (मन्मथकिशोरादि ओष धात्रा) लोकের শিক্ষক। হে স্বয়ংগ্রহণে মালতীর জীবিতেশ্বর। হে (সৌন্দর্য্যে) কামদেব-সৌন্দর্যবিজয়কারিন্। হে কামিনীহৃদয়কন্দর্প। হা বাল্যসমুদ্রশরচ্চন্দ্র। হা কামন্দকীনয়নানন্দন-মুখচন্দ্র। মাধব। (চিরাভিলষণীয় বলিয়া) তোমার এজন্মে যাহার শেষ হইত না, তাদৃশ মকরন্দের (আমার) এই ভুজালিঙ্গন দৈব কর্তৃক চরমতা প্রাপিত হইল। সে এই মকরন্দ মুহূর্তকালও জীবিত থাকিবে, এরূপ মনে করিও না।

(৮২) হে পুণ্ডরীকমুখ। জন্মাবধি আমারই সহিত একত্রাবস্থান বশতঃ

[सकरुणं विमुच्य परिक्रम्य च।] दयमधस्तात् पाटलावती, भवति आपगे ! (८३)

प्रियस्य सुहृदो यत्र मम तत्र च सख्यः। भूयादमुत्र भूयोऽपि युयामनुसञ्चरः। (८४)

इति पतितुमिच्छति।

प्रविश्य सहसा सौदामिनी। [वारयित्वा।] वत्स! अलं साहसेन। (८५)

पास्यसि (भविष्यत्सामीप्ये वर्तमाना) इति एतत् अनुज्ञं अनुचितम्। यत्पानसापि मया सहैव कर्तव्यमादिति भावः। तदाह मयापि यत्र कोऽपि प्रकारेण सरसमङ्गीकृत्य चिरावस्थानं सहचरेण भवितव्यमिति भावः। यत्नसाध्यसाध्यत्वम्।

(८३) सकरुणमिति। विमुच्य आत्मिद्रियं मालवरेशं मकरन्दं, परिक्रम्य मरकतशैलसकाशात्सारोद्धाराय पादविक्षेपं कृत्वा। प्रार्थनीयप्रवाहार्थं पाटलावतीं सम्बोधयति—भवतीति। आपगा नदी, गौरीत्वं लक्षणा ऐश्वर्यमाहात्म्यं द्योत्यम्।

(८४) प्रियस्येति। यत्र स्थाने प्रियस्य सुहृदः प्रियतमसम्बन्धीमौक्तिकस्य सख्यः सख्य भवेदिति शेषः, तत्रैव स्थाने ममापि सख्यः सख्य भूयात्। यथा भूयोऽपि पुनरपि अमुत्र परलोकेऽपि अनुसञ्चरः सख्य मालवरेशानुसरः भूयासम् (प्रार्थनायामाशीर्लिङ्) तथा यतोऽहं तवाभिलषी मम प्रार्थनीयमिति भावः।

अपूर्वार्द्धान्वितस्य "भूया" दिति क्रमलक्षपदस्य परत्रे पादादर्द्धस्थेवयपदलोपः, एवं सर्वत्रलक्षणवयं, वक्तव्यस्यापि अवश्यज्ञानविधानात्तत्त्वानविधानदोषश्च। इत्यनुग्राह्योऽयं प्रकारः।

मालतीमकरन्दके एकत्रে पान করিয়া তুমি একাকী রত্নমন্দিরপ্রস্থ তর্পণজল পান করিবে ইহা অনুচিত।

(৮৩) (এই বলিয়া মাধবের শরীর পরিত্যাগ করিয়া ও পর্ব্বতাগ্রে আরোহণার্থ পাদবিক্ষেপ করিয়া) এই অধোদেশে পাটলাবতী নদী। ভগবতি আপগে !

(৮৪) যে স্থানে প্রিয়সুহৃদ্ মাধবের সঙ্গ হইবে, আমারও যেন সেই স্থানেই সঙ্গ হয়। এবং পুনর্বারও যেন পরলোকে ইহার অনুচর হইতে পারি। (এই কথা বলিয়া পতনে উদ্যুক্ত হইল)।

मक। [विलोक्य।] अम्ब! कासि? किमहं त्वया प्रतिषिद्धः? (८९)

सौदा। आयुष्मन्! किं त्वं मकरन्दः? (९०)

मक। मुञ्च, स एवास्मि मन्दभाग्यः। (९८)

सौदा। वत्स! योगिनी अस्मि, मालत्या अभिज्ञानञ्च धारयामीति। बकुलमालां दर्शयति। (९९)

मक। [सोच्छ्वासं सकरुणम्।] आर्ये! अपि जीवति मालती? (९०)

---

(८९) प्रतिषिद्धेति। सौदामिनी सहसा द्रुतं प्रविश्य मकरन्दमालिङ्गे सकरुणमाह, मालतीवधनाशिङ्कया आहेदम्। साहसेन कार्यसहसावलम्बेन पर्यन्तविश्रान्तदीनतरकरुणाकुलिकवर्णेन, कृतं त्वयेति।

(९९) किमिति। किं किमर्थं? प्रतिषिद्धः मरणाध्यवसायाद्विरतः।

(९०) मालतीसङ्कल्पात् द्रुतं मकरन्दं सकाश्रु दृष्ट्वति—आयुष्मन्निति।

(९८) मन्दभाग्यमभिधानमकरन्दाभिज्ञा बकुलमालां दर्शयति—मुञ्चेति। स एव मकरन्द एव।

(९९) योगिनीति कापालिकाहं। अभिज्ञानं निदर्शनचिह्नम्।

(९०) सोच्छ्वासमिति, उच्छ्वासेन औत्सुक्येन सहितं यथा स्यात्तदा दर्शयति। अपि इति।

---

(८९) सौदामिनी (सहसा প্রবেশ করিয়া ও-নিপতন হইতে মকরন্দকে নিবৃত্ত করিয়া) বৎস! এই মরণসাধক সাহসিক কার্যে কোনও ফল নাই।

(९०) মক। মাতঃ! তুমি কে? আমাকেই বা নিবারিত করিতেছ কেন?

(९१) সৌদা। আয়ুষ্মন্! তুমি কি মকরন্দ?

(९२) মক। পরিত্যাগ কর, আমি সেই মন্দভাগ্যই বটি।

(९३) সৌদা। বৎস! আমি যোগিনী, মালতীর চিহ্নও ধারণ করিতেছি। (বকুলমালা দেখাইল)

(९०) মক (ঔৎসুক্য ও শোকের সহিত) আর্যে! মালতী কি জীবিত আছে।

सौदा। अथ किम्। वत्स! किमत्याहितं माधवस्य यदनिष्टे व्यवसितोऽसि इति आकस्मिकोऽसि। अथ माधवः क्व? (८१)

मक। आर्ये! तमहं प्रसुप्तमेव वैराग्यात् परित्यज्य आगतः, तदेहि, तूर्णं सम्भावयावः। [त्वरितं परिक्रामतः।] (८२)

माध। [आकर्ण्य।] अये! प्रतिबोधितः एवास्मि केनापि नूतनस्य अभिनवजीमूतजलवाहिनः प्रभञ्जनस्य अनपेक्षितात्मदर्शोऽयं व्यापारः। (८३)

---

(८१) अथ किमित्यनुपपन्नवादः मालतीजीवधारणैकार्थः। अत्याहितं निरतिशयानिष्टं। कुत एवं वत्से त्याकाङ्क्षायामाह—यदिति, यदत्यन्तात् अनिष्टे मरणात् व्यवसितोऽसि आत्महत्यायामध्यवसितोऽसि, प्रवृत्तः उद्यतः।

(८२) मकेति। प्रसुप्तं मरणं। वैराग्यात् तन्मरणमपश्यतोऽविरहेण सञ्जीवनं प्रत्यपि वैमुख्यात्। सम्भावयावः मरणेन साधवदनिष्टानेन रक्षितुं शक्तिमावहेव। त्वरितं सत्वरं यथा स्यात्तथा परिक्रामतः सौदामिनीमकरन्दौ माधवसञ्जीवनसाधनाय पादविक्षेपं कुरुतः।

(८३) आकर्ण्येति श्रौत्यं ज्ञानं। केनापि अपरिज्ञातजनेन। विधिव्यापारयति—नूतनेत्यादिना। नूतं विधिं अभिनवजीमूतजलवाहिनः नूतनजलधरसन्तिवत्कथाकर्षिणः प्रभञ्जनस्य मरुतः। अनपेक्षिता अनधिगता अकल्पना मालतीविश्लेषजनितमदीयदुर्दैवया यस्मिन् माधवः अयं मत्प्रतिबोधनव्यवहारः व्यापारः कार्यं। तथापि इदं मदीयदुरदृष्टाधिगमे सति परमो दैवातिदुःसह-दुःखानुभवकरं मदीयमूर्ध्वाङ्गमनसरोदिति भावः। एतेन मालतीविश्लेषजनितदुःखानुभवादर्थं तत्यजेव मरणमिति ध्वनिः।

---

(८१) सौदा। মালতী জীবিতা আছে। বৎস! মাধবের কি কোন অত্যাহিত হইয়াছে? যে হেতু তুমি অনিষ্ট কার্য্যে (মরণে) অধ্যবসায় করিতেছ। অতএব আমি অত্যন্ত কম্পিতা হইতেছি। সম্প্রতি মাধব কোথায়?

(৮২) মক। আর্য্যে! দৈবযোগবশতঃ তাহাকে আমি-অচৈতন্যাবস্থাতেই পরিত্যাগ করিয়া আসিয়াছি। অতএব এস, সত্বর হইয়া তাহাকে রক্ষা করি। (উভয়ে সত্বর পরিক্রমণ করিতে লাগিল)

(৮৩) মাধ। অহো নিশ্চয় দৈবযোগ দ্বারা আমি প্রতিবোধিত হইয়াছি।

মক। দিষ্ট্যা পুনঃ প্রত্যাপন্নচেতনো বয়স্যঃ। (৯৪)

সৌদা। [বিলোক্য।] সংবদতি উভয়োর্মালতীনিবেদিতঃ শরীরাকারঃ। (৯৫)

মাধ। ভগবন্ পৌরস্ত্যপবন! (৯৬)

শময় জলদানুদ্যোগমান্ প্রমোদয় চাতকান্
কলয় শিখিনঃ কেকোল্লাপোদ্ধুরান্ কঠোরয় কেতকান্।
বিরহিণি জনে মূর্চ্ছাং লব্ধ্বা বিনোদয়তি ব্যথাম্
অকরুণ! পুনঃ সংজ্ঞাব্যাধিং বিধায় কিমীহসে?॥ (৯৭)

---

(৯৪) দিষ্ট্যা ভাগ্যেন, প্রত্যাপন্না লব্ধা চেতনা যেন সঃ তথা যোগ বয়স্যঃ।

(৯৫) বিলোক্যেতি মাধবমকরন্দয়োঃ শরীরং বিলোক্যেত্যর্থঃ।—উভয়োঃ মাধব-মকরন্দয়োঃ, মালতীনিবেদিতঃ পরিজ্ঞানার্থং মালত্যা কথিতঃ শরীরাকারঃ দেহাকৃতিঃ সংবদতি ইত্থমালতীতয়োঃ সংঘটতে। তথাহি মালত্যা মাধবমকরন্দাবিত্থং নালি বন্ধৌ ইতি ভাবঃ। অন্যত্রাপীত্থিরিং।

(৯৬) পৌরস্ত্যপবন। পূর্ব্বদিগ্ভবপবন!

(৯৭) শময়েতি। অম্বোমদান্ সলিলাশয়বতঃ জলদান্ মেঘান্ শময় জগতামুপকারায় অর্থয়স্ব অনুদ্বিগ্নান্ পরিজ্ঞাপয়। চাতকান্ চাতকাখ্যপক্ষিবিশেষান্ প্রমোদয় বারিপ্রদানেন সন্তোষয়। শিখিনঃ ময়ূরান্ কেকায়া স্বকীয়শব্দে উৎকণ্ঠা উৎসুকতা যেষাং তথাভূতান্ কলয় গর্জ্জনেন বিধেহি। তথা কেতকান্ কেতকীতরূন্ কঠোরয় জলসেকেন শ্লথান্ কুরু। এতিস্রশ্চ ব্যাপারাঃ অকরুণাদি অতিবিরক্তাদাপন্নির্গাহীতি ভাবঃ। পুনঃ কিন্তু হে অকরুণ! হৃদয়হীনপবন!

আমার এই বিরহাবস্থার অবগতি না থাকায় নূতন মেঘের জলবহনকারী পবনেরই (আমার চৈতন্য সম্পাদনরূপ) এই কার্য্য।

(৯৪) মকরন্দ। ভাগ্যবশতঃই বয়স্য পুনরায় চৈতন্যলাভ করিয়াছে।

(৯৫) সৌদা। (অবলোকন করিয়া) মাধব ও মকরন্দের শরীরাকৃতি মালতী যেরূপ বলিয়াছিল, সেরূপ অবিকলই দেখা যাইতেছে।

(৯৬) মাধ। ভগবন্ পূর্ব্বদিক্‌প্রভব বায়ো!

(৯৭) সলিলগর্ভ মেঘসমূহকে চতুর্দ্দিকে পরিচালিত কর। চাতক পক্ষি দিগকে (জলদান করিয়া) সন্তুষ্ট কর। ময়ূর দলকে (গর্জ্জন দ্বারা)

भक्त। सुविहितमनेनाखिलजन्तुजीवनेन मातरिश्वना। (९८)

मूर्च्छां चैतन्याभावं लब्ध्वा यथा विरहदुःखं विनोदयति निराकुर्व्वाणे विरहिणि जने (माढवी) संग्रामे तत्परैव व्याप्तिः योगः सं विधाय संलाप्य किं ईहसे प्राप्तुं चेष्टसे ? तथाचैतेन परदुःखदानमात्रस्यैव साधना दैवतस्यातीवानुचितमिति भावः।

अत्र भगवन्निति सम्बोधनेन एवमस्य गौरवमुरीकृत्य श्रीकारेणेन पुनरकरणेति सम्बोधनप्रभृतिभिश्चास्य अतिक्रमणप्रदर्शनादयं नाम विमर्शसन्धेरङ्गम्। यदाहुः दर्पणे "द्रवी गुणव्यतिक्रान्तिः श्रीकारेणादिसम्भवे"ति।

एवमप्रसुनाविरहिजनप्राणाधिष्ठितस्य माधवस्य प्रतीतेरप्रसुनत्वं सालङ्कारः, स च संज्ञाव्याधिरिति कैवल्यनिरङ्कुशकैक सङ्ज्ञौ यैते। तथा "वर्णान् विद्वान् यङ्नुङ्ना विशेषोक्तिर्विशेषक"मिति विशेषकं नाम नाट्यालङ्कारश्च। हरिणीछन्दः।

(९८) मनेति। अखिलानां सर्व्वेषां जन्तूनां प्राणिनां जीवनेन प्राणभूतेन अनेन मातरिश्वना पवनेन सुविहितं माधवस्य तत्सम्पादनरूपं सुष्ठु कर्म्म कृतम्। यथा मृगदृश्यादनरूपं व्याहितमिति भावः।

क्वचित् पुस्तके मातरिश्वनेत्यत्र
"पठित—

एते केतकमूलसौरभमुचः सौदामलभाङ्गना
व्याधीलानवयङ्गरीविलुठनव्याजोपसुप्तावनाः।
किञ्जल्लिङ्गकदम्बकुट्मलपुटीधूलीलुठत्षट्पद-
भ्रूभङ्गाकृतिकारिणो विरहिणः कर्षन्ति वर्षानिलाः॥

इत्यधिकपाठो दृश्यते। तदर्थश्च—केतकमूलसौरभमुचः केतककुसुमपरिमलसंविनः, तथा पौराः पुरवासिनः याः प्रसन्नाङ्गनाः प्रसन्नभर्तृकाः स्त्रियो रमण्यः ताश्चा व्याधीला व्याधयः यक्ष्मकुलवनिताः ताश्चा विलुठनव्याजेन परिवालनच्छलेन उपसुप्तानि सुप्तप्रायाणि आलवालानि प्रसन्नाङ्गनानां सुप्तानि यैस्तथाभूताः, किञ्च किञ्जल्लिङ्गकदम्बकुट्मलपुटीधूलीषु विकचनीपकुसुमकोशरजःसु लुठतः सपक्षं षट्पदसमूहस्य भङ्गरागस्य भ्रान्तिं भङ्गारं कर्तुं शीलं येषां तथाभूताः वर्षानिलाः वर्षमारुताः विरहिणः विरहदुःखकातरान् जनान् कर्षन्ति।

केकाध्वनि विषये उत्कण्ठित कर एवं केतकीतरुविशेषके जलसेक द्वारा पोषि कर। किन्तु हे निर्घृण! मूर्च्छानाश कारिणी विरहव्याधार कथञ्चित् दमनकारी विरहिजनेर चैतन्यरूपव्याधि निधान करिया कि नाश करिते चेष्टा करितेछ ?

মাধ। দেব বায়ো! তথাপি ভবন্তমেবং প্রার্থয়ে। (৯৯)

বিকসৎকদম্বনিকুরম্বপাংশুনা
সহ জীবিতং বহ মম প্রিয়া যতঃ।
